**PHALITA JYOTISHAM**

**ACHARYA 2nd YEAR**
**Course/Paper-8**

# प्रश्नमार्गः (१ - १६ अध्यायाः)

## *Praśnamārgaḥ (1 - 16 adhyāyāḥ)*

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)

**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# प्रश्नमार्गः

| विभागः | अध्यायः |
|---|---|
| 1 | 1,2 |
| 2 | 3,4,5 |
| 3 | 6,7 |
| 4 | 8,9 |
| 5 | 10,11 |
| 6 | 12,13 |
| 7 | 14 |
| 8 | 15 (श्लोहाः 1 – 101) |
| 9 | 15 (श्लोकाः 102 – 227) |
| 10 | 16 |

# प्रश्नमार्गः

## प्रस्तावना

अयि प्रियच्छात्राः !

**छन्दः पादौ शब्दशास्त्रं च वक्त्रं**
**कल्पः पाणी ज्योतिषं चक्षुषीं च ।**
**शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं**
**वेदस्याङ्गान्येवमाहुर्मुनीन्द्राः ॥**

इति ज्योतिषं वेदस्य नेत्रस्थानमलङ्कुर्वन् वेदाङ्गशास्त्रेषु प्राधान्यं प्राप्नोति । सिद्धान्तहोरासंहितास्कन्धैर्विराजमानस्य होरास्कन्धस्य जातकं प्रश्नः मुहूर्त निमित्तमिति चतस्रः शाखाः ।

जन्मस्थलं समयं च उपयुज्य जन्मकुण्डली निर्मीयते । त्रिधावस्थितकर्मसु प्रारब्धकर्म सूचयति जातकम् ।

**सञ्चितानां पुनर्मध्या**
**त्समाहृत्य कियत्किल ।**
**देहारम्भस्य समये**
**कालः प्रेरयतीव यत् ॥**
**प्रारब्धं तच्च विज्ञेयम्**

इति वचनात् कालः जननसमये जीवस्य सञ्चितकर्मणां मध्ये कानिचित् उद्धृत्य जीवेन सह प्रवर्तितुं प्रेरयति ।

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।**
**व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥**

इति वचनात् जन्मान्तरेषु कृतानां शुभाशुभकर्मणां पाकमेव होराशास्त्रं सूचयति इति ज्ञायते । देशं कालं च अनुसृत्य निर्मिता जन्मकुण्डली

लग्नेन ग्रहैः उपग्रहादिभिश्च प्रारब्धकर्म सूचयति । एवं चेत् किमर्थं प्रश्नशास्त्रं प्रतिपादितम्? जातकं प्रारब्धकर्म सूचयति, प्रश्नः इहार्जितं कर्म सूचयति इति निष्कर्षः ।

**यदा जातकतः प्रश्नो गुणदोषैर्विभिद्यते ।**
**तदाशुभाशुभं विद्यात् कर्मभेदैरिहार्जितैः ॥**
**यदानुसरति प्रश्नो जातकं ग्रहभादिभिः ।**
**तदा प्राक्कर्मपाकः स्यादित्याद्यूह्यं हि धीमता ॥**

इति प्रश्नमार्गे दृश्यते ।

जातकवशात् शुभसमये यद्यशुभफलान्यनुभूयन्ते, तदा इहार्जितकर्म एव तस्य कारणमित्यवगन्तव्यम् । एवं अशुभसमये इहार्जितकर्मणा शुभफलानि सिध्यन्ति । जातकप्रश्नयोः संवादविसंवादान् निरीक्ष्य फलानि वक्तव्यानि ।

प्रश्नशास्त्रस्य उद्भवः कथमासीदिति न ज्ञायते । जातकशास्त्रे पराशरादारभ्य बहवः सन्ति ग्रन्थाः । वराहहोरायां प्रश्नपर्यायभूतः चिन्ताशब्दः प्रयुक्तः ।

**“उद्वाहे वरणविधौ प्रदानकाले**
**चिन्तायामपि सकलं विधेयमेतत्”**

इति दृश्यते । वराहमिहिरतनूजेन पृथुयशसा रचिता षट्पञ्चाशिका, भट्टोत्पलनिर्मिता आर्यासप्ततिः, कृष्णीयं, अनुष्ठानपद्धतिः इत्यादयः सन्ति प्रश्नग्रन्थाः । एतेभ्य अर्वाचीन प्रश्नमार्गः । प्राङ्निर्मितग्रन्थान् सम्यङ्निरीक्षय तत्त्वानि क्रोडीकृत्य बृहत्प्रामाणिकग्रन्थं व्यरचयत् प्रश्नमार्गकारः । वहुषु प्रश्नग्रन्थेषु सत्स्वपि अतिव्युत्पादकतया प्रश्नमार्ग एव नायकायते । प्रश्नकर्मणि (१) समयः (२) देशः (३) श्वासगतिः (४) अवस्था (५) प्रष्ट्रा स्पृष्टं वस्तु (६) पृच्छकाश्रितदिक् (७) पृच्छकाश्रितराशिः (८) प्रश्नाक्षराणि (९) प्रयुक्तो गणः (१०)

पृच्छकावस्था (११) पृच्छकव्यापारः (१२) पृच्छकभावः (१३) पृच्छकविलोकनं (१४) पृच्छकवस्त्रं (१५) पृच्छकधृतसाधनानि (१६) पृच्छकलक्षणानि (१७) निर्गमसमये दृष्टानि निमित्तानि (१८) मध्येमार्गं दृष्टानि लक्षणानि (१९) पृच्छकगृहे दृष्टानि लक्षणानि (२०) चक्रलेखनरीतिः (२१) पञ्चसूत्राणि (२२) त्रिस्फुटं (२३) अष्टमङ्गलं (२४) स्वर्णस्थितिः (२५) उदयलग्नं (२६) चन्द्रलग्नं (२७) आरूढलग्नं (२८) स्पृष्टाङ्गराशिः (२९) आरूढराशिः (३०) उदयांशः (३१) छत्रराशिः (३२) ताम्बूललग्नं (३३) ग्रहस्थितिविशेषाः (३४) जातकं

एतानि प्रश्नकर्मणि अवलोकनीयानी । एतत्सर्वमुपयुज्य फलानि कथ्यन्ते ।

पृच्छकस्य प्रकृतिः, आकृतिः, सुखं, दुःखं, पापं, पुण्यं, कालः, कर्म, अनुभवः, आयुः, कुटुम्बं, धनं, सहोदराः, सहायकाः, मातापितरौ, गृहं, सन्तानं, शत्रुः, रोगः, मरणं, भाग्यं, कर्माजीवः, भाविजन्म, दैवानुकूलादि, बाधाभिचाराः, देवप्रश्नः, सर्वशुभाशुभानि, प्रतिविधयः इत्यादीनि प्रश्नमार्गे विपुलरूपेण प्रतिपादितानि ।

**"न तच्छास्त्रं नतच्छित्पं**
**न सा विद्या न ताः कलाः ।**
**नासौ योगे नज्ज्ञानं**
**नाटके यन्न दृश्यते"**

इति नाटकं विशिनष्टि भरतः । विविधशास्त्रकलाज्ञानयुत एव नाटकं रचयितुं क्षमः । एवं नाटकान्तं कवित्वं इति वचनम् । विविधशास्त्रप्रयोगविलसिता प्रश्नक्रियापि पर्याप्तेन दैवज्ञेनैव कर्तव्या । प्रश्नान्तं दैवज्ञत्वं इत्येव वक्तव्यम् ।

# प्रश्नमार्गः

## प्रथमो विभागः

### (प्रथमाध्यायो द्वितीयाध्यायश्च)

प्रथमाध्यायः

1.1.0 अवतरणिका

इह खलु प्रश्नमार्गकारो लोकोपकारार्थं प्रश्नशास्त्रग्रन्थं चिकीर्षुः "आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुख" मिति शिष्टाचारमनुसृत्य

> "मध्याटव्यधिपं दुग्धसिन्धुकन्याधवं धिया ।
> ध्यायामि साध्वहं बुद्धेः शुद्ध्यै वृद्ध्यै च सिद्धये ॥"

इति निजदेवतामादौ ध्यायति । ततो ज्योतिःशास्त्रविभागान् कथयति । ज्योतिःशास्त्रस्य सिद्धान्तो होरा संहिता इति स्कन्धास्त्रयः । सिद्धान्तस्य गोलो, गणितमिति शाखाद्वयम् । होरायाः जातकं, प्रश्नः, निमित्तं, मूहूर्त इति चतस्रः शाखाः । निमित्तशाखा संहितायामपि दृश्यते । ज्योतिषं, कल्पो, निरुक्तं, शिक्षा, व्याकरणं, छन्द इति वेदस्य षडङ्गानि । तत्र ज्योतिषं नयनमित्युक्तम् । दैवज्ञलक्षणानि उक्तानि । विविधाः सिद्धान्ताश्च कथिताः । जातकं प्रारब्धकर्म सूचयति । प्रश्नस्तु इहार्जितं कर्म सूचयति । प्रश्नस्य जातकसाम्यं चोक्तम् ।

1.1.1 उद्देश्यानि

- ज्योतिःशास्त्रविभागाः
- प्रश्नक्रियायाः अङ्गानि
- फलकथनरीतिः

### 1.1.2 ज्योतिःशास्त्रस्वरूपम्

स्कन्धत्रयात्मकं ज्योतिः शास्त्रमेतत् षडङ्गवत् ।
गणितं संहिता होरा चेति स्कन्धत्रयं मतम् ॥ 1-5

जातकगोलनिमित्तप्रश्नमुहूर्ताख्यगणितनामानि ।
अभिदधतीह षडङ्गान्याचार्या ज्योतिषे महाशास्त्रे ॥ 1-6

पूर्वोक्तप्रकारेण ज्योतिःशास्त्रस्य सिद्धान्तः, होरा, संहिता इति स्कन्धास्त्रयः । सिद्धान्तस्य गोलो, गणितमिति शाखाद्वयम् । होरायाः जातकं प्रश्नः, मुहूर्तः, निमित्तमिति चतस्रः शाखाः । निमित्तशाखा संहितायामपि दृश्यते । एवं जोतिःशास्त्रस्य षडङ्गानि । जोतिषः प्रमाणं गणितस्कन्धः । अन्यौ फलात्मकौ । ज्योतिषं वेदस्य चक्षुरिति कथितम् ।

### 1.1.3 दैवज्ञलक्षणम्

ज्योतिःशास्त्रविदग्धो गणितपटुर्वृत्तवांश्च सत्यवचाः
विनयी वेदाध्यायी ग्रहयजनपटुश्च भवतु दैवज्ञः ॥ 1-15

द्युगणानयनं खेटमध्यमस्फुटयोरपि ।
ग्रहणद्वितयं खेटकलहस्तत्समागम : ॥ 1-19

अस्तोदयौ च खेटानां नक्षत्राणां च सङ्गमः ।
इति भेदास्तु विज्ञेया ग्रहाणां गणिते दश ॥ 1-20

इत्युक्तम् । एवं दैवज्ञो जोतिःशास्त्रविदग्धो गणितपटुः, वृत्तवान्, सत्यवचाः, विनयी वेदाध्यायी ग्रहयजनपटुश्च स्यात् । ग्रहगणिते विविधानि तत्त्वानि स जानाति ।

विशेषतः अहर्गणानयनं, ग्रहाणां मध्यमगणितं स्फुटगणितं, ग्रहयुद्धं, ग्रहसमागमः, अस्तमयः, उदयः, नक्षत्रसङ्गमः इति ग्रहाणां

दशविधगणितानि दैवज्ञेन ज्ञातव्यानि । वासिष्ठरोमकपौलिशपैतामहसौरसिद्धान्ताः सम्यगवगन्तव्याः । प्रामाणिकग्रन्थान् अधीतः शास्त्रपण्डितश्च भवेत् ।

### 1.1.4 जातकं प्रश्नश्च

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।
व्यञ्जयति शस्त्रमेतत् तमसि द्रव्याणि दीप इव ॥ 1-35

यदा जातकतः प्रश्नो गुणदोषैर्विभिद्यते ।
तदा शुभाशुभं विद्यात् कर्मभेदैरिहार्जितैः ॥ 1-43

बुद्ध्वा शास्त्रं यथान्यायं बलाबलविधानतः ।
यथोक्तं जातके सर्वं तद्वत् प्रश्नेऽपि चिन्तयेत्॥ 1.45

त्रिधावस्थितं कर्म, सञ्चितकर्म, प्रारब्धकर्म, इहार्जितकर्म इति । जन्मकुण्डलीं सम्यङ् निर्माय जातकशास्त्रं उपयुज्य प्रारब्धकर्मफलानि ज्ञातुं शक्यते । कदाचित् जातकफलानुभवो न सिध्यति । उदाहरणार्थं, जातकवशात् विवाहप्रदयोगो भवतु । तथापि विवाहो न संभवति । एवं चेत् प्रश्नरीत्या विवाहप्रतिबन्धभूतमिहार्जितकर्म ज्ञातुं शक्यते ।

"यदा जातकतः प्रश्नो गुणदोषैर्विभिद्यते ।
तदा शुभाशुभं विद्यात्कर्मभेदैरिहार्जितैः ॥" 1-43

इति प्रमाणम् ।

शास्त्रं यथाविधि ज्ञात्वा जातके यच्चिन्त्यते तद्वत् प्रश्नेऽपि चिन्त्यताम् ।

| दैवज्ञलक्षणं कथयत । |
| --- |
| |

## द्वितीयाध्यायः

### 1.2.0 अवतरणिका

अस्मिन्नध्याये आदौ दैवज्ञकृत्यमुच्यते । ततः आरूढविधिः प्रतिपादितः । देशकालश्वासगत्याश्रितर्क्षदिग्दूतवाक्यभावदर्शनवस्त्रनिमित्तादीनि विस्तरतः कथितानि ।

### 1.2.1 उद्देश्यानि

- दैवज्ञकृत्यम्
- प्रश्नक्रियायाः अङ्गानि
- फलकथनरीतिः

### 1.2.2 दैवज्ञकृत्यम्

उत्थायोषसि देवतां ¶दि निजां ध्यात्वा बपुःशोधनं
कृत्वा स्नानपुरःसरं सलिलविक्षेपाणि कर्माखिलम् ।
कृत्वा मन्त्रजपादिकं च विधिवत् पञ्चाङ्गवीक्षां तथा
खेटानां गणनं च दैवविदथ स्वस्थान्तरात्मा भवेत् ॥ 2-1

दैवज्ञः उषसि उत्थाय निजदेवतां ध्यात्वा वपुःशोधनादि कर्म स्नानं सन्ध्यावन्दनादि च कृत्वा आचारमनुसृत्य मन्त्रजपादीन् कृत्वा पञ्चाङ्गवीक्षणं ज्योतिषोपयोज्यग्रहगणितादीनि च कुर्वन् स्वस्थचित्तो भवेत् । ततः परं

दैवज्ञेन समाहितेन समयो देशः स्ववायुर्दशा
प्रष्टुः स्पर्शनमाश्रितर्क्षहरितौ प्रश्नाक्षराणि स्थितिः ।
चेष्टाभावविलोकने च वसनाद्यन्यच्च तत्कालजं
पृच्छायाः समये तदेतदखिलं ज्ञेयं हि वक्तुं फलम् ॥ 2-12

इति नियममनुसृत्य समाचरेत् ।

दैवज्ञः स्वस्थचित्तः सन् (१) कालः (२) पृच्छकेन स्वीकृतं स्थलं (३) दैवज्ञस्य श्वासगतिः (४) अवस्था (५) पृच्छकेन गृहीतः पदार्थः (६) पृच्छकेन प्राप्तो राशिः (७) पृच्छकप्राप्तदिक् (८) पृच्छकोपयुक्ताक्षराणि (९) अङ्गचेष्टा (१०) मुखसंसूचितप्रसादादिभावविशेषः (११) पृच्छकेन विलोकिता दिक् (१२) धृतवस्त्रं (१३) धृतकटकं (१४) कुण्डलाद्याभरणानि (१५) वेणुवीणादिशब्दाः (१६) विलापप्रलापादिशब्दाः इत्यादीनि आदावलोकयति ।

पृच्छकः दैवज्ञमभिगम्य स्वकीयमावश्यकं निवेदयति । दैवज्ञः तत्समये समयं देशं श्वासगतिं चेष्टाः निमित्तानि दूतवाक्यं इत्यादीनि परीक्ष्य फलं कथयेत् । पुनः स्वगृहान्निर्गतः मध्येमार्गं दृष्टानां निमित्तानां फलं चक्रलेखनसमये दृष्टानां लक्षणानां च फलानि सम्यक् परीक्ष्य कथयेत् । सामान्याधिपत्यंशकनक्षत्रमहासूत्राणां जीवरोगमृत्युभेदान् ज्ञात्वा फलानि कथयेत् । त्रिस्फुटचतुस्फुटपञ्चस्फुटादीनां गणनं कृत्वा फलानि वदेत् । ततः आरूढोदयलग्नांशच्छत्रस्पृष्टाङ्गराशिचन्द्राधिष्ठितराशिताम्बूललग्नवशात् फलानि वक्तव्यानि । वीथिं छत्रराशिं च ज्ञात्वा तदनुसृत्यापि फलानि वाच्यानि । भावफलानि प्रश्नस्वभावमनुसृत्य वक्तव्यानि । एते प्रश्नक्रियायां सामान्यनियमाः ।

### 1.2.3 फलनिर्देशक्रमः

पृच्छानिर्गममार्गमन्दिरगतिः प्रश्नक्रियासंभवं  
सूत्रत्रिस्फुटजाष्टमङ्गफलारूढदयेन्दूद्भवम् ।  
आयुः खेटवशाच्च जातकवशात् सञ्चिन्त्य भावान् परान्  
देवानामनुकूलतादि च वदेद्बाधाभिचाराद्यपि ॥ 2-13

पूर्वोक्तप्रकारेण दैवज्ञः समयादीन् पृच्छार्थं निर्गमसमये दृष्टानि निमित्तानि उपयुज्य फलं कथयेत् । मध्येमार्गं दृश्यमानानामपि

लक्षणानां फलानि च वदेत् । सूत्राणि, त्रिस्फुटचतुःस्फुटपञ्चस्फुटानि, अष्टमङ्गलसंख्याः, आरूढोदयचन्द्रान् चावलोक्य फलानि कथयेत् । आयुः जातकवशात् प्रश्नवशाच्च चिन्त्यम् । देवानुकूलतादीनि, बाधाभिचारादीनि च वदेत् ।

1.2.4 प्रश्नोचितसमयादयः

बालान्नवर्ज्यतारासु गण्डान्तोष्णविषेषु च ।
अष्टमीविष्टिरिक्तासु स्थिरेषु करणेषु च ॥ 2-17

तिथिनक्षत्रराश्यंशसन्धौ च गुलिकोदये ।
चक्रार्धे ग्रहणे सार्पशिरस्येकार्गले तथा ॥ 2-18

मृत्युदग्धादियोगेषु पापदृष्ट्युदयेषु च ।
त्रयोदश्यां प्रदोषे च निशीथे रविदर्शने ॥ 2-19

संक्रान्तौ च तथा प्रष्टुर्विपत्प्रत्यरयोर्वधे ।
अष्टमे च तथा राशौ जन्माष्टमगते विधौ ॥ 2-20

इत्यादिदुष्टकालेषु प्रश्नःस्यादशुभप्रदः । 2-21

बालान्नवर्ज्यतारासु, गण्डान्तेषु, नक्षत्राणां उष्णविषनाडिकासु, तिथिनक्षत्रराशिसन्धौ गुलिकोदयसमये, व्यतीपाते, ग्रहणसमये, सार्पशिरसि, एकार्गले, मुत्युदग्धादियोगेषु पापदृष्ट्युदेयेषु, त्रयोदश्यां, प्रदोषे, निशीथे, रविदर्शनसमये, सङ्क्रान्तौ, प्रष्टुः विपत्प्रत्यरवधनक्षत्रेषु, पृच्छकस्य लग्नादष्टमलग्ने, जन्माष्टमे चन्द्रे सति, इत्यादि दुष्टकालेषु प्रश्नो न शुभप्रदः । एतत् उदाह्रियते । नक्षत्रं कृत्तिका भवतु । एतत् बालन्नवर्ज्यनक्षत्रम् । एवं कृत्तिकायां प्रश्नक्रिया न शुभप्रदा ।

फलकुसुमसम्पूर्णे वृक्षयुते स्निग्धभूमितले रत्नकाञ्चनादिसमन्विते पञ्चेन्द्रियमनःप्रीतिकरे गोमयवारिणा

तत्क्षणप्रोक्षिततले समभूमौ मङ्गलकर्मसंयुक्ते मङ्गलस्त्रीयुते पुत्रभार्यादियुतजनसमेते देशे प्रश्नकर्म शुभावहम् । महावने श्मशाने निम्नोच्चस्थले शून्यमन्दिरे आर्तजनयुते प्रेतकार्याद्यशुभकर्मसहिते जलाग्निशुष्कवृक्षान्ते प्रश्नकर्म न शुभप्रदम् ।

कार्यं श्वासपरीक्षणं प्रतिदिनं बुद्ध्वा प्रभातागमे
तस्येडादिगतिर्धराप्रभृतिसञ्चारश्च विज्ञायताम् ।
तेनात्मीयशुभाशुभं हि सकलं ज्ञेयं पुनः पृच्छतां
तत्कालात्मसमीरणेन च तथा नष्टादिकं चोच्यताम् ॥ 2-29

प्रतिदिनं दैवज्ञेन श्वासपरीक्षणं कर्तव्यम् । श्वासस्य इडादिनाडीसञ्चारः ज्ञातव्यः । तमनुसृत्य शुभाशुभं वक्तव्यम् । नष्टद्रव्यादीनां दिश इत्यादीनि बहूनि फलानि वक्तुं शक्यते । सोमबुधगुरुशुक्रवारेषु शुक्लपक्षे वामभागस्थवायुसञ्चारः शुभं तनोति । इतरवारेषु कृष्णपक्षे दक्षिणस्थवायुसंचारः शुभकरः ।

गर्भिणीदर्शनसमये यदि वायुः दक्षिणे चेत् गर्भस्थशिशुः पुमान् इति वक्तव्यम् । वामभागे चेत् स्त्री इति वाच्यम् । गर्भे मे किमिति काचित् गर्भिणी दैवज्ञं यदि पृच्छेत् तदा फलकथने नियमोऽस्ति । यदि गर्भिणी वायुसञ्चारभागे तिष्ठन्ती पृच्छति, पुरुषप्रजा इति वक्तव्यम् । अन्यथा चेत् स्त्री इति वक्तव्यम् । वायोः समसञ्चारश्चेत् पुरुषः स्त्री च जनिष्येते इति वक्तव्यम् ।

पृथिवीभूतस्य दैर्घ्यं षोडशाङ्गुलम् । जलभूतस्य द्वादशाङ्गुलम् । अग्निभूतस्याष्टाङ्गुलम् । वायुभूतस्य षडङ्गुलम् । आकाशभूतस्य त्र्यङ्गुलम् । त्र्यङ्गुलपर्यन्तं पृथिवीभूतं, त्र्यङ्गुलादारभ्य षडङ्गुलपर्यन्तं जलभूतं अन्येषां च एतत्सदृशमिति केचित् व्याचक्षते ।

पृच्छकस्य स्पर्शनमनुसृत्यापि फलानि वक्तव्यानि । विशेषतः, स्ववक्षोभागं दर्पणादिमङ्गलद्रव्याणि स्पृशन् इष्टसिद्धिं प्राप्नोति ।

नाभिनासामुखकेशरोमनखदन्तगुह्यदेशपृष्ठस्थानग्रीवाजठरादीनि सेस्पृशन् अशुभं व्रजति । अनामिकरन्ध्रनवकस्पर्शोऽपि न शुभप्रदः ।

प्रागादिदिक्षु योनयः कल्पिताः । प्राच्यां दिशि ध्वजः, आग्नेय्यां धूमः, अवाच्यां सिंहः, नैऋत्यां शुनकः, वारुण्यां वृषः, वायव्यां खरः, उदीच्यां गजः, ऐशान्यां काकः इति योनयः। शिरसि ध्वजः, घ्राणपुटे धूमः, मुखे सिंहः, श्रवणदृशोः शुनकः, कण्ठे वृषः, पाणियुगे खरः, ¶दये गजः, पादयुगले काकः इति तासामवयवस्थितिः । यदि पृच्छकः केतुदिशि स्थितः सन् ध्वजसूचितावयवं स्पृशति पशुलाभो वक्तव्यः । एवं बहुप्रकारैः फलानि कथितव्यानि ।

पृच्छकस्य दिशि स्थानं विशेषाच्छुभदं नृणाम् ।
पृच्छकस्य स्थितिः कोणे प्रश्ने स्त्रीविषये शुभा ॥ 2-103

यदि पृच्छकः प्राच्यां अवाच्यां प्रतीच्यां उदीच्यां वा स्थितः शुभफलानि वक्तव्यामि । एतत्पुरुषविषयेषु विशेषतः शुभदम् । स्त्रीप्रश्नेषु आग्नेय्यां, नैऋत्यां, वायव्यां, ऐशान्यां वा यदि पृच्छक स्थितः, तदा शुभं वक्तव्यम् । रोगविषयप्रश्नेषु विशेषविधिरुच्यते । यदि पृच्छको दैवज्ञस्य दक्षिणाशां प्राप्तः अथवा दक्षिणाशां पश्यन् स्थितः, तदा अशुभफलानि वाच्यानि । आदौ कोणदिशि स्थानं शुभदमित्युक्त्वा ततः दक्षिणाशा न शुभदा इत्युक्तम् । एतत् उत्सर्गापवादन्यायेन साधूक्रियते ।

पृच्छकाश्रितराशिरारूढराशिः । आदित्यादिग्रहाणां पृच्छकाश्रितरा–शिवशात् फलानि कथ्यन्ते ।

“प्राच्यादि गृहे क्रियादयो
द्वौ द्वौ कोणागता द्विमूर्तयः”

इति बृहज्जातकवचनात् आरूढराशिनिर्णयः । प्राच्यां मेषवृषौ । आग्नेय्यां मिथुनम् । आवाच्यां कर्कटसिंहौ इति राशयः निर्णेयाः ।

आरूढराशिस्तु पृच्छकः यस्मिन् राशौ वर्ततै सः । तं निश्चित्य फलानि कथ्यन्ते ।

यदि रविरष्टमस्थः तदा गतरविवारे नृपेण वहु जनैर्वा पीडासीदिति वक्तव्यम् । जीवांशेन राज्ञैव पीडा कृता इति वाच्यम् । रवेर्मूलधातुनवांशेन तत्सदृशद्रव्याणां हानिरासीदिति ज्ञेयम् । चन्द्रः एवं अष्टमस्थश्चेत् गतचन्द्रवारे अभोजनं यवागूभक्षणं वा वक्तव्यम् । कुजः अष्टमस्थश्चेत् गतभौमवारे पदभ्रंशः, मान्दियुतश्चेत् क्षतिः । धात्वंशे शस्त्रेण मूलांशे कण्टकादिना जीवांशे दन्तनखाद्यैश्च व्रणं वाच्यम् । सरीसृपांशे यदि तदा सर्पदंशः स्यात् । बुधो यद्यष्टमस्थः तदा गतबुधवारे इष्टकर्मभङ्गो वाच्यः । मूलांशे पूगताम्बूलनाशः, धात्वंशे वपुषः सादः जीवांशे षारुष्यवाचः ताम्बूलचर्वणे चूर्णाभावो च वक्तव्याः । गुरुर्यद्यष्टमस्थः गतगुरुवारे द्रव्यनाशः नित्यकर्मणां विलम्बश्च सूचितौ । यदि शुक्रः अष्टमस्थः गतशुक्रवारे भार्यावियोगः वक्तव्यः । धातुनवांशे वस्त्रमालिन्यं, मूलनवांशे वस्त्रस्य छेदः इति वक्तव्यम् । शनौ अष्टमस्थे गतशनिवारे भुक्तिविलम्बः वक्तव्यः । अत्यापद् आसीत् । राहावष्टमस्थे गतशनिवारे पादव्यथा वक्तव्या । मूलांशे कण्टकैः धात्वंशे पाषाणघातेन जीवांशे सर्पैश्च दोषा वक्तव्याः । केतुःर्यद्यष्टमस्थः, तदा गतभौमवारे पादभेदोऽभवदिति वक्तव्यम् । मान्दियोगेन दोषाधिक्यं वाच्यम् ।

दक्षिणां दिशमपहाय इतरदिशि स्थितिः शुभावहा । कोणदिशि न शुभप्रदा । स्त्रीविषयप्रश्ने कोणदिक्स्थितिः शुभं तनोति ।

सूर्यः स्वराक्षराणामधिपः । चन्द्रस्य य, र, ल, व, श, ष, स, ह इत्येतानि । कवर्गाधिपः कुजः । चवर्गाधिपः शुक्रः । टवर्गाधिपः सौम्यः । तवर्गाधिपो गुरुः । पवर्गाधिपः शनिः । 'रामः' इति दूतवाक्ये आद्याक्षरं  रा इति । तस्याधिपः चन्द्रः ।

आरूढराशिः

ऐशानी पूर्वा आग्नेयी

दक्षिणा

| | | | |
|---|---|---|---|
| मीनः | मेषः | वृषः | मिथुनम् |
| कुम्भः | | | कर्कटः |
| मकरः | | | सिंहः |
| धनुः | वृश्चिकः | तुला | कन्या |

उत्तरा

वायवी पश्चिमा नैर्ऋती

1.2.5 लक्षणानि

बहूनि लक्षणान्युक्तानि ।

बिभ्राणो मङ्गलद्रव्यं पृच्छको याति मङ्गलम् ।
रिक्तपाणिरमङ्गल्यद्रव्यभृच्छाशुभं व्रजेत् ॥ 2-130

वीणावेणुमृदङ्गशङ्खपटहध्वानं च भेरीरवं
गीतं मङ्गलमङ्गनां च गणिकां दध्यक्षतेक्ष्वादिकम् ।
दूर्वाचन्दनपूर्णकुम्भकुसुमं मालां फलं कन्यकां
घण्टां दीपसरोरुहे च शुभदं विद्यान्निमित्तं बुधः ॥ 2-155

प्रश्नसमये श्रुतानि वचांसि, दृष्टानि दृश्यानि, अनुयोज्यानि चेत् कार्यसिद्धिर्भवति । एतदुदाह्रियते । विवाहप्रश्नसमये विवाहयात्रा यदि दृश्यते, कार्यसिध्दिर्भवति । तत्समये यदि नूतनवस्त्रादि दृश्यते, शुभफलं वाच्यम् । यदि दम्पत्योर्वियोगवार्ता श्रूयते कार्यसिद्धिर्न भवति । एवं युक्तियुक्तानि फलानि वक्तव्यानि । सन्तानप्रश्नसमये शिशूनां कटकादीनां घटिकापुस्तकादि–विद्याभ्याससाधनानां च दर्शनं शुभं ददाति । एवं सर्वदा अवलोकनीयम् ।

पृच्छाकाले, वीणावेणुमृदङ्गशङ्खपटहध्वनिः, भेरीरवः, गीतं, मङ्गल वस्तूनि, गणिका, दध्यक्षतेक्ष्वादिकं, दूर्वाचन्दनपूर्णकुम्भकुसुमानि, माला, फलं कन्यका, घण्टा, दीपः, पद्मं, इत्यादीनि शुभप्रदानि । एवं अशुभलक्षणान्यपि कथितानि ।

| |
|---|
| आरूढराशिः कथं ज्ञायते ? |

**एकाङ्कप्रश्नाः**

1. ज्योतिःशास्त्रस्कन्धत्रयं किम्?
2. प्रश्नशास्त्रं कस्मिन् स्कन्धे अन्तर्गतम्?
3. पञ्चसिद्धान्ताः के?
4. वेदस्य षडङ्गानि कानि?
5. कृत्तिकानक्षत्रे प्रश्नक्रिया शुभप्रदा । किमेतत् सत्यम्?
6. स्थिरकरणानि कानि?
7. गण्डान्ताः के?
8. सोमबुधगुरुशुक्रवारेषु कस्मिन् भागे वायुसञ्चारः शुभप्रदः?
9. पापग्रहाणां वारेषु कस्मिन् भागे वायुसञ्चारः शुभप्रदः?
10. इडानाडी का?
11. रन्ध्रनवकस्पर्शः दोषकरः । किमेतत् सत्यम्?
12. योनयः काः?
13. आरूढराशिः कः?
14. नैऋतदिक्स्थराशिः कः?
15. उत्तरदिक्स्थौ राशी कौ?
16. पृच्छकाश्रितदिक्षु विशेषफलदाः काः?
17. स्त्रीविषयप्रश्ने पृच्छकाश्रितदिक्षु विशेषफलदाः काः?
18. पवर्गाधिपः कः?

19. कीदृशः पृच्छकः सुखमाप्नोति?
20. पवगाधपः कः?

**उत्तराणि**

1. सिद्धान्तः, होरा संहिता इति स्कन्धत्रयम् ।
2. होरायाम् ।
3. सौरवासिष्ठरौमकपौलिशपैतामहाः पञ्च सिद्धान्ताः ।
4. शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्योतिषं, कल्पः इति षडङ्गानि
5. न ।
6. शुकुनिचतुष्पदनागकिंस्तुध्नसंज्ञकानि ।
7. आश्लेषाज्येष्ठारेवतीनामन्त्याः पादाः, अश्विनीमघामूलानां आद्याः पादाश्च ।
8. वामभागे ।
9. दक्षिणभागे ।
10. वामा नाडी इडासंज्ञा ।
11. सत्यम् ।
12. ध्वजधूमसिंहशुनकवृषखरगजकाकाः ।
13. पृच्छकाश्रितराशिः ।
14. कन्या ।
15. मकरकुम्भौ ।
16. प्राची, अवाची, उदीची च ।
17. कोणदिशः ।
18. कुजः ।
19. मङ्गलद्रव्यं बिभ्राणः ।
20. शनिः ।

**पञ्चाङ्काः प्रश्नाः**

1. दैवज्ञलक्षणं कथयत । कः जातकं जानाति?
2. दिग्योनिं विशदयत । केष्वङ्गेषु ताः स्थिताः?
3. अक्षराणां अधिपाः के ? उदाहरणं लिखत ।
4. श्वासस्य पञ्चभूतात्मकत्वं कथं ज्ञायते?
5. गर्भप्रश्ने वायुसञ्चारः कथं उपयुज्यते?
6. फलनिर्देशक्रमं विशदयत ।

**दशाङ्कप्रश्नाः**

1. कीदृशः कालः प्रश्ने अशुभफलं ददाति?
2. प्रश्ने यदुच्यते, यच्च श्रूयते, यच्च दृश्यते तत्सादृश्येन सकलं प्रष्टुर्वाच्या शुभाशुभा । एतत् विशदीक्रिथताम् ।
3. पृच्छकाश्रितदिशः किं सूचयन्ति?
4. जातकप्रश्नयोः प्रयोजनं किम्?
5. प्रश्नयोग्यदेशः कः?

**विंशत्यङ्कौ प्रश्नौ**

1. प्रश्नक्रियां संक्षेपेण कथयत ।
2. आदित्यादिग्रहाणां पृच्छकाश्रितराशिवशात् फलानि कथयत ।

# द्वितीयो विभागः

## (तृतीयचतुर्थपञ्चमाध्यायाः)

तृतीयोऽध्यायः

2.3.0 अवतरणिका

अस्मिन्नध्याये दैवज्ञस्य स्वगृहनिर्गमसमये तेन दृष्टानि लक्षणानि, तेषां निरूपणं चोक्तानि । पृच्छासमयोक्तानि सर्वाण्यपि निमित्तान्यत्र योज्यानि । "आगच्छ, तिष्ठ, मा गच्छ" इत्यादिवचनानि दोषसूचकानि । पाषाणादिषु पादस्खलनमित्यादीन्यशुभसूचकानि । सूर्यस्थितिवशात् निमित्तानां निरूपणं कृतम् । पृच्छकगृहप्रवेशसमये दृष्टानां लक्षणानि तेषां फलानि चोक्तानि ।

2.3.1 उद्देश्यानि

- निर्गमसमये दृष्टानां लक्षणानां फलानि
- निमित्तवशात् फलकथनरीतिः

2.3.2 निर्गमसमये दृष्टानि लक्षणानि तत्फलानि च

पृच्छासमये उक्तानि सर्वाण्यपि अत्र योज्यानि । यात्रासमये वस्त्र करस्थच्छत्रादीनि यदि भूमौ निपतन्ति, तदा दोषः सूचितः । आगच्छ, तिष्ठ, मा गच्छ इत्यादीनि वचनानि न शुभप्रदानि । पाषाणादिषु पादस्खलनं च दोषकरम् ।

2.3.3 मध्येमार्गं दृष्टानि लक्षणानि तत्फलानि च

अन्यजन्मान्तरकृतं पुंसां कर्म शुभाशुभम् ।
यत्तस्य शकुनः पाकं निवेदयति पृच्छताम् ॥ 3.6

पृच्छकेन पूर्वजन्मसु कृतानां शुभाशुभकर्मणां फलानि शकुनरूपेण दृश्यन्ते । एकेन दृष्टस्य शकुनस्य फलं तेनैव अनुभूयते । सैन्यगमनसमये दृष्टस्य शकुनस्य फलं राज्ञा अनुभूयते । राजधान्यां

दृष्टं शकुनं पुरदेवतां बाधते । गणेन दृष्टस्य शकुनस्य फलं जात्या विद्यया वयसा च अधिकेन अनुभूयते ।

उदयादारभ्य रविः पूर्वाद्यष्टासु दिक्षु दिवानिशं प्रतिदिशं सार्धसप्तनाडीकालेन सञ्चरति । एवं उदयादारभ्य सार्धसप्तनाडिकाकाले पूर्वस्यां दिशि स्थितः। एवं सर्वासु दिक्षु ज्ञातव्यम् । रविमुक्तदिशः अङ्गारः इति संज्ञा । रव्याश्रितदिशः दीप्ता इति । रव्यैष्यदिशः धूमिनी इति च संज्ञा । इतरदिशां शान्ता इति संज्ञाः । अङ्गारदिशि दृष्टनिमित्तं भूतकालफलं सूचयति । दीप्तायां वर्तमानफलं, धूमिन्यां भाविफलं चेत्यवगन्तव्यम् । अङ्गारादिदिशां पञ्चमदिशामपि त्रैकाल्यफलं तुल्यमिति उक्तम् ।

आरभ्य स्वोदयादर्कः पूर्वाद्यष्टासु दिक्ष्वपि ।
सञ्चरत्यर्धसंयुक्ताः सप्तनाडीर्दिवानिशम् ॥ 3.10

मुक्तप्राप्तैष्यसूर्यासु फलं दिक्षु तथाविधम् ।
अङ्गारदीप्तधूमिन्यस्ताश्च शान्तास्ततोऽपराः ॥ 3.11

पूर्वादिषु दिक्षु राजा, कुमारः, सेनानी, दूतः, श्रेष्ठपुरुषः, चारः, द्विजः, गजाधिपः एते कल्प्यन्ताम् । पूर्वादिचतुर्दिक्षु आग्नेयादिकोण–दिक्षु क्षत्रियः, वैश्यः, शूद्रः, ब्राह्मणश्च कल्प्यन्ताम् । यस्यां दिशि शकुनं दृष्टं, नामानुसृत्य तत्सूचितदोषो वक्तव्यः ।

कार्पासौषधकृष्णधान्यलवणं जालादिहिंसार्थकं ।
भस्माङ्गारमयश्च तक्रमुरगं पूतिं च विट्छर्दिते ।
भ्रान्तापन्नजडान्धमूकबधिरक्लीबाश्च संन्यासिनो
यद्यद्दृङ्मनसोरनिष्टमखिलं कष्टं निमित्तं विदुः ॥ 3.17
पयश्छेदो हि मार्जारगोधानकुलवानरैः ।
सर्षपेन्धनपाषाणतृणानीतिश्च दोषकृत् ॥ 3.18

आमं मांसमथासवं मधुघृते धौतांशुकालेपनं
रत्नेभद्विजवाजिनश्च नृपतिः संवर्धमानं नरम् ।
देवं पाण्डुरचामरं सुमधुरस्निग्धान्नपाने शवं
विप्रौ च ज्वलदग्निमत्र शुभदं विद्यान्निमित्तं बुधः ॥ 3.19

आतुरस्य गृहे यस्य भिद्यन्ते वा पतन्ति वा
अतिमात्रममत्राणि दुर्लभं तस्य जीवितम् ॥ 3.36

निवाते दीपनाशः स्यान्मन्दिरे यस्य रोगिणः ।
स न जीवति चुल्यादौ चाग्निनाशः सतीन्धने ॥ 3.37

एतानि विविधानि शकुनानि ।

| |
|---|
| कानिचित् शुभनिमित्तानि कथयत । |

## चतुर्थोऽध्यायः

### 2.4.0 अवतरणिका

प्रश्नक्रियायाः प्रारम्भकालः

> "अनासन्ने तु समये मध्याह्नोदययो रवेः ।
> प्रश्नकर्म हि कर्तव्यं सुप्रसन्ने दिवाकरे ॥"

इति वचनेन स्पष्टीकृतम् । दीपलक्षणमप्युक्तम् । ततः चक्रलेखनप्रक्रिया प्रतिपादिता । तामनुसृत्य फलानि कथितानि । तत्समये दृष्टानां निमित्तानां फलानि उक्तानि । ईश्वरध्यानं राशिचक्रपूजा, स्वर्णविन्यासः, वराटिकाविभजनं इत्यादीनि सविस्तरं कथितानि ।

### 2.4.1 उद्देश्यानि

- प्रश्नप्रारम्भः
- दीपलक्षणं चक्रलेखनं, राशिचक्रपूजा, स्वर्णविन्यासः, वराटिकाविभजनं च

### 2.4.2 प्रश्नप्रारम्भः

प्रश्नक्रियायाः प्रारम्भकालः एवं विशदीक्रीयते ।

> अनासन्ने तु समये मध्याह्नोदययो रवेः ।
> प्रश्नकर्म हि कर्तव्यं सुप्रसन्ने दिवाकरे ॥ 4.3

प्रश्नार्थं विविधानि वस्तूनि आनीयन्ते । प्रथमानीतमनुसृत्य फलानि वक्तव्यानि । भस्म न शुभावहम् । अन्येषां युक्तियुक्तानि फलानि वक्तव्यानि । दीपः शुभकरः दीपलक्षणमुक्तम् ।

> वामावर्तो मलिनकिरणः सस्फुलिङ्गोऽल्पमूर्तिः
> क्षिप्रं नाशं व्रजति विमलस्नेहवर्त्यन्वितोऽपि ।

दीपः पापं कथयति फलं शब्दवान् वेपथुश्च
व्यादीर्णार्चिर्विमलमसकृद्यश्च नाशं प्रयाति ॥ 4.6

दीपः संहतमूर्तिरायततनुर्निर्वेपथुर्दीप्तिमान्
निःशब्दो रुचिरः प्रदक्षिणगतिर्वैडूर्यहेमद्युतिः ।
लक्ष्मीं क्षिप्रमभिव्यनक्ति रुचिरां यश्चोच्छिखो दृश्यते
शेषं लक्षणमग्निलक्षणसमं योज्यं यथा युक्तितः ॥ 4.7

वामावर्तः मलिनकिरणः, सस्फुलिङ्गः अल्पमूर्तिः शब्दवान् दीपो दोषकृत् । यः कम्पयुतः व्यादीर्णार्चिः विमलस्नेहवर्त्यन्वितोऽपि असकृत् नाशं व्रजति, स दीपः, दोषं कथयति । संहतमूर्तिः निर्वेपथुर्दीप्तिमान् निःशब्दः रुचिरः प्रदक्षिणगतिः वैडूर्यहेमद्युतिः उच्छिखः दीपः लक्ष्मीं सूचयति । पृच्छकस्य शरीरं स्नेहः सूचयति । वर्तिरात्मानं सूचयति । पात्रं गेहं च । ज्वाला आयुश्च सूचयति । यदि ज्वाला आयता चाञ्चल्यरहिता च आयुर्दैर्घ्यं वक्तव्यम् । अन्यथा विपरीतफलम् । एवमेव वर्तिभाजनादिभिः स्वभाववशात् उचितानि फलानि वक्तव्यानि । पृच्छकस्य सकलशुभाशुभं दीपः सूचयति । कथमिति चेदुच्यते । दीपस्य स्नेहः पृच्छकस्य शरीरमिति कल्प्यताम् । तस्य मानं, मालिन्यं, स्फुटता, तत्स्थपदार्थाः इत्यादीनि उपयुज्य पृच्छकस्य देहस्थौल्यादीनि, रक्तदोषः, प्रकाशः, कृमिपीडनमित्यादीनि च वक्तुं शक्यते । तस्यान्तःस्थिता वर्तिः आत्मा इति संकल्पः । तस्य अवस्थामनुसृत्य आत्मनः स्थितिर्भवति । वर्तिरेका अन्यामाश्रित्य स्थिता चेत् प्राणापानादीनामावरणमस्तीति वक्तव्यम् । यदि वर्तिर्मलिना भवति, तदा पृच्छकस्य बुद्धिमान्द्यं वक्तव्यम् । दीपस्य ज्वाला आयुः सूचयति । तस्य दैर्घ्यमनुसृत्य आयुर्दैर्घ्यं वक्तव्यम् । यदि सा स्फुटा भवति पृच्छकस्य देहसौख्यं, अन्यथा विपरीतफलं च वक्तव्यम् । दीपपात्रं गृहं सूचयति । यदि तत् बृहत्, शुद्धं, दोषहीनं च चेत् गृहमपि तद्वदिति ज्ञेयम् । यदि मृदुवायुः तं स्पृशति तदा

बन्धुसहायो वाच्यः । 'स्नेहः' पुण्यपापकर्म सूचयति इति केचित् । स्नेहस्थित्या युक्तियुक्तानि फलानि कथितव्यानि ।

शुद्धतण्डुलसंपूर्णप्रस्थदीपाद्यलङ्कृते ।
समे सुमृष्टसंसिक्ते चक्रं लिखतु भूतले ॥ 4.11

एतन्नियममनुसृत्य प्रश्नक्रियायोग्यदेशः स्वीक्रियते ।

ततः परं चक्रलेखनं कर्तव्यम् । तदर्थं

हस्तप्रमाणे चतुरश्रखण्डे
षडङ्गुलांशैर्विभजेद्दलानि ।
चतुर्दलं पद्ममिहास्तु मध्ये
चतुर्भिरन्यान्यजपूर्वजानि ॥ 4.12

मेषाद्यराशयः स्वस्वस्थाने संश्रितभे ग्रहाः ।
परिवारतया पूज्या गुलिकश्च सनामभिः ॥ 4.34

आदौ हस्तप्रमाणं चतुरश्रं विलिख्य षडङ्गुलप्रमाणयुतैः षोडशिभिः खण्डैः तत् विभज्यते । मध्यस्थैः चतुर्भिश्चतुरश्रखण्डैः चतुर्दलपद्मं निर्मीयते । अन्यानि चतुरश्रखण्डानि मेषादीन् राशीन् सूचयन्ति । ततः राशिचक्रपूजा च कार्या । चक्रलेखनं भस्मना न कर्तव्यम् । तथापि भस्म एव प्रायेण उपयुज्यते । चक्रलेखनं प्रदक्षिणतया कार्यम् । यदि चक्रलेखनं क्वचिदनुलोमं क्वचित्प्रतिलोमं च भवति, विघ्नः सूचितः । स्थूलरेखा सुखं सूचयति । सूक्ष्मरेखा दुःखप्रदायिनी । रेखाच्छेदः सुखकार्यविघातं करोति । आद्यरेखा उदीच्यां चेत् पृच्छकस्य धनलाभः सूचितः । प्रतीच्यां चेत् रोगवर्धनम् । पूर्वस्यां चेत् सन्ततिलाभः । दक्षिणा दिक् मृतिकरी ।

चक्रलेखनानन्तरं, तं दक्षिणतो कृत्वा, प्राङ्मुखः सन् आसने आसीनो दैवज्ञः अष्टोत्तरशतं वराटिका निधाय मन्त्रं जपित्वा जलं प्रोक्ष्य चन्दनं, पुष्पाणि, अक्षताः इत्यादिभिः अलङ्कृत्य दक्षिणामूर्ति

आवाह्य अर्चयेत् । वराटिकाः फलके स्थिताः । पूर्वस्यां रविं, आग्नेय्यां कुजं, दक्षिणस्यां गुरुं, नैऋRत्यां बुधं वारुण्यां शुक्रं, वायव्यां शनिं उत्तरस्यां चन्द्रं ऐशान्यां राहुं च पूजयित्वा वराटिकाः हस्तेन स्पृशन् गुरूपदिष्टान् मन्त्रान् जपेत् । ततः पृच्छकार्थं संकल्पः क्रियते ।

चन्दनभूषितं स्वर्णखण्डं जलेन प्रक्षाल्य कुसुमाक्षतैः संयोजयेत् । एतत् वामहस्ते निधाय पूजादीनि कृत्वा स्वर्णविन्यासं काङ्क्षन्तं 'न्यसेः' इति निर्दिशेत् । ततः स स्वर्णविन्यासं करोति । स्वर्णं यस्मिन् राशौ न्यस्यते स एव आरूढसंज्ञकः । स्वर्णस्य अधोमुखादिस्थितिं प्लवं च ज्ञात्वा किंचित् फलकथनं कर्तव्यम् । ततः पूजां समाप्य, वराटिकाः त्रिधा विभज्य वाममध्यदक्षिणभागेषु न्यसेत् । वराटिका अष्टशः प्रतिखण्डं संशोध्य शिष्टा एव अन्ते निक्षिप्यन्ते । शिष्टसंख्या ०,१,२,३,४,५,६,७ वा भवति । तथापि शून्यस्य फलं नोक्तम्, अष्टानामेव । शिष्टवराटिकानां संख्या ४, १२, २० वा भवति । ताम्बूलसंख्यामुपयुज्य फलं किञ्चित् कथनीयमितिं संप्रदायः । गुरुमन्दयोः स्थितिमुपयुज्यापि फलं वक्तुं शक्यते । किञ्चित्फलकथनानन्तरं उदयलग्नानयनादि कर्म कुर्वन् दैवज्ञः प्रकृतमनुसरति ।

| चक्रलेखनं कथं क्रियते ? |
|---|
| |

पञ्चमोऽध्यायः

2.5.0 अवतरणिका

लग्नानयनादीनि अत्रोक्तानि । प्राचीनरीतिरुक्ता । आदौ दिनगतनाडिकानयनं कथितम् । छायां प्रमाय तद्वाक्यमुपयुज्य दिनगतनाडिकाः (उद्दिष्टसमये) निर्णीताः । ततः लग्नस्फुटानयनं कथितम् । ततः कुन्दक्रियया नाडिकाः संस्कृताः । परहितचन्द्रात् दृक्चन्द्रमानेतुं मान्दिस्फुटं प्राप्तुं च मार्गौ कथितौ । अन्ते सूर्येन्दुराहुचक्रं विवृणोति । परहितसिद्धान्तस्य अपर्याप्ततां दृग्गणितस्य सूक्ष्मतां प्रत्यक्षतुल्यतां प्रश्नक्रियायां तेषां प्राधान्यं चाह ।

2.5.1 उद्देश्यानि्

- लग्नानयनम्
- कुन्दक्रिया
- मान्दिस्फुटानयनम्
- दृक्चन्द्रानयनम्
- परहितगणितस्य अपर्याप्तता, दृग्गणितस्य प्राधान्यम्

2.5.2 लग्नानयनम् कुन्दक्रिया, आरूढलग्नं च

तन्त्रे सुपरिज्ञाते लग्ने च्छायाम्बुयन्त्रसंविदिते
होरार्थे च सुरूढे नादेष्टुर्भारती वन्ध्या ॥ 5.2

इति वचनात् स्फुटलग्नायनस्य प्राधान्यं ज्ञायते ।

दैवज्ञः सूर्यसिद्धान्तादितन्त्रेषु सम्यग् ज्ञानं प्राप्य, होरास्कन्धस्य अर्थं यथाविधि जानातु । लग्नं च छायाम्बुयन्त्रैः सूक्ष्मनिरीक्षणेन निर्णयतु । एवं चेत् दैवज्ञस्य वाणी न मिथ्या भवति । तदर्थं आदौ लग्नानयनमाह । आदौ शङ्कुच्छायया दिनगतनाडिकाविनाडिकाः गणनीयाः । तदर्थं इष्टकाले शङ्कुच्छायामानं ज्ञात्वा, छायावाक्येषु निकटतमं पूर्ववाक्यं संशोध्य शिष्टं अङ्गुलीकृत्य षष्ट्या हत्वा पार्श्ववाक्यभेदमङ्गुलीकृत्य प्राप्तया संख्यया ¶त्वा विनाडिका : लभ्यन्ते ।

एताः पूर्वमुपयुक्तवाक्यनाडिकाभ्यः संशोध्य नाडिकाविनाडिकाः लभ्यन्ते । एतदुदाह्रियते । कन्यामासे शङ्कुच्छाया १० पादाः ३ अङ्गुलानि भवतु । निकटतमं पादवाक्यं “दिनकृति कन्याझषगे” इति । अत्र षष्ठं वाक्यं ९ पादाः १ अङ्गुलम् । १० – ३ – (९ – १) = १ – २ एतत् अङ्गुलीकृत्य १० लभ्यते । पूर्वमुक्तप्रकारेण त्रैराशिकक्रियां कृत्वा फलं लभ्यते तदर्थं, १० × ६० = ६००, वाक्ययोरन्तरं राज्य – युद्ध = १२ – ५–९=२–७ = २३ अङ्गुलानि । $\frac{६००}{२३}$ = २६. विनाडिकाः । ६ – ० – (० – २६) = ५ – ३४

कालः मध्याह्नात् पूर्वं चेत्, गतनाडिकाविनाडिकाः लभ्यन्ते । मध्याह्नात्पश्चात् चेत् सूर्यास्तमयात् प्राक् गन्तव्यकालः लभ्यते । तं अहर्मानात् संशोध्य गतकालः प्राप्यते ।

ततः तत्कालसूर्यस्फुटात् राशिं त्यक्त्वा शिष्टं त्रिंशद्भागेभ्यः संशोध्य शिष्टं लिप्तीकृत्य त्रैराशिकक्रियया सूर्याश्रितराशौ सूर्योदयादारभ्य गतनाडिकाविनाडिकाः प्राप्याः । ताः दिनगतनाडिकविनाडिकाभ्यः संशोधयेत् । ततः क्रमेण राशिप्रमाणानि दिनगतनाडिकासूचितराशेः पूर्वराशिपर्यन्तं शोध्यानि । शिष्टं लग्नराशौ गतनाडिकाविनाडिकाः । त्रैराशिकक्रियया भागाः कलाश्च ज्ञेयाः । लग्नराशौ गताः ताः । एवं लग्नस्पुटं ज्ञायते । एतत् स्थूलमेव, सूक्ष्मतराः मार्गाः सन्ति ।

लग्नस्फुटं कुन्द इत्यक्षरसंख्यासूचितया एकाशीत्या हत्वा मण्डलशोधनं कृत्वा यच्छिष्यते तत् पृच्छकनक्षत्रं सूचयति चेत् लग्नस्फुटं सूक्ष्ममिति ज्ञायते । अनुजन्मत्रिजन्मनक्षत्रेऽपि पर्याप्ते । अथवा लग्नस्फुटस्य लिप्तां यथावश्यं अधिकां न्यूनां वा कृत्वा जन्मनक्षत्रानुजन्मत्रिज्मनक्षत्रेंष्वखेन तुल्यां कर्तुं श्रमः कुर्यात् ।

आदौ लग्नस्फुटात् तस्य भं त्यजेत् । ततः आरूढभे कला भागाश्च निक्षिपेत् । आरूढस्फुटं भवति । अत्र उदाहरणं कथ्यते । उदयलग्नं २रा ५° २५' भवतु । उदयलग्नस्य भं त्यक्त्वा ५° २५'

लभ्यते । आरूढस्य गतराशिः ४ चेत् तेन योजयित्वा आरूढस्फुटं ४$^{रा}$ ५° २५' भवति ।

### 2.5.3 दृक्चन्द्रानयनम्

परहितसिध्दान्तः प्राचीनः । आर्यभटसिद्धान्तस्य परिष्करणार्थं प्रतिपादितः । परहितस्य सूक्ष्मतापि कालक्रमेण नष्टा । तत्परिहारार्थं दृग्गणितं प्रतिपादितम् । अत्र परहितचन्द्रात् दृक्सिद्धचन्द्रस्फुटं आनेतुं मार्गः कथितः । चन्द्रस्य परहितस्पुटेन 'वीर' (२४) कलां संयोजयेत् । ततः कन्यामीनमासयोः दशमदिनात् का (२) ल (३) भी (४) म (५) ति (६) शो (५) भा (४) गा (३) य (१) कलाः दश दश दिनानां पूर्वलब्धस्फुटात् शोधयेत् । धनुर्मिथुनयोर्दशमदिनादारभ्य दश दश दिनानां पूर्वलब्धस्फुटैः एताः कलाः संयोजयेत् । एवं कृत्वा दृक्स्फुटं प्राप्यते । 'वीर' कलाः, ८२५–तमे कोलम्बाब्दे । ततः परं प्रतिसप्तचत्वारिंशद्वर्षं एका कला संयोज्या ।

> यदा यश्चैव सिद्धान्तो गणिते दृक्समो भवेत् ।
> तदा तेनैव संसाध्यं जातकं गणयेद् बुधः ॥ 5.31

इति वचनमत्रानुसन्धेयम् ।

### 2.5.4 मान्दिस्फुटानयनम्

गुलिककालरविस्फुटेन दृगयनं गुलिकोदयनाडिकाश्च संयोज्य दिशमनुसृत्य चरज्यया संस्कृत्य त्रिभि¶Rत्वा दिनरात्रिप्रमाणयोः भेदः विनाडिकारूपेण लभ्यते । गुलिकनाडिकाः एताभिर्विनाडिकाभिः हत्वा त्रिंशता (नीलेन) ¶त्वा यल्लभ्यते तेन गुलिकनाडिकाः संस्कार्याः । सायनार्कस्य मेषतुलादिनी अनुसृत्य एतत् धनं ऋणं वा भवति । एवं गुलिकोदयसमयः प्राप्तः । तत्समयलग्नस्फुटं मान्दिस्फुटं भवति । लग्नेन्दुमान्दिसंयोग एव त्रिस्फुटसंज्ञः ।

2.5.5 सूर्येन्दुराहुचक्रम्

सूर्योदयादारभ्य रविः सार्धेन नाडीद्वयेन राशिमेकं भुञ्जानो गच्छति । धनूराशेरारभ्य वृश्चिकतुलादिषु व्युत्क्रमेण संचरति । आदौ सार्धनाडीद्वयकाले धनुषि, ततः वृश्चिके इत्यवगन्तव्यम् । चन्द्रः रवेः सप्तमे वर्तते । राहुः सार्धघटिकाद्वयेन राशिमेकं भुञ्जानः मकरसिंहकर्कटमेषवृश्चिकतुलाकर्कटकुम्भमकरतुलावृषमेषेषु व्युत्क्रमेण संचरति । आदौ मकरस्य अन्त्ये स्थितः सार्धघटिकाद्वयेन मृगस्याद्यं प्राप्नोति । एवमन्यराशीनामपि ।

एतेषां गणनरीतिरत्रोच्यते । दिनगतनाडिकाः आमयेन (१५०) ¶त्वा राशिर्लभ्यते । शिष्टात् भागाः कलाश्च ज्ञेयाः । अष्टराशेः आमयहरणानीतस्फुटस्य राशिं संशोध्य भागाः कलाश्च योजचित्वा सूर्यस्फुटं प्राप्यते । षड् राशीन् योजयित्वा चन्द्रस्फुटं लभ्यते । आमयहरणानीतस्फुटस्य कियन्तो राशयः मृगमृगेन्द्रादिक्रमे तावद्राशेः द्वितीयराशेः भागाः कलाश्च संशोध्य राहुस्फुटं प्राप्यते । राशिरेकश्चेत् सिंहान्तभूताःपञ्चराशयः, राशिर्न चेत् मृगान्तभूताःदशराशयः द्वौ राशी चेत् कर्कटान्तभूताः चत्वारो राशय इति अवगम्येत । तस्मात् आमयहरणानीतस्फुटस्य भागाः कलाश्च संशोध्य राहुस्फुटं च लभ्यते ।

| |
|---|
| आरूढलग्नं कथं ज्ञायते ? |

**एकाङ्कप्रश्नाः**

1. शकुनं पूर्वदिशि चेत् कीदृशः समागमो भवति?
2. शकुनं दक्षिणस्यां चेत् कीदृशः समागमो भवति?
3. रविमुक्तराशेः किं नाम?
4. शयनासनयानानां कीदृशं दर्शनं दोषकरम्?
5. पात्रादीनां कीदृशं दर्शनं दोषकरम्?
6. वामावर्तो दीपः शुभकरः । किमेतत् सत्यम्?
7. आयततनुर्दीपः शुभकरः । किमेतत् सत्यम्?
8. राशिचक्रलेखनं कुत्र कार्यम्?
9. राशिचक्रस्य रेखा स्थूला चेत् किं फलम्?
10. राशिचक्रस्य रेखा सूक्ष्मा चेत् किं फलम्?
11. राशिचक्ररेखाच्छेदः किं सूचयति?
12. कः स्वर्णविन्यासं करोति?
13. स्वर्णाश्रितस्य राशेः किं नाम?
14. वराटिका कथं विभज्यते ।
15. का वराटिकासंख्या?
16. कस्यां दिशि रविः पूज्यते?
17. कस्यां दिशि बुधः पूज्यते?
18. दिनगतनाडिकाः कथं स्फुटीक्रियन्ते?
19. त्रिस्फुटं किम्?
20. चतुःस्फुटं किम्?

**उत्तराणि**

1. राजक्षत्रिययोः ।
2. सेनापतिशूद्रयोः ।
3. दीप्तः ।
4. ऊर्ध्वमुखम् ।
5. अधोमुखम् ।
6. न ।

7. सत्यम् ।
8. शुद्धतण्डुसंपूर्णप्रस्थदीपाद्यलङ्कृते सुमृष्टसंसिक्ते समे भूतले ।
9. सुखम् ।
10. दुःखम् ।
11. सुखकार्यविघातम् ।
12. कन्या, कुमारो, ज्योतिःशास्त्रज्ञानरहितः अन्यः पुरुषो वा ।
13. आरूढलग्नम् ।
14. त्रिभिः खण्डैः
15. अष्टोत्तरशतम् ।
16. प्राच्याम् ।
17. नैऋत्याम् ।
18. कुन्दक्रियया ।
19. लग्नेन्दुमान्दिसंयोगः ।
20. लग्नेन्दुमान्दिराहुयोगः ।

**पञ्चाङ्काः प्रश्नाः**

1. निर्गमनसमये दुर्निमित्तानि कानि?
2. चकलेखनकार्यं विशदयत ।
3. कीदृशं स्वर्णं विन्यस्यते?
4. आरूढस्फुटं कथं ज्ञायते?
5. 'नादेष्टुर्भारती बन्ध्या' । कथम्?
6. कुन्दक्रियां विशदयत ।

**दशाङ्काः प्रश्नाः**

1. अङ्गारदीप्तधूमिनीशान्ता दिशः काः । कथयत ।
2. वराटिकाविन्यासक्रमं विशदयत ।
3. स्वर्णविन्यासानन्तरं किं करणीयम्?
4. दीपसामान्यलक्षणं कथयत ।
5. परहितचन्द्रात् कथं दृक्चन्द्रः लभ्यते?

**विंशत्यङ्कौ प्रश्नौ**

1. 'शेषं लक्षणमग्निलक्षणसमं योज्यं यथा युक्तितः' इति दीपलक्षणे कथितम् । कथं एवं क्रियते?

2. लग्नानयनं विशदयत ।

# तृतीयो विभागः

## षष्ठाध्यायः सप्तमाध्यायश्च

### षष्ठोऽध्यायः

### 3.6.0 अवतरणिका

अस्मिन्नध्याये सूत्राणि निरूप्यन्ते । सूत्राणि सन्ति बहूनि । तथापि पञ्च एवात्र निरूपितानि । सूत्रं जीवरोगमृतिभेदात् त्रिविधम् । आरूढोदयलग्नाभ्यां सामान्यसूत्रं चिन्त्यम् । तदीशाभ्यामधिपतिसूत्रम् । लग्नांशारूढाभ्यां अंशकसूत्रम् । लग्नोडुपृच्छकोडुभ्यां नक्षत्रसूत्रम् । आरूढतस्तद्दशमतो महासूत्रम् । एतानि क्रमेण पृथिव्यप्तेजो–वाय्वाकाशात्मकानि । बुधशुक्रकुजमन्दगुरवो एतेषां देवताः । विस्तरतः फलान्युक्तानि ।

लग्नेन्दुमान्दिसंयोगेन त्रिस्फुटं लभ्यते । त्रिस्फुटं कर्कटवृश्चिकमीनस्थितं दोषकृत् । राशावपि उत्तरोत्तरं दोषाधिक्यं कर्कटवृश्चिकमीनानां क्रमेण दोषाधिक्यमित्यवगन्तव्यम् ।

### 3.6.1 उद्देश्यानि

- पञ्चसूत्राणि ।
- त्रिस्फुटम् ।

### 3.6.2 सूत्राणि तत्फलानि च (पञ्च सूत्राण्यत्र निरूपितानि ।)

आरूढोदयलग्नाभ्यां सूत्रं सामान्यसंज्ञितम् ।
तदीशाभ्यां तु यच्चिन्त्यं तत्स्यादधिपसंज्ञकम् ॥ 6-1

लग्नांशारूढराशिभ्यां सूत्रमंशकसंज्ञितम् ।
लग्नोडुपृच्छकोडुभ्यां चिन्त्यं नक्षत्रसंज्ञितम् ॥ 6-2

आरूढतद्दशमतो महासूत्रं विचिन्तयेत् ।
पृथ्वी सामन्यसूत्रं स्यादापस्त्वधिपसंज्ञितः ॥ 6-3

तेजस्त्वंशकसूत्रं स्यादुडुसूत्रं तु मारुतः ।
आकाशस्तु महासूत्रमित्येतत् सूत्रपञ्चकम् ॥ 6-4

चरे चरस्थिरद्वन्द्वाः स्थिरे द्वन्द्वचरस्थिराः ।
द्वन्द्वे स्थिरोभयचरा जीवो रोगो मृतिः क्रमात् ॥ 6-9
आरूढस्य च लग्नस्य पत्योरैक्ये च सौ¶दे ।
जीवसूत्रं विजानीयात् समत्वे रोगदं भवेत् ॥ 6-10

तयोः शात्रवभावे तु सूत्रं तु मरणप्रदम् ।
गणयेल्लग्ननक्षत्रादारभ्य प्रष्टृजन्मभम् ॥ 6-11

त्रिभिस्तां विभजेत्संख्यामेकशेषे तु जीवकृत् ।
द्विशेषे रोगदं सूत्रं निःशेषे मरणप्रदम् ॥ 6-12

आरूढतद्दशमयोर्द्वितयं चन्द्रराशिगम् ।
यदि जीवनदं सूत्रं द्वयं चेत्सूर्यराशिगम् ॥ 6-13

मृत्युसूत्रं तदा ज्ञेयं यदा तु पुनरेतयोः ।
एकं चान्द्रं परं सौरं रोगसूत्रं तदा भवेत् ॥ 6-14

आयुर्वीर्यं धनमपि तथा वर्धते जीवसूत्रे
रुक्सूत्रं चेद्धनहितमनोभङ्गदेहप्रपीडाः ।
भीरुग्वृद्धिर्दिनमनुमनःकर्मभङ्गोऽन्त्यसूत्रे
प्रष्टुर्वाच्यं फलमिति दृढं सर्वपृच्छासु सूत्रैः ॥ 6-15

सामान्यसूत्रं, अधिपतिसूत्रं, अंशकसूत्रं, नक्षत्रसूत्रं, महासूत्रमिति पञ्च सूत्राणि । आरूढोदयराशिभ्यां , सामान्यसूत्रं चिन्त्यम् । तौ चरौ चेत् जीवसूत्रं एकश्चरः अपरः स्थिरचेत् रोगसूत्रं,

एकश्चरः अपर उभयराशिश्चेन्मृतिसूत्रम् । द्वावपि उभयराशी चेद्रोगसूत्रम् । एतस्य बुधो देवता ।

अधिपतिसूत्रं उदयारूढयोरधिपाभ्यां चिन्त्यम् । तौ मिथः सु¶दौ चेत् जीवसूत्रम् । समौ चेद् रोगसूत्रम् । शत्रू चेन्मृतिसूत्रम् । तयोरेकः अपरस्य मित्रं अपरः तस्य समश्चेत् जीवसूत्रम् । एकोऽपरस्य मित्रं अपरः तस्य शत्रुश्चेद्रोगसूत्रम् । एकाधिपत्येऽपि जीवसूत्रम् । एतस्य शुक्रो देवता ।

लग्नांशारूढयोरंशकसूत्रं चिन्त्यम् । जीवादिभेदाः सामान्यसूत्रवत् । कुजदेवताकमिदम् ।

लग्ननक्षत्रपृच्छकनक्षत्रयोर्नक्षत्रसूत्रं चिन्त्यम् । लग्ननक्षत्रादारभ्य पृच्छकनक्षत्रपर्यन्तं गणयेत् । त्रिभि¶Rत्वा शिष्टमेकं चेद् जीवसूत्रं, द्वे चेद्रोगसूत्रं, शून्यं चेन्मृतिसूत्रम् । शनिरस्य देवता ।

आरूढतः तद्दशमतश्च महासूत्रं चिन्त्यम् । द्वावपि चन्द्रराशी चेज्जीवसूत्रम् । द्वावपि सूर्यराशी चेन्मृतिसूत्रम् । एकश्चन्द्रराशिः अपरः सूर्यराशिश्चेत् रोगसूत्रम् । गुरुरस्य देवता ।

सामान्यसूत्रं पृथिवीभूतात्मकम् । एवं मांसास्थित्वक्सिरारोमरोगान् सूचयति । जलभूतात्मकं अधिपतिसूत्रं स्वेदासृङ्मूत्रशुक्लास्यतोयसंबन्धिरोगान् सूचयति । तैजसात्मकमंशकसूत्रं क्षुत्तृडालस्यनिद्रादेहकान्तिसंबन्धिरोगान् सूचयति । वाय्वात्मकं नक्षत्रसूत्रं अङ्गचलनसंबन्धिरोगान् सूचयति । आकाशभूतात्मकं महासूत्रं द्वेषरागमोहभयसंबन्धिरोगान् सूचयति । सूत्राणि तत्तद्भूतसंसूचितरोगान् सूचयन्ति इति साधरणो नियमः ।

| सूत्रम् | घटके | भूतम् | देवता |
|---|---|---|---|
| सामान्य | उदयारूढलग्ने | पृथीवी | बुधः |
| अधिपति | उदयारूढपौ | जलम् | शुक्रः |
| अंशक | उदयांशारूढौ | तेजः | कुजः |
| नक्षत्र | लग्ननक्षत्रपृच्छक नक्षत्रे | वायुः | मन्दः |
| महा | आरूढलग्न तदृशमभावश्च | आकाशः | गुरुः |

### 3.6.3 त्रिस्फुटं तत्फलानि च

मान्दीन्दुलग्नसंयोगस्य त्रिस्फुटसंज्ञा ।

एतदुदाह्रियते

| | रा | भा | क | |
|---|---|---|---|---|
| त्रिस्फुटम् = | १ – | १ – | २० | (मान्दिस्फुटम्) |
| | २ – | २ – | २५ | (चन्द्रस्फुटम्) |
| | ७ – | १० – | २२ | (लग्नस्फुटम्) |
| | १० – | १४ – | ०७ | |

कुम्भराशिः, शतभिषङ्नक्षत्रम् ।

कुलीरभृङ्गमत्स्येषु दोषदं स्याद्योथोत्तरम् ।
तत्राप्यहीन्द्रपौष्णेषु तथैव त्रिस्फुटं भवेत् ॥ 6-25

इति वचनात् त्रिस्फुटस्य सामान्यफलं चिन्त्यम् ।

मान्दीन्दुलग्नस्फुटसंकलनफलं त्रिस्पुटम् । स्त्रिस्पुटस्थिति-वशात् बहूनि फलानि कथितानि । कर्कटवृश्चिकराशिषु त्रिस्फुटस्थितिः दोषकरीति सामान्यो नियमः । कर्कटापेक्षया वृश्चिके दोषाधिक्यम् । तस्मादपि मीने इत्यवगन्तव्यम् । राशावपि उत्तरोत्तरं दोषाधिक्यम् । यदि त्रिस्फुटं कर्कटान्त्यनवांशे स्थितः अब्देन मृत्युः, वृश्चिकान्त्यनवांशे स्थितः मासेन, मृत्युः, मीनान्त्यनवांशे स्थितः दिनेन मृत्युश्च । यदि

गुलिकः त्रिस्फुटयुक्तः तदा दोषः सूचितः । यदि पृच्छकगृहे तन्नक्षत्रजातोऽस्ति तस्य रोगारिष्टं वाच्यम् । यदि त्रिस्फुटं, "विषोष्णविष्टिगण्डान्तलाटैकार्गलवैधृतगुलिकाहिमस्तकाः" इत्युक्तनवदोषैर्युतश्चेत्, तदा दोषो वाच्यः । सृष्टिखण्डसृष्टिराशिसृष्टिनक्षत्रेषु सृष्टिनवांशें वा स्थितं शुभदृष्टियोगयुतं त्रिस्फुटं शुभकरम् । अश्विन्यादिनवकत्रयाश्रितं त्रिस्फुटं क्रमेण (1) आढ्यब्राह्मणागमनं (2) दरिद्रब्राह्मणागमनं (3) अग्निभयं (4) वस्त्रनाशः (5) रोगव्रण्यागमनं (6) सर्पागमनं (7) ब्राह्मणत्रयागमनं (8) चतुष्पान्नाशः (9) बन्धुसमागमः इत्येतैः मरणं सूचयति । नवांशकेनापि फलानि वक्तुं शक्यते ।

त्रिस्पुटमुपयुज्य उडुदशामानीय फलानि कथितव्यानि । प्रश्नलग्नवशात् अष्टमेशः अष्टमस्थः व्ययाधिपः व्ययस्थः, षष्ठाधिपः, षष्ठस्थः, मूढः, एते दोषप्रदाः । लग्नार्थसुखपञ्चमसप्तमभाग्यदश-मस्थिताः पापाः, गुलिकभवनेशः, तदंशाधिपः, त्रिस्फुटनक्षत्राद् विपत्प्रत्यरवधताराणामीशाः, च दोषप्रदाः । लग्नार्थसुखपञ्चम-सप्तमभाग्यकर्मस्थाः शुभाः, भाग्याद्यभीष्टभावेशाश्च शुभप्रदाः । त्रिस्फुटस्य क्षेत्रहोराद्रेक्काणनवांशद्वादशांशत्रिंशांशैरपि फलानि कथितव्यानि । सूर्यादिग्रहसहितं त्रिस्फुटं विविधान् दोषान् सूचयति । सूर्ययुतश्चेत् जनकस्याशोभनं, चन्द्रयुतश्चेत् मातुरशोभनं इति ग्रहकारकत्वमुपयुज्य फलानि वक्तव्यानि ।

एवं विविधप्रकारैः फलं वक्तुं त्रिस्फुटं उपयुज्यते । तस्य प्राधान्यं एवं व्यक्तं भवति ।

| अंशकसूत्रं लक्षयन् तत्फलानि कथयत । |
|---|

3.7.0 अवतरणिका

अस्मिन्नध्याये अष्टमङ्गलफलान्युच्यन्ते । वराटिकास्त्रिभिः खण्डैर्विभज्य वाममध्यदक्षिणभागेषु निक्षिपति दैवज्ञः । ततः प्रतिखण्डं अष्टशो विभज्य शिष्टवराटिकाः विन्यस्ताः । शिष्टसंख्या ०, १, २, ३, ४, ५, ६, ७ वा भवति । शून्यस्य फलं नोक्तं, अष्टानामेवोक्तम् । आहत्य शिष्टवराटिकासंख्या ४, १२, २० वा भवति । दक्षिणमध्यवामस्थखण्डाः अधोमध्योर्ध्वभागान् सूचयन्ति । युग्मसंख्या चेत्तद्भागे दोषः सूचितः । रविकुजगुरुशुक्रशनिचन्द्रराहवः एकादीनां ग्रहाः । तेषां योनयः ध्वजधूमसिंहशुनकवृषखरगजकाकाः । तेषां जन्तवः गरुडमार्जारसिंहशुनकसर्पमूषिकगजशशाः । ध्वजसिंहौ पृथिवीभूतात्मकौ । गजवृषौ जलभूतात्मकौ । धूमोऽग्निभूतात्मकः । खरो वायुभूतात्मकः । शुनककाकौ आकाशभूतात्मकौ । तेषां फलानि कथितानि । दक्षिणमेकस्थानं मध्यं दशस्थानं वामं शतस्थानमिति प्रकल्प्य संख्या प्राप्यते । तां संख्यां त्रिंशता ¶त्वा शिष्टं तिथिं सूचयति । सप्तविंशत्या ¶त्वा शिष्टं नक्षत्रं सूचयति । द्वादशभि¶Rत्वा राशिः नवभि¶Rत्वा ग्रहः सप्तभि¶Rत्वा वारश्च प्राप्यन्ते । तेषां फलानि उक्तानि ।

3.7.1 उद्देश्यानि

- वराटिकाविमभजनम्, शोधनं च
- अष्टमङ्गलसंख्याः

3.7.2 वराटिकविभजनं, अष्टमङ्गलसंख्याश्च

वराटिकाः त्रिभिः खण्डैः विभज्य प्रतिखण्डं अष्टशः संशोध्य शिष्टाः विन्यस्ताः । तथापि फलकथने शून्यस्य स्थाने ८ एव उपयुज्यते । अष्टमङ्गलसंख्यानां सङ्कलनफलं ४, १२, २० वा भवति । एवं फलानि कथितानि । एकं चेद्रविः द्वे चेत्कुजः, त्रीणि चेद्गुरुः चत्वारि चेद् बुधः, पञ्च चेच्छुक्रः षट् चेत् मन्दः, सप्त चेच्चन्द्रः

अष्टौ चेद्राहुः इति अष्टमङ्गलसंख्यासूचितग्रहाः । रविः आभीष्टकार्यसिद्धिं कीर्तिं जयं राजबहुमतिं सभाजनग्रामसत्कारं च कुरुते । भौमः चोरराजायुधोपद्रवं, अग्निभयं, स्कन्दकोपं भैरवपीडां कलहं ज्वरं रक्तपित्तशिरोनेत्ररोगांश्च ददाति । गुरुः गुरुदैवतविप्राणां प्रसादेन शुभफलानुभवं, दुकूलहेमगजतुरगसुताप्तिं करोति । बुधः शुनकगोमृगेभ्यो भयं विष्णुकोपं विचर्चिकां त्वग्रोगान् सन्निपातं च ददाति । शुक्रः आभरणवस्त्रशय्याप्तिं स्त्रीसुखं मृष्टभोजनं कृषिगोमहिषीलाभं च वितनुते । मन्दः वातशूलरोगं चोरदुर्जनेभ्यो भयं मरणभीतिं दुर्ग्रहाणां पीडनं च कुरुते । पूर्णचन्द्रः वेश्यासौख्यं मनःप्रीतिं सुहृत्स्वजनसंगमं जलोत्पन्नसस्यान्ननारीप्राप्तिं च कुरुते । राहुः कुष्ठपामादिकान् नेत्रपादभवान् च रोगान् ददाति । विषभीतिं नीचानां विरोधं च कुरुते ।

एकादिसंख्यानां ध्वजधूमसिंहशुनकवृषखरगजकाका योनयः । तेषां फलानि अत्र कथ्यन्ते । ध्वजयोनिः आरोग्यसिद्धिं द्रव्यलाभं शत्रुनाशं सन्ततिलाभं च वितनुते । धूमयोनिः मनोदुःखं महाव्याधिं शत्रुपीडां दारिद्र्यं स्थानभयं च सूचयति । सिंहयोनिः आरोग्यं पुत्रलाभं मनःसन्तोषं द्रव्यलाभं ब्राह्मणभूपसंमानं च वितनुते । शुनकयोनिः विप्रवासं भीतिं द्रव्यनाशं रोगं अपमृत्युं विवादं च सूचयति । वृषयोनिः भार्यालाभं पुत्रलाभं धनलाभं सुखं आयुः आरोग्यं च प्रददाति । खरयोनिः शत्रूणामागमनं रोगं स्थाननाशं धनक्षयं कार्यहानिं मनःक्लेशं च कुरुते । गजयोनिः नारीभोगं धनधान्यसमृद्धिं सुहृत्संगमं सुखं भूपालसंमतिं च करोति । काकयोनिः स्थानभ्रंशं सुहृन्नाशं महाभीतिं जीवनाशं शत्रुकृतमृत्युं च सूचयति । अन्यान्यपि फलानि कथ्यन्ते ।

सर्पादयः क्रमान्मध्ये चत्वारो दक्षिणे पुनः ।
ताक्ष्यार्द्यश्च चत्वारो यदि ते मरणप्रदाः ॥ 7.23

इति वचनं अनुसन्धेयम् । यदि मध्ये सर्पमूषिकगजशशाः भवन्ति, दक्षिणे तेषां शत्रवो गरुडमार्जारसिंहशुनकाः भवन्ति तदा पृच्छकस्य मरणं सूचितम् । यदि वर्तमानफलसूचकमध्यस्थाने हन्तव्यः, भाविफलसूचकदक्षिणस्थाने हन्ता च भवेतां, तदा वर्तमानफलस्य नाशः इति युक्तिः । एवं योनिषु सत्सु यदि गरुडस्य सर्पग्रहणं, मार्जारस्य आखुग्रहणमित्यादीनि लक्षणानि दृष्टानि तदापि मृतिर्वाच्या ।

वाममध्यदक्षिणभागेषु वराटिका विन्यस्ताः । दक्षिणमध्यवामभागान् एकदशशतस्थानान् प्रकल्प्य आष्टमङ्गलसंख्या प्राप्यते । तां संख्यां त्रिंशता ¶त्वा यच्छिष्टं तत् शुक्लप्रतिपदः आरभ्य तिथिं सूचयति । सप्तविंशत्या ¶त्वा यच्छिष्टं तत् नक्षत्रं सूचयति । सप्तभि¶Rत्वा यच्छिष्टं तत् वारं सूचयति । द्वादशभि¶Rत्वा राशिः प्राप्यते । नवभि¶Rत्वा ग्रहः प्राप्यते । पञ्चभि¶Rत्वा भूतं लभ्यते । तिथिं शुक्लप्रतिपदः, नक्षत्रं अश्विन्याः, वारः रविवारात्, राशिः मेषात् ग्रहः रवेः, भूतं पृथिव्याः च गण्यन्ते । यदि लब्धराशिः पृच्छकस्य लग्नतः चन्द्रतः वा अष्टमो भवेत् तदा दोषः सूचितः । नक्षत्रवारादिभिः मृत्युयोगदग्धयोगादिसंभवात् दोषो भवति ।

यदि त्रिषु स्थानेषु युग्मसंख्या भवति तदा मरणं सूचितम् । वाममध्ययोः एवं चेत् महारोग ः सूचितः । एवं न संभवति । केचित् वाममध्यस्थयोः संख्ययोः संकलनफलं युग्मभिति व्याचक्षते । मध्यस्थसंख्यां पञ्चचत्वारिंशता हत्वा अष्टाभि¶Rत्वा शिष्टं शून्यं चेत् मरणं फलम् । द्वे चेत्पुत्रमरणम् । चत्वारि चेत् स्वजनानां दोषः । षट् पृच्छकस्य रोगप्रदः । ओजसंख्या चेत् सुखं रोगशमनं च ।

वामस्थसंख्यां द्वाभ्यां, मध्यस्यसंख्यां त्रिभिः, दक्षिणस्थसंख्यां चतुर्भिः च ¶त्वा योजयेत् । यदि संख्या ११२ भवति क्रियया २३८ भवति । शुक्लपक्षश्चेत् ३३६ इति संख्यां संयोजयेत् । कृष्णपक्षश्चेत् ६४८ संयुज्यते । फलं द्वादशभिः ¶त्वा यच्छिष्टं तत्सूचितराशौ, यस्मिन् समये गुरुः सञ्चरति स मरणकालः । ८४ इति संख्यया

¶त्वा शिष्टं १२, ३०, ६० इत्येतै¶Rत्वा राश्यादिस्फुटं लभ्यते । तद्राशौ शनिसञ्चारकालः दोषप्रदः ।

एवं बहुप्रकारैः अष्टमङ्गलासंख्या उपयुज्यन्ते ।

अष्टमङ्गलम्

| **संख्या** | **ग्रहः** | **योनिः** | **जन्तुः** | **भूतम्** |
|---|---|---|---|---|
| १ | रविः | ध्वजः | गरुडः | पृथिवी |
| २ | कुजः | धूमः | मार्जारः | तेजः |
| ३ | गुरुः | सिंहः | सिंहः | पृथिवी |
| ४ | बुधः | शुनकः | शुनकः | आकाशः |
| ५ | शुक्रः | वृषः | सर्पः | जलम् |
| ६ | मन्दः | खरः | मूषिकः | वायुः |
| ७ | चन्द्रः | गजः | गजः | जलम् |
| ८ | राहुः | काकः | शशः | आकाशः |

अत्र विशदीकृताः

वामस्थानफलं भूतं वर्तमानं तु मध्यतः ।
दक्षिणस्थेन भावीनि फलानि च विनिर्दिशेत् ॥ 7-1

अधोमध्योर्ध्वमागेषु वपुषो दक्षिणादयः
युग्मसंख्यावपुर्भागे ग्रहोक्तव्याधिमादिशेत् ॥ 7-2

स्थानेषु त्रिषु चैकादिशेषे स्युर्भास्करादयः ।
ध्वजाद्या गरुडाद्याश्च पञ्चभूतानि च क्रमात् ॥ 7-3

अर्कारजीवविच्छुक्रमन्दचन्द्राहयः क्रमात् ।
ध्वजधूमहरिश्वोक्षखरमातङ्गवायसाः ॥ 7-4

तार्क्ष्यमार्जारसिंहश्वाह्याखुद्विपशशास्तथा ।
ध्वजसिंहौ मही दन्तिवृषौ जलमयौ मतौ ॥ 7-5

धूमो वह्निः खरो वायुःश्वकाकौ वियदात्मकौ 7-6

एकस्थानदशस्थानशतस्थानं तथा पुनः ।
स्थानत्रयं प्रकल्प्यातो नीलभक्तावशेषतः ॥ 7-32

शुक्लप्रतिपदाद्याः स्युस्तिथयः सारशेषतः
तारा वाराः सप्तशेषात् प्रियशेषात्तु राशयः 7-33

नवभक्तावशेषात्तु विज्ञेयाः स्युर्नवग्रहाः ।
तथैव पञ्चभूतानि पञ्चभक्तावशेषतः ॥ 7-34

इति ।

| |
|---|
| वराटिकाः अष्टमङ्गलफलकथने कथं उपयुज्यन्ते? |

**एकाङ्कप्रश्नाः**

1. प्रधानसूत्राणि कानि?
2. आरूढलग्नं मकरः, उदयलग्नं कुम्भः । कीदृशं सूत्रम्?
3. एतस्मिन् अधिपतिसूत्रं किम्?
4. उदयांशः कन्या, आरूढलग्नं कुम्भः । एवं चेत् किमंशकसूत्रम्?
5. पृच्छकनक्षत्रं अश्विनी । लग्ननक्षत्रं श्रवणः । नक्षत्रसूत्रं किम्?
6. आरूढलग्नं मकरश्चेन्महासूत्रं किम्?
7. केषु राशिषु त्रिस्फुटं दोषकरम्?
8. अष्टमङ्गलसंख्यासङ्कलनफलं किं भवति?

9. अष्टमङ्गलसंख्या २ चेत्को ग्रहः ।

10. अष्टमङ्गलसंख्या २ चेत्को योनिः?

11. अष्टमङ्गलसंख्या ३ चेत्को जन्तुः?

12. त्रिषु स्थानेषु युग्मसंख्याः चेत्फलं किम्

13. यदि अष्टमङ्गलसंख्या ४ चेत् तदा ग्रहः कः

14. यदि अष्टमङ्गलसंख्या ४ चेत् जन्तुः कः?

15. अष्टमन्ङ्गलसंख्या ५ चेत्को जन्तुः?

16. अष्टमन्ङ्गलसंख्या ५ चेत्को योनिः ।

17. अष्टमन्ङ्गलसंख्या ४ ४ ४ चेत् तिथिः का?

18. एतस्य वारः कः?

19. एतस्य नक्षत्रं किम्?

20. एतस्य राशिः कः

**उत्तराणि**

1. सामान्याधिपत्यंशकनक्षत्रमहासूत्राणि ।
2. रोगसूत्रम् ।
3. जीवसूत्रम् ।
4. जीवसूत्रम् ।
5. जीवसूत्रम् ।
6. रोगसूत्रम् ।
7. कर्कटवृश्चिकमीनेषु ।
8. ४, १२, २० वा ।
9. रविः ।
10. धूमः ।
11. सिंहः ।
12. मृतिः ।
13. बुधः ।
14. शुनकः ।
15. सर्पः ।

16. वृषः ।
17. कृष्णनवमी ।
18. कुजः ।
19. आश्लेषा ।
20. मीनः ।

**पञ्चाङ्काः प्रश्नाः**

1. सामान्यसूत्रं सोदाहरणं विशदयत ।
2. अधिपतिसूत्रस्य फलानि कथयत ।
3. त्रिस्फुटं सोदाहरणं विशदयत ।
4. अष्टमङ्गलसंख्या ३ चेत्, फलानि कथयत ।
5. भूतवशात् कथं फलानि कथ्यन्ते?
6. नक्षत्रसूत्रं सोदाहरणं विशदयत ।

**दशाङ्काः प्रश्नाः**

1. पञ्चसूत्राणि विशदयत ।
2. विविधसूत्रसूचितरोगाः के?
3. अष्टमङ्गलसंख्यासूचितग्रहफलानि कथयत?
4. अष्टमङ्गलसूचितयोनीनां फलानि कथयत ।
5. त्रिस्पुटाश्रितनक्षत्रमनुसृत्य कथं फलानि वक्तव्यानि?

**विंशत्यङ्कौ प्रश्नौ**

1. त्रिस्फुटस्य प्राधान्यं विशदयत ।
2. अष्टमङ्गलसंख्याः कथं प्रयुज्यन्ते?

# चतुर्थो विभागः

# अष्टमाध्यायो नवमाध्यायश्च

## अष्टमोध्यायः

### 4.8.0 अवतरणिका

अस्मिन्नध्याये आरूढादिफलमुक्तम्। "आरूढोदयलग्नांशच्छत्रस्पृष्टाङ्गराशयः । चन्द्राधिष्ठितराशिश्च षट् चिन्त्याः प्रश्नकर्मणि" इति नियममनुसृत्य आरूढादिफलमत्र कथितम् । विन्यस्तस्वर्णखण्डस्य उर्ध्वमुखादिस्थितिवशात्, आरूढनवांशवशात्, उदयलग्नवशात् स्पृष्टाङ्गराशिवशात् चन्द्रवशात् च फलानि कथितानि ।

### 4.8.1 उद्देश्यानि

- आरूढलग्नम्
- आरूढनवांशः
- स्पृष्टाङ्गराशिः
- उदयलग्नम्
- कालहोरा

एतैः फलकथनम्

### 4.8.2 आरूढादिफलकथनम्

आरूढोदयलग्नांशच्छत्रस्पृष्टाङ्गराशयः ।
चन्द्राधिष्ठितराशिश्च षट् चिन्त्याः प्रश्नकर्मणि ॥ 8-1

इति षट् प्रश्नकर्मणि चिन्त्याः ।

एषां सदसद्योगादारोग्यसरोगतादि शुभमशुभम् ।
अशुभशुभावस्थाया बलवत्त्वात्प्रष्टुरुक्तमिति शास्त्रे ॥ 8-2

यदङ्गराशिः संस्पृष्ट आरूढ उदितोऽथवा ।
तस्मिन् पापयुते बूयात्तदङ्गे रुग्व्रणादिकम् ॥ 8-3

इति फलान्युक्तानि ।

पृच्छकस्य शुभाशुभं स्वर्णाश्रितारूढराशिना वक्तव्यम् । अत्र प्रधानतत्त्वं तु

"जलगन्धार्तवव्रीहितण्डुला भूतपञ्चकम् ।
तन्मयं हि वपुर्ज्ञेयं जीव एव हि काञ्चनम् ॥" इति ।

व्रीहिः, जलं, तण्डुलः, चन्दनं, पुष्पं इत्येतानि क्रमेण पृथिवी, जलं, तेजः, वायुः, आकाशः इति पञ्चभूतानि सूचयन्ति । स्वर्णं तु जीवः । एवं तेषां संबन्धेन देहजीवयोः संबन्धो वाच्यः । यदि पुष्पाक्षतादीनि काञ्चनेन न संपृक्ता तदा दोषा वाच्याः । तेषां स्थितिमवलोक्य युक्तियुक्तानि फलानि वक्तव्यानि । यदि स्वर्णं पुष्पाक्षतोपरि उत्तानम् दृश्यते, तदा पृच्छकस्य आयुर्वृध्दिर्भवति । यदि भूमौ तिर्यक्स्थितं भवति, मृत्युर्भवति । अधोमुखं चेत् बाधाप्रदं भवति । यदि स्वर्णं पुष्पाक्षतोपरि अधोमुखं दृश्यते तदा पृच्छकस्य उपचितसंपदः द्रव्यादीनां च नाशः आरब्ध इति वक्तव्यम् । यदि स्वर्णं पुष्पाक्षतानां अधः ऊर्ध्वसुखं दृश्यते, तदा संपद्वृद्धिः प्रारब्धा इति वाच्यम् । यदि पुष्पाक्षतैः स्वर्णं न संबद्धं पृच्छकस्य संपदः आसन् इति ज्ञेयम् । अन्यथा चेद्विपरीतफलम् । यदि स्वर्णं ऊर्ध्वमुखं चेद् संपद् वर्धिष्यते, अध्वोमुखं चेदपचेष्यति इति ज्ञातव्यम् । यदि स्वर्णं पुष्पाक्षतानामधः अधोमुखं च दृष्टं, धनानां नष्टं वर्तते वर्तिष्यते च इति वक्तव्यम् । एतानि तत्त्वान्युपयुज्य सर्वदा सर्वप्रकारैः फलानि वक्तुं शक्यते । स्वर्णस्य प्लवमनुसृत्यापि फलानि वक्तव्यानि । दक्षिणस्यां प्रति चेत् मरणं सूचितम् । वारुणीं दिशं प्रति चेत् दरिद्रता, उत्तरस्यां प्रति चेत् धनवृद्धिः इति फलान्युक्तानि । आग्नेयनैऋतवायव्यैशान्यकोणान् प्रति प्लवश्चेत् दोषो वक्तव्यः । एवं स्वर्णविन्यासरीतिः फलकथने प्रयुज्यते ।

### 4.8.3 ग्रहाणां अवस्था

स्थानवशात् समक्षेत्रबन्धुक्षेत्रस्वक्षेत्रमूलक्षेत्रस्वोच्चशत्रुनीच राशिषु स्थितानां क्रमेण अतिबालबालकुमारयुवभूपवृद्धमृतावस्थाः भवन्ति । कालवशात्, सूर्यादुदितमात्रोऽतिबालः । ततः सप्तदिनपर्यन्तं

बालः । ततः कुमारः । वक्रारम्भे युवा । वक्रसमये भूपः । एवं द्विधा ग्रहावस्था प्रोक्ता ।

आरूढोदयच्छत्रेषु यो बलवान् तस्यावस्था पृच्छकस्य वक्तव्या । अतिबालादीनां स्वभावाः लोके प्रसिद्धाः । तदनुसारी स्वभावो पृच्छकस्य इति अवगन्तव्यम् । यौवनावस्थायां कामासक्तिः । अतिबाल्ये न कोऽपि वक्तव्यगुणः । बाल्ये क्रीडासक्तता । मृतावस्थायां मूर्च्छा इत्यादयो गुणाः । यदि प्रश्नदिवसस्य वाराधिपः उच्चराशिस्थः उच्चनवांशस्थो वा आरूढाराशिः वारेशस्य उच्चराशिश्च भवति तदा दीर्घायुः आरोग्यं च वक्तव्ये ।

आरूढलग्नवशात् फलानि वक्तव्यानि । सिंहः कुक्ष्यक्षिजात्मपीडोष्णव्याधीन् सूचयति । कर्कटः वक्षोजिह्वास्यरोगारुचिजलरोगप्रदः । मेषवृश्चिकौ शिरोरोगनेत्ररोगज्वरव्रणविचर्चिकाप्रदौ । बुधराशिः वायुरोधनासात्वग्रोगदः । जीवक्षेत्रं बुद्धिभ्रमणश्रवणरुगादिदम् । शुक्रराशिः लिङ्गरोगारोचकजलरोगदः । मन्दभः बुद्धिभ्रमाङ्गसादमलबन्धयानहत्यादिसूचकः । यदि आरूढराशिः पापयुतः तदा एते वक्तव्याः । मान्दिराशिनवंशयोगश्चेत् मृतिर्वाच्या ।

सिंहे कुक्ष्यक्षिजो व्याधिरात्मपीडोष्णरुक् तथा ।
वक्षोजिह्वास्यरोगारुच्यम्बुरोगास्तु कर्कटे ॥ 8-15
शिरोनेत्रभवव्याधिज्वरव्रणविचर्चिकाः ।
भौमे बुधभे वायुरोधनासात्वगामयः ॥ 8-16
आरूढे जीवभे बुद्धिभ्रमकर्णामयादयः ।
शुक्रभे व्यञ्जनोत्था रुगरुचिश्चाम्बुजो गदः ॥ 8-17
बुद्धिभ्रमाङ्गसादश्च मलयानहतिः शनेः ।
विचर्चिकां च कण्डूतिं भूयात्सर्पान्वितेक्षिते ॥ 8-18

इति प्रमाणम् ।

आरूढनवांशवशात् फलानि कथ्यन्ते ।

कलशमधः शिवकोणा

न्निशि चरतः सिन्धुकायमुपरि गतम् ।
वेदान्तादनलाद्यं
मारुतकोणात्परेषु तिर्यक्त्वम् ॥ 8-21

इति नियमः । आदौ राशिः नवभिःचतुरश्रखण्डैः विभज्यते । आरूढराशिः क (१, मेषः), ल (३, मिथुनम्) श (५, सिंहः) वा चेत्, ऐशान्यखण्डादारभ्य अधः त्रयः खण्डाः । ततः दक्षिणखण्डाद् आरभ्य ऊर्ध्वं त्रयः खण्डाः । ततो दक्षिणखण्डात् अधस्त्रयः खण्डाः । स्वर्णाक्रान्तराशिः नवांशः । ततः 'अजमृगतौलि' इति नियमात् नवांशो ज्ञायते । राशिः सि (७, तुला) न्धु (९, धनुः) कायं वा (११ कुम्भः) चेत् नैऋRतादारभ्य उपरि त्रयः खण्डाः, ततः वामखण्डात् आरभ्य अधस्त्रयः खण्डाः । ततः वामखण्डात् ऊर्ध्वं त्रयः खण्डाः । राशिः वे (४, कर्कटः) दा (७, वृश्चिकः) न्त (३, कन्या) वा चेत्, आग्नेयादारभ्य अधस्त्रयः खण्डाः । ततः, वामखण्डात् ऊर्ध्वं त्रयः खण्डाः, ततः, वामखण्डात् अधस्त्रयः खण्डाः । इतरेषां वायव्यादारभ्य तिर्यक् त्रयः खण्डाः । ततः ऊर्ध्वखण्डादारभ्य तिर्यक् त्रयः खण्डाः । ततः ऊर्ध्वखण्डादारभ्य त्रयः खण्डाः । आरूढः कर्कटो भवतु, खर्णं नैऋRतदिशि चेत्, तृतीयो नवांशखण्डः । नवांशराशिः कन्या इति सिध्यति ।

आरूढे वा उदयलग्ने वा गण्डान्ते स्थिते दोषः । आरूढे मीने पापवीक्षिते सति प्रष्टुः पङ्गुत्वं कूपपतनत्वं च वाच्ये ।

आरूढादिवशाद् द्वादशभावाः दिक्षु कथ्यन्ते ।

"प्राच्यादिगृहे क्रियादयो
द्वौ द्वौ कोणगता द्विमूर्तयः"

इति क्रममनुसृत्य भावाः गण्यन्ते । आरूढराशिः द्वितीयश्च प्राच्यां दिशि । तृतीयः अग्नेय्याम् । चतुर्थः पञ्चमश्च अवाच्याम् । नै}ऋत्यां षष्ठः । प्रतीच्यां सप्तमाष्टमौ । वायव्यां नवमः । दशमैकादशौ उदीच्याम् । द्वादशभावो ऐशान्याम् । केन्द्रगैर्बलान्वितैर्वा, ग्रहैः

तत्तद्दिक्षु स्थितान् वृक्षान् वदेत् । एवं रविः लग्ने स्थितश्चेत् प्राच्यां 'अन्तःसाराः' वृक्षा सन्ति इति वक्तव्यम् ।

स्वर्णारूढस्थितिवशात् फलानि कथितव्यानि ।

ऊर्ध्वमुखो यदि राशिर्होरा प्रश्ने नरस्य सिद्धिकरी ।
अन्ये विफले ज्ञेये शुभयुतदृष्टे शुभाख्ये च ॥ 8-27

ऊर्ध्वास्ये तनुगे प्रसूतगतकार्यारम्भिणां पृच्छता
मौन्यत्यं महदर्थपौरुषयशःस्थानादिकानां भवेत् ।
यद्यारूढमधोमुखं भमखिलैर्हीयेत वित्तादिभि
स्त्यज्येतापि सु¶ज्जनैरपि पतेद्वाहादितः पृच्छकः ॥8-28

आरूढाधिपतिः शुभग्रहगृहे प्रश्ने यदि स्यात्स्थितः
क्षोणीशामरमन्दिरादिषु मनोज्ञेषु स्थितिः पृच्छताम् ।
पापक्षेत्रगतः स चेदिह भवेत् म्लेच्छप्रदेशे स्थितिः
सौम्यासौम्यदृगन्वयात् सदसतां योगश्च तत्रोह्यताम् ॥8-29

स्वर्णेनारूढविन्यस्तेनापि प्रष्टुः शुभाशुभम् ।
ज्ञेयं शास्त्रान्तरेषूक्तं तदप्यथ निगद्यते ॥ 8-32

जलगन्धार्तवव्रीहितण्डुला भूतपञ्चकम् ।
तन्मयं हि वपुर्ज्ञेयं जीव एव हि काञ्चनम् ॥ 8.33

पुष्पाक्षतोपरि स्वर्णमुत्तानं पृच्छकायुषे ।
निर्यङ्मृत्युकरं भूस्थं न्यक्तु बाधागदावहम् ॥ 8-34

इति श्लोकाः अत्र अनुसन्धेयाः ।

### 4.8.4 मृत्युदेहप्राणस्फुटानि

गुलिकस्फुटं नवभिर्हत्वा प्राप्तं नवांशस्फुटं मृत्युस्फुटं भवति । चन्द्रस्फुटं नवभिर्हत्वा प्राप्तं नवांशस्फुटं देहस्फुटं भवति । उदयलग्नस्फुटं नवभिर्हत्वा प्राप्तं नवांशस्फुटं प्राणस्फुटं भवति । एतेषु त्रिषु स्थिरेषु रोगः फलम् । एतेषु एकराशौ उभयराशिषु वा स्थितेषु मृत्युः फलम् ।

यदि एतेषु त्रिषु देहस्फुटस्याधिक्यं स्यात् तदा देहसौख्यं लभ्यते । प्राणस्फुटाधिक्ये रोगवृद्धिर्भवति । मृत्युस्फु टाधिक्ये मृतिः

फलम् । आधिक्यं राशिभागकलाभिश्चिन्त्यम् । एतानि अन्योन्यदृष्टियुतानि चेन्मोहालस्यं वक्तव्यम् । एतानि परस्परं त्रिकोणेषु स्थितानि चेत् पृच्छकस्य महारोगं कुर्वन्ति । यदि प्राणदेहस्फुटे एकस्मिन् राशौ स्थिते अथवा परस्परदृष्टियुते तदा पृच्छकस्य आयुर्वृद्धिः फलम् । त्रिकोणस्थित्या आयुर्वृद्धिर्वाच्या इति केचित् ।

लग्नांशकेऽधिके वृद्धी
रुजां चन्द्राधिके शमः ।
मान्द्यंशे मृतिराधिक्यं
गताभिर्घटिकादिभिः ॥ 8-50

इति वचनात् लग्नांशाधिक्येन रोगवृद्धिर्भवति । देहरूपचन्द्रनवांशा–धिक्यात् रोगशान्तिर्भवति । मृत्युरूपमान्दिनवांशाधिक्यात् मृत्युश्च । मृत्युस्फुटकालस्फुटपापग्रहाणां मध्ये स्थितं प्राणस्फुटं मृत्युदम् । प्राणस्फुटस्य चन्द्रयोगः शुभप्रदः ।

### 4.8.5 उदयलग्नवशात्फलानि

यदि उदयलग्नस्फुटस्य तदधिपस्य वा उष्णनाडीयोगो भवति तदा पृच्छकस्य पित्तसंबन्धिरोगाः संजायन्ते । यदि विषद्रेक्काणविषनाडीयोगो भवति तदा विषभयं वाच्यम् । एकार्गलदोषश्चेत् पृच्छकस्य गृहे आलस्यदुर्मरणादीनि वाच्यानि । उदयलग्नांशस्थिते चन्द्रे लोहपात्रक्षतिः मृतिश्च ।

### 4.8.6 कालहोराफलम्

प्रष्टुः विश्वासार्थं विस्मापनार्थं च पृच्छासमयकालहोरावशात् फलानि कथितानि । रवेः कालाहोरा चेत्, भूपागमो भवति । चन्द्रस्य चेत्, नार्यागमः, कुजस्य चेत् शस्त्रिण आगमः, बुधस्य चेत् पारशवानां अथवा विदुष आगमः, गुरोश्चेत् उत्तमब्राह्मणस्यागमः, शुक्रस्य चेत् वेश्यागमः । शनेश्चेत् वणिग्भृत्यबौद्धानां आगमः इति फलानि वक्तव्यानि । यदि कालहोराधिपः उदयलग्नात् केन्द्रस्थितः, तदा फलानुभवो निश्चयात् भवति । दिवसस्य चतुर्विंशतिहोराः । होरा तु सार्धघटिकाद्वयमानयुता । वाराधिपः प्रथमहोराधिपः । ततः परं

मन्त्रिमङ्गलमार्तण्डशुक्रज्ञेन्दुशनैश्चराः इति क्रमेण ज्ञेयाः । यदि गुरुवारश्चेत्, द्वितीयहोराधिपः कुजः, ततः रविः एवं चतुर्विंशहोराधिपो रविः । ततः अपरदिने शुक्रवारः । शुक्रस्य कालहोरया वारः प्रारभते ।

### 4.8.7 चन्द्रवशात् फलम्

यदि चन्द्रनवांशराशिः शुभयुतो भवति तदा भावी कालः शोभनः इति वक्तव्यम् । तत्रापि विशेषफलानि उक्तानि । चन्द्रस्य गुरुयोगः पुत्रप्रदः । तथापि गुरोर्नीचभागस्थितिः ब्राह्मणकोपं सूचयति । अत्र भागशब्दः नवांशं सूचयति इति सांप्रदायिकं व्याख्यानम् । नीचराशिरपि ग्राह्यः इति केचित् । शुक्रः वस्त्रलाभं स्त्रीसुखं च ददाति । बुधः वादेषु विजयं कुरुते । तथापि यदि पापयुतश्चेत् तदा वादः परिभवं ददाति । पूर्णचन्द्रः मनोहराणां द्रव्याणां लाभं करोति । क्षीणचन्द्रो दुःखं ददाति । रविः शिवकोपं राजकोपं च सूचयति । भौमः कारणं विना कलहं भूमिसंबन्धिनः व्यवाहारांश्च यच्छति । मन्देन कृषिनष्टं चतुष्पाद्रोगाः भृत्यनाशश्च सूच्यन्ते । राहुणा विषसर्पादिभयं सूचितम् । केतुः प्रेतबाधां, गुलिकः चूर्णादिस्थापनोपद्रवं च सूचयतः । अंशसूचितमासेन कालो वक्तव्यः । चन्द्रो मेषांशे चेत् मासेनैकेन फलं, वृषांशे चेत्मासद्वयेन फलं इत्यादीति वक्तव्यानि ।

| |
|---|
| ग्रहावस्थां विशदयत । |

नवमोऽध्यायः

4.9.0 अवतरणिका

आयुर्निरूपणरीतयः, छत्रराशिः, तत्प्रयोजनं, योगायुः, दशायुः दीर्घायुर्योगाः इत्यादीनि उक्तानि ।

4.9.1 उद्देश्यानि

- आयुर्निर्णयरीतयः
- छत्रराशिः
- योगायुः
- दशायुः

4.9.2 आयुर्निर्णयः

तत्कालजैर्निमित्तैः
प्रष्ट्रारूढोदयेन्दुगुलिकाद्यैः ।
आयुः प्रथमं चिन्त्यं
स्वस्थातुरविषयभेदमवगम्य ॥ 9-2

लग्नेशो यदि केन्द्रगः खलु बली राशौ चरे चांशके
प्रश्नः स्वस्थगतोऽथ रिःफरिपुगो लग्नाधिपश्चेत् स्थिरे ।
निर्वीर्यश्च महागतार्तविषया पृच्छाथ मिश्रः स चे
त्तोयर्धिक्षयवन्मुहुः प्रशमनं वृद्धिश्च वाच्यो रुजाम् ॥ 9-7

लग्नाधिपश्च मृतिपश्च मिथः समेतौ
यद्वा स्वतुङ्गनिजगेहसुहृद्गृहस्थौ ।
लग्नेशशुक्रधिषणाश्च धनत्रिकोण
केन्द्रस्थिता विदधते खलु दीर्घमायुः ॥ 9-12

होराया इव जीवः स्यात् प्रष्टुरायुर्निरूपणम् ।
देहः फलान्तरज्ञानमिति शास्त्रान्तरोदितम् ॥ 9-14

आयुश्च लोकयात्रा च द्वे शास्त्रेऽस्मिन् प्रयोजने ।
निश्चेतुं को नु शक्नोति वसिष्ठो वा बृहस्पतिः ॥9-15

किं पुनर्मनुजास्तत्र विशेषात्तु कलौ युगे ।
लोकयात्रापरिज्ञानं शरीरं कथ्यते बुधैः ॥
आयुषस्तु परिज्ञानं होराया जीव उच्यते । 9-16
लग्नं देहोऽष्टमो जीवस्तयोरधिपयोर्बलम् ।
अन्योन्यदृष्टियोगौ च दीर्घाय प्रष्टुरायुषे ॥ 9-37
सर्वेषामपि पापानां मान्दिर्दोषप्रदोऽधिकम् ।
सोऽतिदोषकरो योगदृग्वर्णवशतः शनिः ॥ 9-41
ग्रहचारदशाप्रश्नफलसंवादसंभवे ।
सत्येव फलमादेश्यं शुभाशुभमसंशयम् ॥ 9-43
योगायुश्च दशायुश्चेत्यायुर्वै द्विविधं नृणाम् ।
योगोक्तमायुर्योगायुर्दशायुश्च दशाकृतम् ॥ 9-53

इति आयुर्निरूपणमार्गाः कथिताः
"आयुरेव विशेषेण प्रथमं चिन्त्यतेऽधुना"

इति प्रश्नमार्गकारेण आयुर्निर्णयस्य प्राधान्यमुक्तम् । आयुर्निर्णयार्थं सामान्यनियमाः सन्ति । यदि लग्नाधिपाष्टमाधिपौ संयुतौ अथवा स्वतुङ्गस्थित्यादिबलसंयुतौ, तदा आयुर्वृद्धिकरौ भवतः । लग्नाधिपगुरुशुक्राः केन्द्रत्रिकोणद्वितीयादिसुस्थानेषु स्थिताः आयुर्वृद्धिं सूचयन्ति ।

"आयुश्च लोकयात्रा च द्वे शास्त्रेऽस्मिन् प्रयोजने ।
निश्चेतुं को नु शक्नोति वसिष्ठो वा बृहस्पतिः॥ 9.15

इति वचनमनुसृत्य आयुर्निर्णयः दुष्कर एव । तथापि केचिन्मार्गा प्रश्नमार्गे दर्शिताः । तदर्थं प्रधानसाधनान्याह । लग्नं, लग्नाधिपः, अष्टमेशः. चन्द्रः इत्येतानि प्रत्येकमवलोकनीयानि । तेषां शुभयोगः, शुभदृष्टिः, प्राबल्यं, अशुभयोगः, अशुभदृष्टिः दौर्बल्यं इत्यादिगुणान् उपयुज्य फलानि वक्तव्यानि । लग्नस्य, अशुभमध्यस्थितिः, अशुभदृष्टिः अशुभयोगः इति त्रीणि दोषकृल्लक्षणानि । शुभमध्यस्थितिः, शुभदृष्टिः शुभयोगः, लग्नाधिपस्य दृष्टिः, लग्नाधिपस्य योगः इति षट् शुभदगुणाः ।

अष्टमस्यापि एवं चिन्त्यम् । एवं लग्नाधिपस्य पापमध्यस्थितिः, पापयोगः, पापदृष्टिः, मौढ्यं, नीचस्थितिः इत्येतानि दोषकराणि । उच्चस्थितिः, स्वक्षेत्रस्थितिः बन्धुग्रहयुतिः शुभयोगः, शुभदृष्टिः, शुभमध्यस्थितिः, वक्रगतिः, इति शुभप्रदाः स्थितिविशेषाः । अष्टमाधिपस्यापि एवं चिन्त्यम् । तथापि अष्टमेशस्य केन्द्रस्थितिर्न शुभप्रदा । लग्नाधिपस्य केन्द्रस्थितिरायुर्वृद्धिकरी इत्यवगन्तव्यम् ।

ततः चन्द्रस्य स्थितिरवलोकनीया । चन्द्रस्य षडष्टरिःफस्थितिः, पापमध्यस्थितिः, पापग्रहयोगः, पापदृष्टिः, क्षीणत्वं, लग्नस्थितिः विशेषतः वृश्चिकराशौ इत्येतानि अशुभप्रदानि । चन्द्रस्य पूर्णत्वं शुभमध्यस्थितिः, शुभयोगः, शुभदृष्टिः, बृहस्पतिकेन्द्रे स्थितिः, वृषे स्थितिः, गुरुयोगः इत्यादीनि शुभप्रदानि ।

"गुरुशशिसहिते कुलीरलग्ने
शशितनये भृगुजे च केन्द्रयाते ।
भवरिपुसहजोपगैश्च शैषै
रमितमिहायुरनुक्रमाद्विना स्यात् ॥"

इति वचनात् त्रिषडायगताः पापाः आयुर्वृद्धिकराः इति द्योत्यते ।

यदि लग्नाष्टमभावौ शीर्षोदयौ, भावाधिपाभ्यां दृष्टौ युतौ वा, तदा पृच्छकस्य दीर्घायुर्भवति ।

यदि लग्नाधिपशुक्रजीवेषु एकोऽपि आरूढकेन्द्रे स्थितः दीर्घायुर्वाच्यम् । कैमुतिकन्यायेन द्वौ त्रयो वा चेद् फलमूह्यम् ।

योगायुः दशायुः इति आयुः द्विविधम् । दशाभिः आयुः अनुमातुं शक्यते । विविधैर्योगैश्च आयुः निर्णेतुं शक्यते । अधियोगकेसरियोगमहापुरुषयोगानां दीर्घायुः कथितम् । तानि सर्वाणि युक्तिपूर्वं आयुर्निर्णये योज्यानि ।

एवं विविधप्रकारैः आयुर्निरूपणं कर्तव्यम् ।

### 4.9.3 योगाः, आयुर्योगाश्च

स्थानवशात्, भाववशात्, ग्रहवशात्, स्थानभाववशात्, स्थानभावग्रहवशात्, भावग्रहवशात्, स्थानग्रहवशात् इति

विविधविकल्पैः सप्तविधा योगा भवन्ति । स्थानशब्देन उच्चस्वक्षेत्रादिस्थानानि, भावशब्देन लग्नादिद्वादशभावाश्च उच्यन्ते । ग्रहशब्देन सूर्यादिग्रगाश्च सूचिताः । एतेषां योगकर्तृषु यो बलवान् स एव योगकर्ता इति कल्प्यते । पञ्चमहापुरुषयोगाः स्थानभाववशात् उक्ताः । 'अशून्येषु च केन्द्रेषु' इत्यत्र स्थानग्रहापेक्षा नास्ति । एवं सर्वत्र चिन्त्यम् ।

यदायुः योगवशात् निर्णीयते तत् योगायुः । एतत् षड्विधं भवति । सद्योरिष्टयोगाः, अरिष्टयोगाः, रिष्टयोगाः मध्यायुर्योगाः, दीर्घायुर्योगाः, अमितायुर्योगा इति ते लक्षिताः । सद्योरिष्टयोगाः, प्रथमवयसि मृत्युं ददाति । अरिष्टयोगाः द्वादशवर्षपर्यन्तं मरणप्रदाः । एतयोः दशा न द्रष्टव्या । द्वात्रिंशद्वर्षपर्यन्तं प्रवर्तते रिष्टयोगः । ततः मध्यमायुर्योगः सप्ततिवर्षपर्यन्तं प्रवर्तते । सप्ततेरूर्ध्वं शतवर्षपर्यन्तं दीर्घायुः । ततः परं अमितायुः । सारावल्यादिग्रन्थेषु एते योगाः सविस्तरं दृश्यन्ते ।

"क्रूरसंयुतः शशी स्मरान्त्यमृत्युलग्नगः ।
कण्टकाद्बहिःशुभैरवीक्षितश्च मृत्युदः॥"

इति बृहज्जातकप्रोक्तं सद्योमरणलक्षणम् । पञ्चमहापुरुषयोगेषु मालव्यशशरुचकानां सप्ततिर्वत्सराः । शरदामशीतिर्भद्रस्य । हंसस्य नवतिः । एवं विविधा योगाः ग्रन्थेषु लभ्यन्ते ।

4.9.4 चरचक्रं स्थिरचक्रं वीथिश्च

स्थिरचक्रं भुवि स्थितम् । दैवज्ञं परितः पूर्वादिदिक्षु कल्पितम् । यथाविधि चक्रं विलिख्य स्वर्णविन्यासेन आरूढलग्नं ज्ञात्वा स्थिरचक्रमुपयुज्य फलानि कथ्यन्ते । अथवा पृच्छकस्थितिमनुसृत्यापि आरूढराशिः परिकल्पितः । चरचक्रं आकाशे स्थितम् । सदा सञ्चारशीलम् । उदयलग्नमुपयुज्यात्र फलानि कथितानि । चक्रद्वयमपि फलकथने प्रयोज्यम् । तथापि पृच्छकः यदि पण्डितःस्यात् तदा चरचक्रं प्रयुज्यते, अथवा स्थिरचक्रमित्यपि संप्रदायः ।

सूर्योदयवेलायां, उदयलग्नं ग्राह्यम् । यदि पृच्छकः सञ्चरति, अथवा प्रश्नो यात्रादिचरस्वभावयुतविषयकः चेत्, उदयलग्नस्य प्राधान्यम् ।

आदौ वीथिर्ज्ञातव्या । वृषः, मिथुनं, कर्कटः सिंहः इति चतुर्षु राशिषु यदि रविः स्थितः, तदा वीथिः मेषः । वृश्चिकः, धनुः, मकरः, कुम्भः, इति चतुर्षु स्थिते रवौ, मिथुनं वीथिः । कन्या, तुला, मीनः, मेषः इति चतुर्षु राशिषु रवौ स्थिते, वीथिः वृषः । आरूढादुयदयो यावान् तावच्छत्रं च वीथिभात् इति नियमाच्छत्रराशिंर्निर्णीयते । एवं स्थिरचक्रेषु छत्रनिर्णयः कृतः । अत्र आरूढलग्नं प्रधानम् । चरचक्रप्रधानेषु प्रश्नेषु उदयलग्नस्य प्राधान्यम् । अत्र उदयलग्ननवांशराशिरेव स्वीकृतः छत्रराशिः । अत्रोदाहरणम् । स्थिरचक्रे आरूढराशिः मेषो भवतु । रविः कन्यायां भवतु । अत्र वीथिः वृषः । उदयः तुला भवतु । आरूढादुदयो सप्तमस्थितः । एवं वीथिभात् सप्तमराशिः वृश्चिकः छत्रराशिर्भवति ।

| |
|---|
| छत्रराशिः कथं ज्ञायते ? |

**एकाङ्कप्रश्नाः**

1. प्रश्ने के षट् चिन्त्याः?
2. स्पृष्टाङ्गराशिर्मिथुनम् । फलं किं?
3. स्थानवशात् कुमारो ग्रहः कः?
4. कालवशात् वृद्धो ग्रहः कः?
5. आरूढः सिंहश्चेत् पृच्छकस्य कीद्यशो व्याधिः?
6. आरूढः भौमराशिश्चेत् कीदृशो रोगः?
7. आरूढलग्नं मकरः । ऐशान्यदिशि स्वर्णं स्थितम् । नवांशः कः?
8. आरूढराशिरूर्ध्वमुखश्चेत् किं फलम्?
9. स्वर्णं पुष्पाक्षतानां उपरि स्थितं चेत् किं फलम्?
10. पृच्छासमये चन्द्रकालहोरा चेत्किं फलम्?
11. लग्नाधिपः चरराशौ चरनवांशे केन्द्रे बलयुक्तः स्थितः । किं फलम्?
12. लग्नस्य पापान्तरस्थितेः कि फलम्?
13. चन्द्रस्य कीदृशस्थितिः, दोषकरी?
14. दूतस्य शुभाशुभं कथं ज्ञायते?
15. रविः मिथुने स्थितः । वीथिः का?
16. कथं छत्रराशिः ज्ञायते?
17. सर्वेषामपि पापानां कोऽधिकदोषप्रदः?
18. किं दीर्घायुः?
19. कञ्चित् दीर्घायुर्योगं कथयत ।
20. अमितायुर्योगस्य किं फलम्?

**उत्तराणि**

1. आरूढोदयलग्नांशच्छत्रस्पृष्टाङ्गराशिचन्द्राधिष्ठितराशयः ।
2. उरसि रोगः व्रणं वा ।
3. स्वक्षेत्रे स्थितः ।
4. आसन्नास्तमयः ।

5. कुक्ष्यक्षिजः ।
6. शिरोनेत्ररोगज्वरव्रणविचर्चिकावायुरोधनासात्वग्भवाः ।
7. कर्कटः ।
8. कार्यसिद्धिः ।
9. दीर्घायुः ।
10. नार्यागमः ।
11. प्रश्नः स्वस्थविषयः ।
12. दोषः ।
13. षष्ठाष्टमव्ययस्थितिः, पापमध्यस्थितिः, पापयोगः, पापदृष्टिः, क्षीणत्वं, लग्नस्थितिश्च ।
14. उदयारूढयोः आयभाववशात् ।
15. मेषः ।
16. आरूढादुदयो यावान् तावत् छत्रं च वीथिभात् इति नियमात् ।
17. मान्दिः ।
18. सप्ततिवर्षादूर्ध्व शतपर्यन्तम् ।
19. लग्नस्य शुभयोगः ।
20. शताधिकसमाः जीवति ।

**पञ्चाङ्काः प्रश्नाः**

1. पृच्छकस्य पूर्णावस्था कथं ज्ञायते?
2. स्थानवशात् कालवशाच्च ग्रहाणां अवस्थां कथयत ।
3. आरूढादिद्वादशभावाः कथं दिक्षु कल्प्यन्ते?
4. स्थिरचक्रं चरचक्रं च विशदयत ।
5. कैः प्रकारैः योगो जायते?
6. उदयलग्नफलं कथयत ।

**दशाङ्काः प्रश्नाः**

1. आरूढनवांशः कथं ज्ञायते ? सोदाहरणं विशदयत ।
2. कालहोरावशात् कथं फलमुच्यते? कालहोरा कथं ज्ञायते?

3. चन्द्रवशात् फलं किं चिन्त्यम्?

4. छत्रराशिः कथं ज्ञायते?

**5.** योगायुः कथं ज्ञायते?

## विंशत्यङ्कौ प्रश्नौ

1. स्वर्णारूढस्थितिवशात् कथं फलानि कथ्यन्ते?

2. आयुर्निर्णयरीतिं विवृणुत ।

# पञ्चमो विभागः

## दशमाध्यायः एकादशाध्यायश्च

दशमोऽध्यायः

5.10.0 अवतरणिका

अस्मिन्नध्याये मरणकालश्चिन्त्यते । मरणकालः, दशा कारणं च जातकवशात् प्रश्नवशाच्च चिन्त्यानि । तदर्थं दोषदशादीनि संसूचितानि । नक्षत्रदशा कालचक्रदशा च अत्र विषयीभवतः । मन्दचारवशात्, गुरुचारवशात्, रविचारवशात् चन्द्रचारवशाच्च मरणं निरूपितम् । मरणलग्नं च निरूपितम् । जातकवशादेवं मरणं निरूप्य प्रश्नवशाच्च तत् प्रतिपादितम् ।

5.10.1 उद्देश्यानि

- जातकवशात् मरणकालनिर्णयः
- प्रश्नवशात् मरणकालनिर्णयः

5.10.2 दशापहारवशान्मृत्युः

आदौ दोषदा दशापहारा उच्यन्ते ।

योगेषु सत्सु योगोक्तवत्सरान्ते मृतिर्भवेत् ।
दशापेक्षान्विते योगे तत्संवादोऽपि चिन्त्यताम् ॥ 10.2
दोषो रन्ध्राधिपत्यादिजातः सर्वदशासमः ।
दशासूद्भवास्वेव गोमासर्क्षाधिपत्यजः ॥ 10.6
दशा नीचस्य मूढानां नियमेन मृतिप्रदा ।
कालचक्रदशायास्तु विशेषोऽथ निगद्यते ॥ 10.7
मीनाद्वृश्चिकभं व्रजेद्यदि तथा षष्ठादथो कर्कटं
सिंहाद्वा मिथुनं ततोऽपि हरिभं चापाच्च मेषं तथा ।
कष्टःस्यादिह तत्प्रवेशसमयः कष्टा दशा चोत्तरा
चारो राश्यनतिक्रमेण शुभदो राश्यन्तरस्थः शुभः ॥ 10.8

इति नियमाः सन्ति ।

जन्मलग्नतः अष्टमेशः चन्द्रात् अष्टमेशः लग्नचन्द्रतः अष्टमस्थग्रहाः अष्टमद्रष्टारः, मन्दः, लग्नात् द्वाविंशद्रेक्काणेशः , चन्द्रतः द्वाविंशद्रेक्काणाधिपः, मान्दिभेशः, एतदाश्रिततराशिपाः, एतेषां नवांशपाः एते दोषकराः । एतेषु बलहीनः, लग्नात् षडष्टमव्ययस्थिताः, पापयोगदृष्टियुताः, स्वस्वदशापहारकाले मरणदायिनः । पापग्रहदशाकाले पापापहारकालः मृत्युदः । जन्मनक्षात्रात् विपत्प्रत्यरवध तारेशदशाकालः, द्वित्रादीनां युगपदवासानकालः, दशावसानकालः, इत्यादयः मृतिकारकाः । अत्र पिण्डदशांशकदशानक्षत्रदशाकालचक्रदशा इत्यादयोऽपि चिन्त्याः । नीचस्थितस्य दशा च मृतिप्रदा । एवं मौढ्यगतस्यापि दशा मृतिं करोति । कालचक्रदशायां “मीनाद्वृश्चिकभं” इत्यादिसूचितकालः मृतिप्रदः । मण्डूकगतिमर्कटगतिसिंहावलोकनसंज्ञकाः दोषप्रदा इति सारः ।

5.10.3 चारवशान्मृत्युः

विविधग्रहाणां चारवशात् मृत्युकालः निर्णीयते ।

> मान्दित्रिकोणगे मन्दे मरणं रात्रिजन्मनाम् ।
> दिनभेऽहर्भुवामस्तत्रिकोणस्थेऽस्य भांशयोः ॥ 10.12

इत्यादीनि प्रमाणानि ।

5.10.4 मन्दचारः

मन्दः द्वादशराशीन् त्रिंशद्वत्सरैः भुङ्क्ते । अल्पायुषां मन्दस्य प्रथमपर्यये, मध्यायुषां द्वितीयपर्यये दीर्घायुषां तृतीयपर्यये चिरायुषां चतुर्थे पर्यये च मृत्युः भवति । रात्रिजन्मनां मन्दे मान्दित्रिकोणगे मृतिर्भवति । दिनजातानां दिनराशौ मान्दौ च मन्देरस्तत्रिकोणषु मन्दे सति मृतिर्भवति । जन्मकाले मन्दाश्रितराशिः मन्दाश्रितनवांशः, जन्मलग्नादष्टमेशेन प्राप्तो राशिः, तदंशकराशिः, आदित्यात् द्वितीयो राशिः, आदित्याद् द्वादशराशिः एतेषामेकतमराशौ मन्दे मृतिर्भवति । द्वाविंशद्रेक्काणपः यत्र स्थितः तत्त्रिकोणगते मन्दे निर्याणं भवति ।

5.10.5 गुरुचारः

लग्नत्र्यंशेश्वराक्रान्तराशेर्जीवे त्रिकोणगे ।
कालहोरेश्वराक्रान्तराशेर्वा मरणं नृणाम् ॥ 10.15

प्रायेण वत्सरेणेकेन राशिमेकं भुङ्क्ते जीवः । जीवचारेण वर्षं निर्णीयते । जन्मलग्नद्रेक्काणपाश्रितराशौ तत्त्रिकोणे वा चारगत्या यदा गुरुरागच्छति तदा मृतिर्भवति । जननकालहोराधिपाप्तराशौ त्रिकोणे वा जीवसञ्चारसमये मरणं भवति । मन्दाश्रितराशिपार्श्वराश्योः त्रिकोणे वा जीवसञ्चारसमयः मृत्युकालः । लग्नेशाष्टमेशस्फुटयोगराशौ यदा पापग्रहाः गुरुश्च चारवशात् आगच्छन्ति तदा मृत्युर्भवति ।

मन्दस्फुटेन राशिद्वयं योजयित्वा मन्दतृतीयस्फुटं सिध्यति । एवं पञ्चमषष्ठदशमस्फुटराशिषु यस्मिन्गुरुदृष्टिर्न्यूनतमा तस्मिन् राशौ त्रिकोणे वा गुरुचारसमयो मृतिप्रदः । एवं गुरुचारेण मृतिनिर्णयः ।

5.10.6 रविचारः

जन्मसमये लग्नात् अष्टमाधिपो यस्मिन् राशौ वर्तते तस्मिन् रविसञ्चारकालः मृतिप्रदः । जन्मनक्षत्रे लग्नस्फुटनक्षत्रे वा रविसञ्चारकालः मरणप्रदः । यदि रविः जन्मसमये चरराशौ स्थितः, तद्द्वादशांशराशौ त्रिकोणे वा रविसञ्चारकालो मृतिप्रदः । यदि रविः स्थिरराशिस्थितः, तदा जन्मलग्नाद् अष्टमेशस्य नवांशराशौ त्रिकोणे वा रविचारकालः मृत्युप्रदः । एवं रविचारवशात् मृत्युर्ज्ञेयः ।

अष्टमेशाश्रितं राशिमावसत्यहिमत्विषि ।
जन्मतारां विलग्नस्य तारकां वा मृतिर्भवेत् । 10.19

इति वचनमनुसन्धेयम् ।

5.10.7 चन्द्रचारः

जातके आदित्याश्रितराशौ जन्मलग्नात् अष्टमराशौ तस्य पञ्चमे नवमे वा राहुस्थितराशौ तत्त्रिकोणस्य दशमैकोनविंशनक्षत्रयोः वा चारवशात् चन्द्रः यदा सञ्चरति तदा मृत्युर्भवति । जन्मलग्नतः धनाधिपेनाश्रितराशौ वा तत्त्रिकोणयोः वा तन्नवांशराशौ वा चारवशात् चन्द्रः यदा सञ्चरति तदा मृतिर्भवति । जन्मसमये गुलिको यस्मिन्

राशौ स्थितः तस्मिन् चन्द्रे सति रोगः प्रारभते । तत्सप्तमे चन्द्रे मृतिश्च भवति ।

धनेशाश्रितराशेर्वा तस्य सप्तमभस्य वा ।
त्रिकोणस्थे धनेशांशराशिगे वा विधौ मृतिः ॥ 10.23

इति वचनमत्र स्मरणीयम् ।

5.10.8 मरणकाले सर्वग्रहस्थितिः

जन्मकालग्रहस्फुटं मेषादारभ्य गतनवांशसंख्यया गुणयेत् । राशेरेकस्य नव नवांशाः इति गणयेत् । एवं ग्रहः मिथुने वृषनवांशे चेत् मेषस्य नव, वृषस्य नव, मिथुनस्य अष्टौ, आहत्य षड्विंशतिः इति गणनीयम् । ग्रहस्फुटं लिप्तीकृत्य, ग्रहाश्रितनवांशाक्रान्तकलाभिः हत्वा, द्विशतेन ¶त्वा पूर्वलब्धस्फुटेन संयोजयेत् । तत्सूचितराशौ, द्वादशराशिभ्यः संशोध्य लब्धे राशौ वा ग्रहः यदा सञ्चरति तदा मृतिर्भवति ।

5.10.9 मरणलग्नम्

जन्मलग्नतः अष्टमराशिः, अष्टमेशाश्रितराशिः, लग्नेशाश्रितराशे–रष्टमराशिः लग्नेशाक्रान्तनवांशराशेरष्टमराशिः, एतेषामेकः त्रिकोणराशयः, लग्नेशांशराशेश्चतुर्थराशिः, लग्नाधिपाप्तराशेश्चतुर्थराशिः वा मनुष्याणां मरणलग्नं भवतीति शास्त्रेषूक्तम् । एतेषां संवादविसंवादान् ज्ञात्वैव फलं वक्तव्यम् ।

5.10.10 प्रश्नवशान्मृतिकालनिर्णयः

प्रश्नवशात् मृतिकालं निर्णेतुं विविधा रीतय उक्ताः । ता अत्र संक्षेपेण कथ्यन्ते । यदा प्रश्नकालस्य गुलिकनवांशराशौ मन्दः, उदयलग्ननवांशराशौ गुरुः, आरूढराशौ रविः गुलिकाश्रितराशौ चन्द्रश्च स्थिताः, तदा मृत्युर्भविष्यति । मन्दगुरुरविचन्द्रेषु अनिष्टस्थानस्थित्या दौर्बल्येन वा अधिकदोषप्रदो यः दूतवाक्यान्तिमाक्षरसूचितराशौ यदा सञ्चरति तदा मृत्युर्भवति । यदि उदयलग्ननवांशराशौ चन्द्रः चारवशात् स्थितः तदा रोगो वर्धते ।

चन्द्रनवांशराशौ चन्द्रसञ्चारकाले मोहालस्यं गुलिकस्फुटनवांशराशौ सञ्चारसमये मृतिश्च भवतः । प्रश्नकाले चन्द्रनवांशः गुलिकनवांशश्च एकराशौ स्थितौ चेत् तद्राशौ चन्द्रसञ्चारसमये मोहो भवति । प्रश्नकाले सूर्यस्फुटनवांशः गुलिकनवांशश्च एकराशौ स्थितौ चेत् चारवशात् चन्द्रे तद्राशौ स्थिते मृत्युर्भवति । प्रश्नकालत्रिस्फुटस्य नक्षात्रात् आश्लेषाज्येष्ठारेवतीषु प्रथमा यावती भवति तावत्सु मासेषु वर्षेषु दिनेषु नाडिकासु वा गतेषु मृत्युर्भवति । यदि लग्नेशस्य लग्नांशाधिपो बन्धुरतिबन्धुर्वा स्यात्, वत्सरो वक्तव्यः । समश्चेत् मासः । लग्नेशनवांशयोरैक्ये मृतिर्न भवति । स्वास्थ्यं वक्तव्यमिति केचित् । गुलिकः दिनराशौ चेद्रात्रौ, रात्रिराशौ चेद्दिने च मृतिर्वाच्या । लग्नचन्द्रयोर्यो बलीयान् तत्स्फुटनवांशसूचितसंख्याकैः, दोषयुतप्रश्ने दिवसैः मध्यदोषयुतप्रश्ने मासैः, लघुदोषयुते, वर्षैश्च मृतिर्भवतीति वक्तव्यम् । लग्नांशैष्यविनाडीभिः समैः यथाक्रमं अहर्मासवत्सरैः तदंशपे शत्रौ समौ बन्धौ च क्रमेण मृत्युर्वाच्यः ।

मृत्युप्रदग्रहनवांशैष्यविनाडीभिः समैः यथाक्रमं अहर्मासवत्सरैः लग्नांशाधिपे लग्नेशस्य शत्रौ समे बन्धौ सति, मृतिर्भवति ।

रविकुजमन्दराहुगुलिकत्रिस्फुटमृत्युषु अनिष्टस्थित्यादिभिः दोषप्रदः लग्नांशात् यावति नवांशे स्थितः तावद्दिवसमासवर्षैः दोषस्य गुरुमध्यलघुत्वमनुसृत्य मृत्युं ददाति ।

राहुमृत्युगुलिकत्रिस्फुटकालेषु दोषप्रदः यस्मिन् राशौ स्थितः अथवा प्रश्नकालदुर्निमित्तं यस्मिन् राशौ दृश्यते तस्य त्रिकोणेषु मन्दगुरुरविचन्द्रेषु दोषप्रदस्य ग्रहस्य सञ्चारकालः मृत्युप्रदः ।

उदयलग्नारूढयोः यो बलीयान् तदाश्रितराशेः यावति राशौ, नक्षत्रात् यावति नक्षत्रे द्रेक्काणात् यावति द्रेक्काणे नवांशाद् यावति नवांशे गुलिकमृत्युकालत्रिस्फुटादिषु अधिकदोषयुतः स्थितः, तावद्भिर्दिनैः मासैः वर्षैर्वा मृतिर्वाच्या । दोषमनुसृत्य एतत् निश्चीयते । पृच्छकगृहे प्राणप्रणाशात्, वृक्षपतनात् तत्संसूचितराशिवशाच्च एतद्वक्तव्यम् ।

आरूढादष्टमराशिः, आरूढाष्टमेशाश्रितराशिः उदयलग्नादष्टमराशिः, अष्टवर्गे न्यूनतमाक्षयुतराशिः एतेष्वेकं पृच्छकमरणलग्नं इति ज्ञातव्यम् ।

एवं प्रश्नवशात् निर्याणकालः अनुमीयते ।

| मरणलग्नं कथं ज्ञायते ? |
| --- |
| |

## एकादशोऽध्यायः

### 5.11.0 अवतरणिका

अस्मिन्नध्याये मरणनिमित्तान्युच्यन्ते । अष्टमस्थग्रहवशात्, त्रिदोषसप्तधातुजनितरोगाः निरूपिताः । एतत् जातकवशात् प्रश्नवशाच्च चिन्त्यम् । ततः प्रश्नवशात् मरणकारणरोगान् वदति । सूर्यादिग्रहवशात्, त्रिस्फुटादिभिश्च तत् निरूपितम् । मरणदेशनिरूपणं जातकवशात् उच्यते ।

### 5.11.1 उद्देश्यानि

- मरणनिमित्तानि
- निर्याणरीतयः

### 5.11.2 मरणकारणम्

क्रमेण मरणम् वह्निसलिलायुधजूर्तिभिः ।
अज्ञातरोगतृट्क्षुद्भिरर्काद्यैरष्टमस्थितैः ॥ 11.1

इति सूर्यादिग्रहसूचितमरणकारणान्युक्तानि ।

पित्तं वातकफौ पित्तं वातपित्तकफाः कफः ।
कफवातौ च वातश्च सूर्यादीनां प्रकीर्तिताः ॥ 11.4

इति ग्रहाणां वातपित्तकफकारकत्वम् । अत्रापि मतभेदाः सन्ति । सूर्यस्य पित्तं, चन्द्रस्य वातकफौ बुधस्य वातपित्तकफाः गुरोः कफः शुक्रस्य वातकफौ, मन्दस्य वातः इति सामान्यो नियमः ।

मन्ददृष्टवशादपि मरणकालव्याधिः ज्ञायते ।

जातकवशात्, यदि रविर्भौमो वा मन्दं पश्यति, दक्षिणभागे रक्तं दूषितं भूत्वा, शरीरे व्रणं जायते । चन्द्रदृष्टिश्चेत् अतिसारेण मृत्युर्भवति । मन्दः बुधदृष्टश्चेत् कम्पः संजायते, गुरुदृष्ट्या पदे श्वययुः दक्षिणाङ्गे वेदना च भवति । शुक्रेण वीक्षिते मन्दे क्षयः शोफः कासश्वासादयश्च भवन्ति । गुलिकदृष्टिरुन्मादं जनयति । यमकण्टकदृष्ट्या मूर्च्छा भवति । अर्धप्रहरदृष्ट्या व्रणं भवति । कालदृष्ट्या न केवलं रोगो भवति किन्तु सञ्चरन् रोगी मृतिं प्राप्तोनि । एतत्सर्वं प्रश्नेऽपि चिन्त्यम् ।

जननसमये गुलिको यस्मिन् नवांशे स्थितः, तस्मात् सप्तमे शुभग्रहस्थितिः सुमृत्युं ददाति । एवं स्थिताः पापाः दुर्मृतिं ददति । स रविश्चेत्, राजकोपान्मृतिः, क्षीण्चन्द्रश्चेत् जले मृत्युः, भौमश्चेत् युद्धे मृत्युः । राहुश्चेत् सर्पदंशः अथवा विषभुक्तिः मृत्युकारणं, भवति । प्रश्नेऽपि एतच्चिन्त्यम् ।

जूर्त्या तोयविकारतश्च पिटकाद्युष्णामयैर्वायुना
गुल्माङ्गोत्थितवेदनाभिरधिकं शोफप्रमेहक्षयैः ।
कासश्वाससमीरतो मृतिरिनादीनां शनौ त्र्यंशगे
त्र्यंशेशा यदि ते हि वीक्षितयुता मृत्युर्विषोत्थामयैः ॥ 11.14

इति वचनात् मन्द्राश्रितद्रेक्काणोऽपि मृत्युकारणं सूचयति । एवं मन्दः रविद्रेक्काणे चेद् जूर्त्या मृत्युर्भवति । कुजस्य द्रेक्काणे चेत् पिटकाद्युष्णरोगैर्मरणम् । बुधस्य द्रेक्काणे चेत् वायुकोपान्मृतिः । गुरोर्द्रेक्काणे चेत् गुल्मादिभिः शरीरवेदनादिभिश्च मृतिः । शुक्रद्रेक्काणे चेत् शोफप्रमेहक्षयैर्मृत्युः । मन्दद्रेक्काणे चेत् कासश्वासवातादिभिः मरणं भवति । यदि मन्दद्रेक्काणाधिपः राहुयुतश्चेत् विषसंबन्धरोगैर्मृतिर्भवति ।

यदि मन्दः शुभग्रहराशौ शुभनवांशे स्वक्षेत्रमूलक्षेत्रोच्चक्षेत्रेषु गुरुक्षेत्रे वा स्थितः स्वगृहे पुत्राणां मध्ये ससुखं म्रियते । यदि मन्दः गुरुक्षेत्रांशेषु स्थितः तदा एतद्विशेषतश्चिन्त्यम् ।

"स्वन्तः प्रत्ययिता नरेन्द्रभवने सत्पुत्रजायाधनः जीवक्षेत्रगतेऽर्कजे" इति बृहज्जातकवचनमपि अत्रानुसन्धेयम् । यदि मन्दः नीचे शत्रुक्षेत्रे वा स्थितः बन्धुहीनो दुःखितश्च मृतिसमये भवति । सर्पद्रेक्काणस्थिते राहुगुलिकयोगः सर्पदंशं सूचयति ।

जन्मसमये यदि मन्दः रविक्षेत्रे भौमक्षेत्रे वा स्थितः तयोरेकः अग्निभूते स्थितः सन् राहुगुलिकयोगदृष्टियुतश्चेत् तदा मृत्युरग्नौ भवति । एवं जलमययोः चन्द्रशुक्रयोः जलान्मृत्युः ।

मन्दः कोलमुखत्र्यंशे स्थितश्चेत् मृगगणैर्मृतिः । गृध्रप्रधानत्र्यंशे चेत् पक्षिभिर्मृतिः ।

### 5.11.3 प्रश्नवशात् मरणकारणम्

प्रश्नवशात् अष्टमराशिद्रष्टृसूचितरोगः मृतेः कारणम् भवति । यदि न कोऽपि अष्टमं पश्यति अष्टमस्थग्रहेण मृतिकारणं ज्ञायते । यदि न कोऽपि तत्र स्थितः, तदा अष्टमेशः मृत्युकारणं सूचयति ।

रविः अत्यन्तवेदनामन्तर्ज्वरं कृत्वा तद्द्वारा मृत्युं ददाति । चन्द्रः ऊर्ध्वमुखराशौ चेत् छर्दिकां अधोमुखराशौ चेत् अतिसारप्रमेहौ, यत्रकुत्रापि स्थितः शोफं च जनयन् मृत्युं करोति । कुजः उष्णप्रसरणं दाहं, रक्तक्षोभभवं व्रणं कुर्वाणः मृत्युदो भवति । बुधः शीतज्वरेण सन्निपातेन बुद्धिभ्रमेण च मृत्युं ददाति । गुरुः बुद्धेरनार्जवेन मरणं ददाति । शुक्रः अजीर्णेन श्वयथुना दाहेन मोहेन च मृत्युं ददाति । तृष्णारोचक समस्ताङ्गपीडाद्यैः मन्दःमृत्युं तनोति । राहुः वायुक्षोभं ददाति । केतोर्नोक्तम् । राहुवदिति अनुमेयम् । गुलिकः सिरोद्गमं जनयति । ग्रहैः रोगनिर्णयसमये एतत्सर्वं सर्वदा उपयुज्यते ।

त्रिस्फुटं यदि सूर्यादीनामंशयुतं तदा तत्सूचितरोगः मृत्युकारणं भवति । यदि चन्द्रे उदयनवांशे सति रोगः मनागपि वृद्धिमेति, तदा पृच्छकः तद्रोगेणैव मृतिं प्राप्नोति ।

लग्नमान्द्यंशकाभ्यां, पात्रभञ्जनादिलक्षणैश्च त्रिस्फुटनक्षत्रेण पूर्वोक्तरीतिभिः मरणलक्षणानि चिन्त्यानि ।

मृत्युस्फुटेनापि मरणलक्षणं चिन्त्यम् । यदि रविर्मृत्युस्फुटाधिपः भवेत्, तदा पृच्छकगृहसमीपे जनकलहः, तदनन्तरं मृत्युश्च वक्तव्यौ । एवं चन्द्रश्चेत् नार्यागमनं कुजश्चेत् गुलक्षीरानयनं, बुधश्चेत् विद्वदागमनं, गुरुश्चेत् द्विजागमनं, शुक्रश्चेत् ब्राह्मणचतुष्पान्नाशः मन्दश्चेत् नीचदुष्टागमनं च मृत्युलक्षणानि भवन्ति । यदि मृत्युस्फुटं राहुयुतं, तदा भिक्षुकसर्पागमनं मरणलक्षणं भवति । केतुयोगश्चेत्पतनं मरणलक्षणं भवति । त्रिस्फुटचन्द्रभौमयोगः पात्रभञ्जनेन मरणं सूचयति । त्रिस्फुटांशः वृषकर्कटतुलास्वेकतमश्चेत्, तद्राशौ चन्द्रस्य शुक्रस्य वा योगदृष्टिश्चेत्, तन्नवांशराशिरधोमुखराशिश्चेद् वा अतिसारः मरणकारणं भवति । तद्राशिः तिर्यङ्मुखश्चेत् शोफः मरणकारणं भवति । एतद्राशिः रविभौमक्षेत्रे सति, रविभौमदृष्टः, रविभौमयुतः वा चेत्

उष्णसञ्चारदाहौ वक्तव्यौ । एवं बुधे सति चेतोवाक्स्तम्भनं वाच्यम् । गुरौ बुद्धिभ्रमः सूचकवाणी च मृत्युं सूचयतः । मन्दे श्वासरोधः मृतिकारणं भवति ।

5.11.4 मरणदेशः

यदि अष्टमराशिश्चरश्चेत् विदेशे मृत्युर्भवति । यदि स्थिरश्चेत् स्वदेशे मृतिर्भवति । उभयराशिश्चेत् मध्येमार्गं मृत्युः । ग्राम्यराशिश्चेत् ग्रामे मृत्युः । जलराशिश्चेत् जले मृत्युः । शुभक्षेत्रं चेत् स्वच्छस्थले, पापक्षेत्रं चेन्म्लेच्छदेशे इति वक्तव्यम् । अधोमुखराशिश्चेत् निम्नप्रदेशे, ऊर्ध्वमुखश्चेत् उन्नतप्रदेशे च मृत्युः । वराहहोरायां जन्मकाललक्षणाध्याये उक्तान्यपि अत्र उपयोक्तुं शक्यते ।

स प्राणी चेदन्यखेटैः समेतः
सन्दृष्टे वा तेषु वीर्यान्वितस्य ।
लग्नांशाधीशस्य वा देहभाजां
देवाम्ब्वादिस्थानभेदेषु मृत्युः ॥ 11.36

इति वचनमनुसृत्यापि देशो वक्तव्यः । लग्नस्थितो ग्रहः, लग्नाधिपयुक्तग्रहः, लग्नद्रष्टा, लग्नाधिपद्रष्टा एतेषु यो बलिष्ठः तमनुसृत्य मरणगृहस्वभावो वाच्यः । तदर्थं “जीर्णं संस्कृतमर्कजे......” इति वराहमिहिरवचनं अनुसन्धेयम् ।

| |
|---|
| मरणदेशः कथं ज्ञायते ? |

**एकाङ्कप्रश्नाः**

1. आयुर्योगाभावे कथं मृत्युर्ज्ञायते?
2. कालचक्रदशायां मीनाधिपगुरोरनन्तरं कीटाधिपकुजस्य दशा कीदृशी?
3. द्वाविंशत्यंशपो यत्र स्थितः, तस्मिन् मन्दचारकालः कीदृशः?
4. रात्रिजन्मनां मान्दित्रिकोणे मन्दचारकालः कीदृशः?
5. यदि रविश्चरस्थितः, तदा रविचारवशात् किञ्चित् मृतिलक्षणं कथयत ।
6. यदि रविः स्थिरस्थितः तदा रविचारवशात् किञ्चित् मृतिलक्षणं कथयत ।
7. अष्टकवर्गवशात् कथं मृत्युर्ज्ञायते?
8. त्रिस्फुटवशात् कथं मृत्युर्ज्ञायते?
9. चन्द्रराशेः द्वादशजन्माष्टमगाः दिनकरभौमशनिजीवाः किं कुर्वन्ति?
10. अष्टमस्थो रविः कथं मरणं ददाति?
11. अष्टमस्थः चन्द्रः कथं मरणं ददाति?
12. अष्टमस्थः कुजः कथं मरणं ददाति?
13. सूर्यस्य धातुः कः?
14. त्रिदोषेषु कुजः कं सूचयति?
15. चन्द्रद्रेक्काणस्थितः शनिः कथं मृत्युं करोति?
16. प्रश्नवशात् बुधसूचितरोगान् कथयत ।
17. मृत्युस्फुटपतिः चन्द्रश्चेत् किं फलम्?
18. अष्टमराशिः चरश्चेत् कीदृशो मृत्युः?
19. अष्टमराशिरुभयश्चेत् कीदृशो मृत्युः
20. जननसमये लग्नांशपयोः प्राणिना आश्रितराशिः अरण्यराशिश्चेत् मृत्युः कुत्र भवति?

**उत्तराणि**

1. ग्रहाणां दोषदायिषु दशापहारेषु ।
2. कष्टप्रदा ।

3. मृतिप्रदः ।
4. मरणप्रदः ।
5. सूर्याश्रितद्वादशांशराशौ त्रिकोणे वा रविचारकाले मृतिः ।
6. अष्टमाधिपाश्रितनवांशप्राप्तराशौ त्रिकोणे वा रविचारकाले मृतिः ।
7. ग्रहः स्वाश्रितराशेः द्वितीयपञ्चमनवमद्वादशेषु स्वन्यूनदृष्टियुते न्यूनाक्षयुते राशौ चारवशात् स्थिते मृतिः ।
8. त्रिस्फुटनक्षत्रात् आश्लेषाज्येष्ठारेवतीषु आद्या यावती तावद्वत्सर मासाहर्नाडिकान्ते ।
9. वित्तक्षयं प्रवासं रोगान् मरणभीतिं च जनयन्ति ।
10. अग्निना ।
11. जलेन ।
12. आयुधेन ।
13. अस्थि ।
14. पित्तम् ।
15. तोयविकारमहोदरादिभिः ।
16. शीतज्वरः, मतिभ्रमः ।
17. वनितागमः मृत्युप्रदः ।
18. विदेशे ।
19. मध्येमार्गम् ।
20. अरण्ये ।

**पञ्चाङ्काः प्रश्नाः**

1. मरणलग्नं कथं ज्ञायते?
2. मरणाकालचिन्तने सामान्यनियमाः के?
3. आयुर्निर्णयः कथं योगवशात् दशावशाच्च कृतः?
4. सूर्यादीनां त्रिदोषभेदाः कथं कथिताः?
5. लग्नादष्टमराशिमनुसृत्य कथं मृत्युर्वाच्यः?
6. मरणदेशः कथं ज्ञायते?

**दशाङ्काः प्रश्नाः**

1. मन्दचारेण निर्याणकालः कथं ज्ञायते?
2. जीवचारात्कथं मृतिर्ज्ञायते?
3. रविचारेण मृतिकालः कथं ज्ञायते?
4. मन्दद्रष्टृवशात् कथं मरणकालव्याधिः ज्ञायते?
5. सूर्यादिकृतान् मृत्युकारणभूतान् रोगान् कथयत ।

**विंशत्यङ्कौ प्रश्नौ**

1. प्रश्नवशात् मृतिकालः कथं निर्णीयते?
2. मन्दस्य विविधद्रेक्काणवशात् मृतिलक्षणानि कथयत ।

# षष्ठो विभागः

## (द्वादशाध्यायः त्रयोदशाध्यायश्च)

द्वादशोऽध्यायः

### 6.12.0 अवतरणिका

अस्मिन्नध्याये रोगविशेषा निरूपिताः । आदौ सामान्यनियमाः कथिताः । ततः निजरोगाः, आगन्तुकरोगा इति विभागः कृतः । निजरोगोऽपि शरीरोत्थचित्तोत्थभेदात् द्विविधः । आगन्तुकः दृष्टादृष्टनिमित्तभेदाद् द्विविधः । ते सर्वे निरूपिताः । उन्मादादिरोगाः चिकित्सासंप्रदायाश्च कथिताः । सूर्यादिग्रहसूचितरोगाः उक्ताः ।

### 6.12.1 उद्देश्यानि

- रोगनिर्णयः
- रोगभेदाः
- उन्मादादिरोगाः चिकित्साश्च

### 6.12.2 पृच्छकस्य स्वास्थ्यम्

यदि पापाः तृतीयलाभयोः स्थिताः, शुभग्रहाः षष्ठाष्टमव्ययेतरस्थानेषु स्थिताः, गुलिकः द्वितीयतृतीयषष्ठलाभव्ययेष्वेकतमभावे स्थितः, तदा पृच्छकस्य व्याधिर्नास्तीति वक्तव्यम् । उक्तेतरस्थानेषु शुभाः, पापाः गुलिकश्च स्थिताश्चेत् पृच्छकस्य सर्वाङ्गानि पीडितानि इत्यवगन्तव्यम् । मिश्रस्थितिश्चेत् मिश्रफलं वक्तव्यम् ।

### 6.12.3 विविधरोगाः

सूर्यादीनां कुक्षि¶न्मूर्धवक्षां
स्यूरू वक्त्रं जानुनी चाङ्घ्रियुग्मम् ।
अङ्गानि स्युर्व्याधयोऽङ्गे ग्रहाणां
वक्तव्या दौर्बल्यदौःस्थ्यादिभाजाम् ॥ 12.7

सूर्यस्य कुक्षिः, चन्द्रस्य ¶दयं, कुजस्य शिरः, बुधस्य वक्षः, गुरोरूरू, शुक्रस्य मुखं, मन्दस्य जानुनी, राहोरङ्घ्रियुग्मं इति अङ्गानि विभज्यन्ते । केतोरङ्गं नोक्तम् । राहोः वामाङ्घ्रिः केतोः दक्षिणाङ्घ्रिश्च इति कल्प्यताम् । अङ्गसूचकाः ग्रहाः यदि दुर्बला दुःस्थाश्च, तदा तदङ्गे दोषो वक्तव्यः ।

वराङ्गपूर्वावयवा निधेया
लग्नादिभावेष्वधिपेषु चैषाम् ।
सक्रूरभावग्रहसंस्थमङ्गं
सव्याधिकं प्रष्टृजनस्य वाच्यम् ॥ 12.8

लग्नं तदधिपश्च शिरः सूचयतः । धनधनाधिपौ मुखं सहजसहजाधिपौ वक्षः चतुर्थचतुर्थाधिपौ ¶dyं पञ्चमपञ्चमाधिपौ क्रोडं, षष्ठषष्ठाधिपौ वासोभृतं सप्तमसप्तमाधिपौ वस्तिं अष्टमाष्टमाधिपौ व्यञ्जनं नवमनवमाधिपौ ऊरुयुगलं दशमदशमाधिपौ जङ्घे लाभलाभाधिपौ जानुनी, व्ययव्याधिपौ अङ्घ्रिद्वयं च सूचयन्ति इति साधारणो नियमः । भावो भावाधिपो वा पापनिरीक्षितयुतश्चेत् तद्भावसूचितावयवे व्याधिर्वाच्यः ।

स्पृष्टेन राशिना प्रष्ट्रा चारूढेनोदयेन च ।
रोगस्थानं वदेदुक्तमारूढविषये हि तत् ॥ 12.9

प्रष्टा यं अवयवं स्पृशति आरूढलग्नं उदयलग्नं वा यं अवयवं सूचयति स रोगस्थानमित्यवगन्तव्यम् ।

6.12.4 वातपित्तकफरोगाः

रविः वातयुतकफरोगान् जनयति । वराहमिहिरेण केवलपित्तमेवोक्तम् । चन्द्रः वातकफरोगान् करोति । क्षीणचन्द्रस्तु स्वाश्रितराशिनाथगुणं करोति । पूर्णचन्द्रः कफमात्रं सूचयति । जलराशिस्थचन्द्रोऽपि कफमात्रं जनयति । भौमस्य पित्तम् । बुधस्य पित्तमारुतकफजनकत्वम् । गुरुः वातकफरोगान् जनयति ।

वराहमिहिरमते कफमात्रमेव । शुक्रस्य वातकफरोगाः । मन्दस्य पित्तयुतवातः । वराहमिहिरमते वातमात्रम् । एतन्मते रवेः मन्दस्य च वातपित्ते । तथापि रवेः पित्ताधिक्यं, मन्दस्य वाताधिक्यम् । गुरोः कफप्राधान्यवातस्तदुपबृंहकम् । रोगनिर्णये रोगकारकग्रहान् ज्ञात्वा वातपित्तकफमयान् रोगान् निर्णेतुं शक्यते ।

6.12.5 रोगविभागाः

रोगाः निगजरोगाः, आगन्तुगरोगाः इति द्विविधाः । निजरोगाः शरीरोत्थाः चित्थोत्था इति द्विविधाः । आगन्तुकरोगाः दृष्टनिमित्ताः अदृष्टनिमित्ता इति द्विविधाः । निजरोगाः वातजन्याः पित्तजन्याः, कफजन्याः, संसर्गजन्या इति चतुर्विधाः । संसर्गजन्याः, वातपित्तजन्याः, वातकफजन्याः, पित्तकफजन्याः, सन्निपातजन्याः इति चतुःप्रकाराः ।

6.12.6 उन्मादरोगः

लग्नस्थे धिषणे दिवाकरसुतो भौमोऽथवा द्यूनगो
मन्दे लग्नगते मदात्मजतपःसंस्थौ महीनन्दनः ।
मूर्तौ मूढशशीन्दुजौ कृशशशी मन्दश्च रिःफस्थितः
पापोपेतकृशामृतांशुरुदयायुःस्वान्तधर्मोपगः ॥ 12.31
अस्ते पापयुते मान्दिर्वित् त्रिषष्ठाष्टमान्त्यगः ।
उन्माददायिनो योगा एवमष्टौ समीरिताः । 12.32

(१) लग्ने गुरुः मन्दः सप्तमे, (२) लग्ने गुरुः भौमः सप्तमे, (३) लग्ने मन्दो भौमः पञ्चमे सप्तमे नवमे वा, (४) लग्ने मौढ्ययुतबुधचन्द्रौ, (५) क्षीणचन्द्रयुतो मन्दो द्वादशे, (६) पापयुतः क्षीणचन्द्रः लग्ने, द्वितीये, द्वादशे, अष्टमे, नवमे वा (७) पापयुतो मन्दिः सप्तमे (८) पापयुतो बुधः तृतीये षष्ठे, अष्टमे, द्वादशे वा, इति अष्टौ उन्मादजयोगा प्रश्नमार्गे द्रष्टव्याः ।

हर्षः, भयं, इच्छा, दुःखं, इत्यादीनां अमितवर्धनं विरुद्धान्नभक्षणं, अशुद्धान्नभक्षणं, गुरुदेवमहत्कोपः, इत्येतानि उन्मादकारणानि ।

उन्मादरोगाः, वातोन्मादाः पित्तोन्मदाः, कफोन्मादाः, सन्निपातोन्मादाः, आगन्तुकोन्मादः इति पञ्चविधाः ।

अस्थानहासः, आस्फोटनं, क्रन्दनं, गीतालापनं, नर्तनं, रोदनं, अस्थिरस्थितिः, अङ्गविक्षेपः, ताम्रकृशमृदुतनुः जीर्णभक्षणेन रोगवर्धनं, बहुभाषित्वं इत्येतानि वातोन्मादलक्षणानि ।

संरम्भः अमर्षः, वैराग्यं, अभिद्रवणं, तर्जनं,

छायाशीतान्नतोयेच्छा, रोषः, शीतोष्णशरीरत्वं इत्यादीनि पित्तोन्मादलक्षणानि । नारीविजनप्रियता, निद्रारुचिः, मनाग्भाषित्वं, लालाच्छर्दिः, भक्षणेन बलवर्धनं, नखादिषु शुक्लता इत्येतानि कफोन्मादलक्षणानि । मिश्रलक्षणानि सन्निपातोन्मादसूचकानि । आगन्तुकोन्मादस्तु देवासुरग्रहबाधाजनितोन्मादः । देवग्रहबाधया शक्तिः वाक् इत्यादीनां वर्धनम् ।

एवमुन्मादलक्षणानि संक्षेपेणोक्तानि ।

विषमाशनं अशुचिभोजनं, उपवासः, भयं, वैराग्यं, मुधाकोपः शत्रूणामाभिचारः, गुरुवृद्धनिन्दा, अग्निनिन्दा, देवनिन्दा इति दशकारणानि उन्मादस्य पूर्वाचार्यैरुक्तानि । दशसु कारणेषु सत्स्वपि वातोन्मादः, पित्तोन्मादः, कफोन्मादः इति त्रिषु विधेषु एव रोगाः परिणमन्ति ।

तेषां चिकित्सारीतयः ग्रन्थेषु द्रष्टव्याः ।

### 6.12.7 अपस्मारः

अपस्मारलक्षणमेवमुक्तं प्रश्नमार्गे । गलदङ्गः भूमौ निपतति । आस्ये फेनमुद्गिरति । परुषवाक्यं वदति । चिराय क्षीणः सन् व्यावृत्ताक्षो दशनं दशति । पीतवर्णः प्रमादी तोयासक्तो विकृतवदनश्च भवति । अपस्मारस्य श्वसना, मलिना, क्षिप्रा, जृम्भिका, अनशना, त्रासनी, मोहनी, रोदनी, क्रोधनी, तापनी, शोषणी, ध्वंसिनी इति दूत्यो द्वादश । अपस्मारः एतासां दूतीनां नियन्ता भूत्वा, स्वेच्छया रोगिणं दूतीमुखेन पीडयति । नामानुसारिणीं चेष्टां दूत्या कारयति । रोदनापीडा

चेत् रोगी रोदिति । अनशनापीडा चेत् न भक्षयति इत्येवं सर्वासामपि दूतीनां प्रवृत्तयः अवगन्तव्याः ।

अपस्मारस्य कूश्माण्डबलिः, सुदर्शनमन्त्रेण अथवा क्रोधाग्निमन्त्रेण तिलहवनं च कुर्यात् । घोरापस्मारशान्तये प्रत्यक्षर सहस्रेण हवनं कुर्यात् ।

ग्रहकृतरोगाः

पित्तोष्णज्वरतापदेहतपनापस्मार¶‖त्कोडज
व्याधीन् वक्ति रविर्दृगार्त्यरिभयं त्वग्दोषमस्थिस्रुतिम् ।
काष्ठाग्न्यस्त्रविषार्तिदारतनयव्यापच्चतुष्पाद्भयं
चोरक्ष्मापतिधर्मदेवफणभृद्भूतेशभूताद्भयम्॥ 12.66
निद्रालस्यकफातिसारपिटकाःशीतज्वरं चन्द्रमाः
शृङ्ग्यब्जाहतिमग्निमान्द्यकृशतायोषिद्व्यथाकामिलाः ।
चेतःश्रान्तिमसृग्विकारमुदकाद्भीतिं च बालग्रहा
द्दुर्गाकिन्नरधर्मदेवफणभृद्यक्षाच्च पीडां वदेत् ॥ 12.67
तृष्णासृक्कोपपित्तज्वरमनलविषास्त्रार्तिकुष्ठाक्षिरोगान्
गुल्मापस्मारमज्जाविहतिपरुषतापामिकादेहभङ्गान् ।
भूपारिस्तेनपीडासहजसुतसु¶‖द्वैरयुद्धं विधत्ते
रक्षोगन्धर्वघोरग्रहभयमवनीसूनुरूर्ध्वाङ्गरोगम्॥ 12.68
भ्रान्तिं दुर्वचनं दृगामयगलघ्राणोत्थरोगान् ज्वरं
प्रित्तश्लेष्मसमीरजं विषमपि त्वग्दोषपाण्ड्वामयम् ।
दुःस्वप्नं च विचर्चिकां निपतनं पारुष्यबन्धश्रमान्
गन्धर्वक्षितिहर्म्यवासिमयुभिर्ज्ञो वक्ति पीडां खगैः ॥ 12.70
गुल्मान्त्रज्वरशोकमोहकफजश्रोत्रार्तिमेहामयान्
देवस्थाननिधिप्रपीडनमहीदेवेशशापोद्भवम् ।
रोगं किन्नरयक्षदेवफणभृद्विद्याधराद्युद्भवं

जीवः सूचयति स्वयं बुधगुरू[1]कृष्णापचारोद्भवम् 12.71

पाण्डुश्लेष्ममरुत्प्रकोपनयनव्यापत्तितन्द्रीश्रमान्
गुह्यास्यामयमूत्रकृच्छ्रमदनव्यापत्तिशुक्लस्रुतीः ।
वारस्त्रीकृतदेहकान्तिविहतिं शोफामयं योगिनी
यक्षीमातृगणाद्भयं प्रियसु¶द्भङ्गं सितः सूचयेत् ।। 12.72

वातश्लेष्मविकारपादविहतीरापत्तितन्द्रीश्रमान्
भ्रान्तिं कुक्षिरुगन्तरुष्णभृतकध्वंसं च पार्श्वाहतिम् ।
भार्यापुत्रविपत्तिमङ्गविहतिं ¶त्तापमर्कात्मजो
वृक्षाश्मक्षतिमाह कश्मलगणैः पीडां पिशाचादिभिः । 12.73
स्वर्भानुस्तनुतापकुष्ठविषमव्याधीन् विषं कृत्रिमं
पादार्तिं च पिशाचपन्नगभयं भार्यातनूजापदम् ।
ब्रह्मक्षत्रविरोधशत्रुजभयं केतुस्तु संसूचयेत्
प्रेतोत्थं च गदं विषं च गुलिकः सर्पार्तिमाशौचकम् ॥12.74

सूर्यादिग्रहसूचितरोगाः शास्त्रेषूक्ताः । प्रश्नमार्गेऽपि शास्त्रमनुसृत्य रोगा उक्ताः ।

रविः पित्तं, उष्णज्वरं, तापं, पतनं, अपस्मारं, ¶द्रोगं, उदररोगं, नेत्ररोगं, त्वग्दोषं, अस्थिस्रावं, कुष्ठं, अग्निभयं, अस्त्रोपद्रवं, विषभयं, चतुष्पाद्भयं च सूचयति । यदि रविरनिष्टस्थानस्थितः तदा एते रोगाः सूचिताः ।

अनिष्टस्थानस्थितः चन्द्रः निद्रां, आलस्यं, कफं, अतिसारं, शीतज्वरं, पिटकाः, शृङ्गिपशुघातं, जलजोपद्रवं, अग्निमान्द्यं, अरुचिं, देहकार्श्यं, कामिलां, मनःश्रान्तिं, रक्तविकारजरोगान्, जलभीतिं च सूचयति ।

---

[1] एतत्प्रामादिकम् । अनुष्ठानपद्धतावपि एवमेव दृश्यते । “बुधगुरुश्रीकृष्णकोपोद्भवं” इति चेत् साधु ।

अनिष्टगो भौमः तृष्णां, रक्तकोपं, पित्तज्वरं, अग्निविषायुधकृतार्तिं, कुष्ठं, नेत्ररोगं, गुल्मं, अपस्मारं, मज्जानाशं, शरीरपारुष्यं, पामिकां, देहभङ्गान्, ऊर्ध्वाङ्गरोगं च विधत्ते ।

अनिष्टस्थानस्थितो बुधः भ्रान्तिं नेत्ररोगं, दुर्वचनभाषणं, गलघ्राणोत्थरोगान्, ज्वरं, वातपित्तकफात्मकरोगान्, दुःस्वप्नं, विचर्चिकां, निपतनं च सूचयति ।

अनिष्टगो गुरुः गुल्मं, आन्त्ररोगं, ज्वरं, दुःखं, शोकं, मोहं, कफजरोगं, श्रवणरोगं, प्रमेहं, च सूचयति ।

अनिष्टगः शुक्रः पाण्डुरोगं, कफं, वातं, कोपजनितरोगान्, नेत्ररोगं, श्रमं, प्रमेहं, गुह्यरोगं, मुखरोगं, मूत्रकृच्छ्रं, मदव्यापत्तिं, शुक्लस्रुतिं, वारस्त्रीकृतदेहकान्तिनाशं, शोफं च वितनुते ।

अनिष्टगो मन्दः वातकफरोगं, पादरोगं, विविधापदः, तन्द्रीं, श्रमं, चित्तभ्रमं, कुक्षिरोगं, उदररोगं, अङ्गवैकल्यं, मनोदुःखं, वृक्षाश्मघातं च सूचयति ।

अनिष्टगो राहुः तापं कुष्ठं, विषमव्याधिं (अथवा विविधरोगाणां युगपत्प्रवृत्तिं), पादरोगं च तनोति । केतुः राहुवत्फलं ददाति । तदुपरि प्रेतोपद्रवं (मानसिकपीडां) च कुरुते । गुलिकः राहुकेतुसदृशः । सर्पपीडां आशौचं विषभयं च सूचयति ।

| |
|---|
| लग्नादयः तदधिपतयश्च कानि कानि अङ्गानि सूचयन्ति ? |

## त्रयोदशोऽध्यायः

### 6.13.0 अवतरणिका

अस्मिन्नध्याये रोगारम्भावसानकालादि निरूप्यते । तदर्थं विविधरीतयः कथिताः । ग्रहस्थितिवशात्, लग्नवशात्, दूतस्थितिवशाच्च मार्गाः उक्ताः । अनन्तरं शमनसमयोऽप्युक्तः । “जन्मान्तरकृतं पापं व्याधिरूपेण जायते । तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः ॥” इति नियममनुसृत्य कर्म कर्तव्यम् । तत् विस्तरतः उक्तम् ।

### 6.13.1 उद्देश्यानि

- रोगारम्भावसानकालौ
- रोगशमनम्

### 6.13.2 रोगारम्भावसानकालनिरूपणम्

आरूढाद्भवने तु यावति गदस्थानाधिपः संस्थितो
मासे तावति वह्निभास्वादुडुवारे वाथ रुग्जायते ।
यावत्प्रश्नमतोऽरिपाप्तमुडु तावन्तं गदारम्भणे
ब्रूयात्कालमनेन भुक्तनवभागघ्नं गदेशस्य वा ॥ 13.9

अष्टमीपूर्वरिक्तासु पापवारे त्रिजन्मसु ।
गोमासाष्टमचन्द्रेषु रोगारम्भो मृतिप्रदः ॥ 13.18

परिपूर्णतनुश्चन्द्रो
लग्नोपेतो निरीक्षितो गुरुणा
गुरुशुक्रौ केन्द्रे वा
पीडार्तस्तत्र सुखितः स्यात् ॥ 13.27

उपचयसंस्थश्चन्द्रः
सौम्याः केन्द्रे त्रिकोणमृतिगाः
लग्नं वा शुभदृष्टं
सुखितस्तत्रातुरो वाच्यः ॥ 13.28

इति रोगारम्भवसानकालौ विशदीकृतौ ।
रोगारम्भकालनिर्णयार्थं वहवो मार्गा दर्शिताः । केचिदत्र निरूप्यन्ते ।

उदयलग्ननक्षत्रात् चन्द्रो यावति नक्षत्रे स्थितः, चन्द्रात् तावति नक्षत्रे रोगारम्भो वाच्यः ।

गुलिकस्फुटं नवभिर्हत्वा गुलिकनवांशस्फुटं लभ्यते । तत् द्वादशभिर्हत्वा गुलिकनवांशद्वादशस्फुटं लभ्यते । तत्सूचिते नक्षत्रे चन्द्रचारकाले रोगारम्भोऽभवदिति वक्तव्यम् । अथवा चन्द्रमान्दिस्फुटं योजयित्वा लब्धे नक्षत्रे चन्द्रचारकाले योगारम्भोऽभूदिति वाच्यम् । एवं त्रयो मार्गा दर्शिताः । एतेषु यदि पृच्छकस्य विपत्प्रत्यरवधतारास्वेका अथवा चन्द्राष्टमराशिस्थतारा स्यात्, सा एव फलकथने स्वीकार्या ।

आदित्यचन्द्रगुलिकमन्देषु अधिकदोषप्रदः (अनिष्टस्थानिस्थितः अथवा बलहीनः) यदा दूतवाक्यसूचितराशौ सञ्चरति, तदैव रोगारम्भोऽभूदिति वक्तव्यम्)

दैवज्ञः रोगिणं दूतं वा यस्मिन् दिशि प्रथमं पश्यति तस्यामेव दिशि रोगारम्भः समभवत् इति वक्तव्यम् । प्राचीतः यावत्यां दिशि दूतः पृच्छको वा स्थितः तत्समसंख्ये यामे रोगः प्रारभत इति वाच्यम् । पृच्छासमये यावन्तो जनाः रोगिणं पश्यन्तः सन्ति व्याध्यारम्भेऽपि तावन्तो जनाः सन्निहिता आसन्निति अवगन्तव्यम् । रोगेशाश्रितराशौ तद्भुक्तभोज्यभागतः रोगस्य गतगन्तव्यकालौ निर्णेयौ । यदि षष्ठाधिपः दिवावीर्ययुतः, अथवा षष्ठराशिस्थग्रहः दिवावीर्ययुतः तदा रोगः दिने प्रारभत इति वक्तव्यम् । अन्यथा निशीति वाच्यम् । षष्ठाधिपो आरूढलग्नात् यावति संस्थितः, तावति मासे दिवसे भास्वदुडुचारे रोगारम्भोऽभूदिति ज्ञातव्यम् ।

षष्ठेशाश्रितराशौ चन्द्रसंचारसमये रोगारम्भोऽभवदिति वाच्यम् । चतुर्थाधिपाश्रितराशौ चन्द्रचारसमये रोगशमनं वक्तव्यम् ।

लग्नलग्नाधिपचन्द्राणां पापयोगदृष्टिसमये रोगारम्भः शुभयोगदृष्टिसमये शमनं चेति वक्तव्यम् । पापाधिक्येन शुभाधिक्येन

च रोगस्य मूर्धन्यावस्था, भागिकशमनं, पूर्णशमनमित्यादीनि वक्तुं शक्यते ।

उत्तराषाढायां, मृगशिरसि वा रोगग्रस्तः मासेनैकेन सुखं प्राप्नोति । श्रविष्ठाहस्तविशाखासु रोगारम्भश्चेत् पञ्चदशदिनेन शमनं भवति । चित्राशतभिषग्भरणीश्रवणनक्षत्रेषु योगारम्भः एकादशदिनात्परं सुखं सूचयति । मघा चेत् त्रिंशद्दिनात्परं रोगी सुखं लभते । पुष्योत्तरफल्गुनीपुनर्वसूत्तरप्रोष्ठपदारोहिणीषु रोगारम्भश्चेत् सप्ताहात् पश्चात् रोगशान्तिर्भवति । यदि मूलाश्विनीकृत्तिकासु रोगारम्भो भवेत् तदा नवदिनात्पश्चात् शमनं भवति । अनुराधारेवत्योः प्रारम्भश्चेत् रोगः कृच्छ्रसाध्यः भवति । ज्येष्ठास्वात्याश्लेषार्द्रापूर्वफल्गुनीपूर्वाषाढापूर्व-भाद्रपदासु प्रारब्धो रोगः असाध्यो भवति । कृत्तिकाश्रविष्ठाभरणी-शततारासु रोगारम्भः रविकुजमन्दवारैः छिद्रातिथिभिश्च सह यदि भवति रोगी मृत्युं व्रजति । कृच्छ्रसाध्यो रोग इति वक्तव्यम् ।

### 16.13.3 सुखप्राप्तिः

यदि पूर्णचन्द्रो लग्नस्थितः गुरुदृष्टः भवेत्, तदा रोगी सुखमाप्नोति । यदि गुरुशुक्रौ केन्द्रस्थितौ, तदा रोगी सुखी भवति । यदि चन्द्रः उपचयगतः, शुभग्रहाः द्वितीयचतुर्थपञ्चमसप्तमाष्टमनवमदशमेषु स्थिताः, लग्नं शुभदृष्टं वा, तदा रोगी सुखी भवति ।

### 16.13.4 रोगकारणं शान्तिकर्म च

> जन्मान्तरकृतं पापं व्याधिरूपेण जायते ।
> तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः ॥ 13.29

> मृत्युञ्जयहवनं खलु
> सर्वरुजां शान्तये विधेयं स्यात् ।
> सर्वेष्वपि होमेषु
> ब्राह्मणभुक्तिस्तथा तथाप्तवचः ॥ 13.36

'जन्मान्तरकृतं पापं व्याधिरूपेण जायते' इति वचनम् । रोगकारणं विविधप्रकारेण, कल्प्यते । भूतानां आवेशः कारणमिति

केचित् । केषाञ्चिन्मते वातपित्तकफानां कोप एव कारणम् । अन्ये ग्रहपीडया एव रोगः सञ्जायते इति मन्यन्ते । एतत्सर्वं सत्यमेव । तथापि मूलकारणं जन्मान्तरकर्म एव । कर्मैव बहुप्रकारैः प्रवर्तते । एष सामान्यनियमः ।

औषधं, पथ्यमाहारं, तैलाभ्यङ्गं प्रतिश्रयं च श्रद्धया रोगिभ्यो दत्वा रोगी सुखं प्राप्नुयात् । सर्वेषामपि रोगाणां शान्तये मृत्युञ्जयहवनं विधेयम् । सर्वेष्वपि होमेषु ब्राह्मणभोजनं विहितम् । तत्र प्रमाणमाप्तवचनम् । मृत्युञ्जयहवनेन न केवलं आयुर्वृद्धिर्भवति किन्तु तीव्रज्वराभिचारादिशान्तिश्च भवति ।

मृत्युञ्जयहोमः अष्टसहस्रसंख्यया कृत्वा तीव्रज्वरः, तीव्रतराभिचारः, उन्मादः इत्यादीनां शमनं भवति । अष्टसहस्रमित्यनेन अष्टोत्तरसहस्रं ग्राह्यम् । सप्तद्रव्यैः अष्टोत्तरशतं १४४ वारं करणेन संख्या १४४ × ७ = १००८ भवति । मृत्युञ्जयहवनं दूर्वाद्रव्येण अन्यप्रकारैश्च कर्तुं शक्यते । तन्त्रग्रन्थेषु विधयः द्रष्टव्याः ।

| उन्मादस्य दश कारणानि कानि ? |
| --- |
| |

**एकाङ्कप्रश्नाः**

1. अस्थिस्रुतिं कः सूचयति?
2. कः प्रमेहं सूचयति?
3. अपस्मारदूत्यः कति?
4. बालग्रहपीडां कः सूचयति?
5. का जृम्भिता ?
6. शुभानामनिष्टस्थानानि कानि?
7. शुभानामिष्टस्थानानि कानि?
8. शिरः को ग्रहः सूचयति?
9. उरः को भावः सूचयति?
10. राहुः किमङ्गं सूचयति?
11. यदि उत्तराषाढायां रोगः प्रारभते, कदा शान्तिमुपैति?
12. चित्रायां रोगारम्भश्चेत्, शमनं कदा भविष्यति?
13. त्रिजन्मसु रोगारम्भः किं ददाति?
14. पूर्णचन्द्रो लग्ने गुरुनिरीक्षितश्चेत्किं फलम् ?
15. गुरुशुक्रौ केन्द्रिस्थितौ किं कुरुतः?
16. किं व्याधिरूपेण जायते?
17. यदि रोगी औषधमाहारं तैलाभ्यङ्गं प्रतिश्रयं च रोगिभ्यो ददाति, तदा किं भविष्यति?
18. चन्द्र उपचयस्थितः, सौम्याः केन्द्रकोणाश्रिताः, लग्नं शुभदृष्टं च । एवं चेत् किं भविष्यति?
19. सर्वरुजां करणीयं शान्तिकर्म किम्?
20. कीदृशः मृत्युञ्जयहोमः तीव्रज्वराभिचारादीनां परिहारो भवति?

**उत्तराणि**

1. रविः ।
2. शुक्रः ।
3. द्वादश ।
4. बुधः ।

5. एका अपस्मारदूती ।
6. षष्ठाष्टमव्ययभावाः ।
7. लग्नचतुर्थसप्तमदशमपञ्चमनवमद्वितीयाः ।
8. कुजः ।
9. तृतीयः ।
10. चरणौ ।
11. मासादुपरि ।
12. एकादशदिनादूर्ध्वम् ।
13. मृत्युम् ।
14. रोगशमनम् ।
15. रोगशान्तिम् ।
16. जन्मान्तरकृतं पापम् ।
17. रोगमुक्तिः ।
18. आतुरः सुखितो भवति ।
19. मृत्युञ्जयहवनम् ।
20. अष्टोत्तरशतसंख्यया मृत्युञ्जयहवनम् ।

**पञ्चाङ्काः प्रश्नाः**

1. पृच्छकस्य व्याधिर्नास्तीति कथं ज्ञायते? रोगबाधास्तीति कथं ज्ञायते?
2. रोगाः कीदृशाः?
3. सूर्यादिभिः सूचितान्यङ्गानि कथयत? अनेन किं प्रयोजनम्?
4. रोगिणः सुखप्राप्तिः कथं ज्ञायते?
5. किं रोगकारणम्?
6. मृत्युञ्जयहोमः कथं क्रियते?

**दशाङ्काः प्रश्नाः**

1. उन्मादलक्षणानि कथयत ।
2. ग्रहाणां वातपित्तमयामयसूचकत्वं कथम्?

3. अपस्माररोगमधिकृत्य लिखव । शान्तिः का?
4. रोगारम्भनक्षत्राणि कथं रोगशमनकालनिर्णये प्रयुज्यन्ते?
5. रोगशमनार्थं कर्मविपाकं संक्षेपेण कथयत ।

**विंशत्यङ्कौ प्रश्नौ**

1. ग्रहकृतविविधरोगान् विवृणुत ।
2. रोगारम्भावसानकालनिरूपणं विशदयत ।

# सप्तमो विभागः
## चतुर्दशाध्यायः

चतुर्दशाध्यायः

7.14.0 अवतरणिका

अस्मिन्नध्याये भावा निरूप्यन्ते । द्वादशभावैर्निरूपणीयाः विषयाः कथिताः । ततः भावपुष्टिविचिन्तनं प्रतिपादितम् । भावाः शुभग्रहस्वामियुक्तनिरीक्षिताः बलयुता इति साधारणो नियमः । भाावभावाधिपकारकाणां बलहीनत्वं पापमध्यस्थितिः, पापयोगदृष्टियुतत्वं, शत्रुग्रहयोगदृष्टियुतत्वं चतुर्थाष्टमयोः पापस्थितिः पञ्चमनवमयोः पापस्थितिः शुभयोगदृष्टिहीनत्वं इति एकविंशतिलक्षणानि कथितानि । शुभग्रहाणां पापग्रहाणां च इष्टानिष्टस्थितयः कथिताः । शुभानां तृतीयषष्ठाष्टमद्वादशाभावाः अनिष्टप्रदाः, अशुभानां तृतीयषष्ठलाभा इष्टभावाः, अन्ये अनिष्टाः इत्युक्तम् । लग्नस्य प्राधान्यम्, भावेषु । ततः पञ्चमनवमयोः स्थिताः शुभा शुभफलं पापा अशुभफलं च प्रदिशन्ति । विविधग्रहाणां विविधभाववशात् फलानि सविस्तरं कथितानि । उपग्रहाश्च निरूपिताः । ग्रहाणां फलप्रदकालाश्च निरूपिताः ।

7.14.1 उद्देश्यानि

- भावनिरूपणम्
- ग्रहाणां फलप्रदकालनिर्णयः

7.14.2 पृच्छकस्य वयोनिर्णयः

वाच्या सुतादयो भावाः परोक्षस्यापि पृच्छतः ।
सुवचास्ते वचो ज्ञात्वा सततस्तदपि कथ्यते ॥ 14.1

इति वचनात् परोक्षस्यापि पुत्रादिभावाश्चिन्त्याः । तस्य वयोनिर्णयश्च कर्तव्यः ।

यदि चन्द्रः कुजो वा लग्ने स्थितः तत्क्षेत्रं वा लग्नं भवति तदा पृच्छकस्य वयः पञ्चभ्यः ऊनमिति वक्तव्यम् । अत्र बालचन्द्रस्य विशेषतः फलम् । बुधे एवं स्थिते तत्क्षेत्रे वा लग्ने वयः अष्टभ्यः ऊनमिति वाच्यम् । एवं शुक्रे षोडशबर्षेभ्यः ऊनम् । गुरौ त्रिंशत् । रवौ वृद्धचन्द्रे वा सप्ततिः । राहौ शनौ वा सप्ततेरूर्ध्वम् ।

7.14.3 भावकारकत्वम्

देहस्य सौष्ठवं स्वास्थ्यं स्थितिः श्रेयो यशः सुखम् ।
जयो वपुश्च तत्सर्वं चिन्तनीयं विलग्नतः ॥ 14.3

भर्तव्यमखिलं वित्तं वाणी चक्षुश्च दक्षिणम् ।
विद्याश्च विविधा ह्येतत्सर्वं चिन्त्यं द्वितीयतः ॥ 14.4

धैर्यं वीर्यं च दुर्बुद्धिः सहोदरपराक्रमौ ।
दक्षकर्णसहायौ च चिन्तनीयं तृतीयतः ॥ 14.5

माता सु¶न्मातुलभागिनेयौ
क्षेत्रं सुखं वाहनमासनं च ।
लालित्यमम्भः शयनं च वृद्धिः
पश्वादिकं जन्मगृहं चतुर्थात् ॥ 14.6

प्रज्ञा प्रतिभा मेधा
विवेकशक्तिः पुरातनं पुण्यम् ।
मन्त्रामात्यतनूजाः
पञ्चमभात्सौमनस्यमपि चिन्त्यम् ॥ 14.7

तस्करारातिविघ्नाधिव्याधयश्च तनुक्षतिः ।
मरणं वारिशस्त्रेण चिन्तनीयं हि षष्ठतः ॥ 14.8

विवाहमदनालोकभार्याभर्तृसमागमाः ।
शय्यास्त्रीसद्मनष्टार्थमैथुनान्यपि सप्तमात् ॥ 14.9

सर्वप्रणाशो विपदोऽपवादाः
हेतुप्रदेशौ मरणस्य दासः ।
मठादिकं वेश्म गदाश्च विघ्ना
विचिन्तनीयाः पुनरष्टमेन ॥ 14.10

भाग्यधर्मदयापुण्यतपस्तातसुतात्मजाः ।
दानोपासनसौशील्यगुरवो नवमादमी ॥ 14.11

देवालयनगरसभामार्गालयदाससर्वकर्माणि ।
आज्ञालम्बनमेतत्सर्वं चिन्त्यं हि दशमेन ॥ 14.12

सर्वाभीष्टागमो ज्येष्ठभ्राता जाता निजात्मजाः ।
वामकर्णार्थलाभश्च चिन्त्या ह्येकादशेन ते ॥ 14.13

पापं व्ययं च पतनं निरयो वाममम्बकम् ।
स्थानभ्रंशश्च वैकल्यं द्वादशेन विचिन्तयेत् ॥ 14.14

इति भावकारकत्वमुक्तम् ।

विलग्नतः शरीरस्य आरोग्यं अनारोग्यं लक्षणं स्थितिश्च ज्ञेयानि । यशः सौख्यं जयः श्रेयश्च चिन्त्यानि । अन्ये श्लोका अपि स्पष्टार्थाः । एतान्यपि उपलक्षणान्येव । उत्तरकालामृतादिग्रन्थेषु लग्नादीनां कारकत्वं विपुलरूपेण कथितम् । भोजनप्रश्ने राजप्रश्ने च विशेषाः सन्ति । भुक्तिप्रश्ने लग्नं भोक्तुः शरीरं द्वितीयः भोजनपात्रं तृतीयः फलादिभक्ष्यपदार्थं, चतुर्थः अपूपादिभोज्यानि, पञ्चमः भोजयितृभावं षष्ठः उपदंशं सप्तमः तक्रदधिक्षीरादिसेचनद्रव्याणि, अष्टमः अन्नं नवमः सहभुजं दशमः उदरपूरणं एकादशः पूर्तिकथां द्वादशः शयनं च सूचयन्ति ।

राजप्रश्ने लग्नादिभावाः साधारणप्रश्नात् भिन्नाः । तत्र लग्नं राज्ञः शरीरं सूचयति । धनभावः कोशं सूचयति । तृतीयभावेन धनुराद्यायुधानि सैन्यं तत्संबन्धीनि वस्तूनि च सूचितानि । चतुर्थेन विविधानि वाहनानि सूचितानि । प्राचीनकाले गजतुरगादयः । आधुनिककाले यन्त्रप्रेरितवाहनानि । पञ्चमेन मन्त्रालोचना, आमात्यादयश्च सूचिताः । षष्ठेन शत्रवः, सप्तमेन मार्गः, अष्टमेन आयुश्च सूच्यन्ते । नवमभावः मनः सूचयति । दशमेन व्यापारः अथवा नृपस्य विविधोद्यमाः शासनादयश्च सूचिताः । एकादशेन प्राप्तिः अथवा नृपैः अर्जितः भूधनादिलाभः सूच्यते । व्ययभावेन अप्राप्तिश्च सूचिता । एवं राजप्रश्ने लग्नादिभावानां कारकत्वम् ।

7.14.4 भावपुष्टिः

"यो यो भावः स्वामिदृष्टो युतो वा
सौम्यैर्वा स्यात्तस्य तस्याभिवृद्धिः ।
पापैरेवं तस्य भावस्य हानि
निर्देष्टव्यः प्रश्नतो जन्मतो वा ॥" 14.15

इति वचनात् शुभग्रहस्वामियुतेक्षिताः भावाः पुष्टाः इति सिध्यति । भावस्य शुभमध्यस्थितिः शुभकरी । भावस्य चतुर्थदशमयोः शुभाश्चेत्, शुभफलम् । परिशेषन्यायात् पापैरेवं भावस्य हानिर्वच्या । भावः, भावाधिपः, कारकग्रहः एतेषां बलहीनत्वं पापमध्यस्थितिः, पापयोगदृष्टियुतत्वं, शत्रुग्रहयोगदृष्टियुतत्वं चतुर्थाष्टमयोः पापस्थितिः पञ्चमनवमयोः पापस्थितिः शुभयोगदृष्टिहीनत्वं इति एकविंशतिलक्षणानि अशुभकराणि । शुभैरेवं शुभफलम् । मिश्रैरेवं मिश्रफलम्, संवादविसंवादैः फलं वक्तव्यम् ।

7.14.5 अनिष्टभावाः

षष्ठाष्टमव्ययेशाः दुःस्थानाधिपाः । ते अनिष्टप्रदाः । षष्ठेशापेक्षया व्ययेशो अनिष्टप्रदः । तदपेक्षया अष्टमेशः । ते भावाश्रिताः, भावस्थिताः भावं नाशयन्ति । यदि ग्रहाः तैर्युताः तैः सूचिता भावाः नाशं व्रजन्ति । षष्ठाष्टमव्यस्थितग्रहपालितभावाश्च नश्यन्ति ।

7.14.6 बाह्याभ्यन्तरभावाः

लग्नादिद्वादशभावानां कारकत्वं द्विविधं, बाह्याभ्यन्तरभेदात् । शरीरं कुटुम्बं सहोदरः, बन्धुः, पुत्रः, अरिः, पत्नी, निधनं, शुभं, आस्पदं, आयः, रिःफमित्येतानि बाह्यानि । 'कल्पःस्वविक्रमगृहप्रतिभाक्षतचित्तोत्थरन्ध्रगुरुमानभवव्ययाः' इत्युक्तानिं आभ्यन्तराणि । कारको भावनाशाय इति नियमः बाह्ये एव प्रवर्तते । एवं पञ्चमस्थो गुरुः पुत्रविषये न शुभकृत् ।

7.14.7 भावसूचितावयवाः

लग्नेन शिरः, द्वितीयेन मुखं, तृतीयेन गलः, चतुर्थेन स्कन्धः पञ्चमेन ¶दयं, षष्ठेन उदरं, सप्तमेन वस्तिः, अष्टमेन गुह्यप्रदेशः, नवमेन ऊरू, दशमेन जानुनी, एकादशेन जङ्घे, द्वादशेन पादौ च चिन्त्यानि । यदि भावे पापश्चेत् तत्सूचितावयवस्य दोषो वाच्यः । चतुर्थभावे भौमः मन्ददृष्टो भवतु । स्कन्धे व्रणं भविष्यति ।

7.14.8 भावफलानुभवः

यस्य यस्य विलग्नेन संबन्धो लग्नपेन वा ।
दृग्योगकेन्द्रगत्याद्यौः स स भावोऽनुभूयते ॥ 14.43

इति वचनात् यस्य भावस्य लग्नेन लग्नाधिपेम वा संबन्धो भवति, तस्य फलसिद्धिः अनुभूयते । संबन्धशब्देन परिवर्तनयोगदृष्टिकेन्द्र–त्रिकोणस्थितयो ग्राह्याः ।

### 7.14.9 ग्रहाणां इष्टानिष्टस्थितयः

सौम्यग्रहाणां तृतीयषष्ठाष्टमव्ययभावाः अनिष्टाः । इतरे अष्टौ शुभप्रदाः । पापानां त्रिषडायाः इष्टभावाः इतरे अनिष्टा इति साधारणो नियमः । षष्ठभावो पापानामिष्ट इत्युक्तम् । षष्ठस्थः रोगं सूचयति । षष्ठे चेत् पापः तत्सूचितद्रव्याणां लाभं च सूचयति । अर्कश्चेत् ताम्रादीनां लाभः । रोगप्रश्ने पापा रोगप्रदा एव ।

### 7.14.10 ग्रहाणां चारवशात् फलानि

लग्नादिभावेषु चारवशात् यद्यद्भावे तत्तद्भावाष्टमेशः मन्दो वा स्थितः तत्तद्भावानां षष्ठाष्टमव्यायाधिपानां च भुक्तिकालेषु भावनाशो भवति । 'कालाङ्गानि' इति वचनमनुसृत्य रोगाश्च वक्तव्याः ।

### 7.14.11 पापानां शुभानां च भावफलानि

पापे लग्नगते पराजयः शिरोरोगः, दुःखं, स्थानभ्रंशः, द्रव्यनाशः, दुष्कीर्तिः शरीरपीडा इत्यादीनि वक्ताव्यानि । शुभे लग्ने सुखस्थितिः, जयः, आरोग्यं, संपत्समृद्धिः, कीर्तिलाभः, स्थानलब्धिः इत्यादीनि फलानि वक्तव्यानि ।

अर्थे पापे पूर्वार्जितद्रव्यनाशः मुखरोगः, कुटुम्बे रोगः, दक्षिणनेत्रे रोगः, दुष्टोक्तिः, पात्रनाशः, इत्यादीनि फलानि । शुभः एवं स्थितः, पूर्वाधिकधनाभिवृद्धिं, पात्रलाभं, कुटुम्बसौख्यं च वितनुते ।

सहजे पापे सहायनाशः, सहोदरस्य रोगाद्युपद्रवः उरोदक्षिणश्रवणरोगाः बुद्धिदोषः धैर्यदोषः, इत्यादीनि फलानि । शुभे एवं स्थिते सद्बुद्धेरुदयः, धैर्य, सहोदरसुखं, सहायबलं आरोग्यलाभः इत्यादीनि वक्तव्यानि ।

चतुर्थे पापे मातृमातुलभागिनेयबन्धुपशुगृहशयनोपकरणासनक्षे–त्रवाहनानां नाशः, वक्तव्यः । ¶द्रोगः दुःखं कूपतटाकादीनां दोषः

इत्यादीनि वक्तव्यानि । शुभे चतुर्थे वाहनक्षेत्रशयनोपकरणदीनां लाभः सुखप्राप्तिश्च ।

पञ्चमे पापे विशेषतः नीचादिदोषयुते पुत्रादिदोषः, पूर्वपुण्यक्षयः, मनोमान्द्यं, मन्त्रिणां रोगः इत्यादीनि फलानि । शुभे पञ्चमे विशेषतः उच्चादिबलयुते पुत्रलाभः पुत्रारोग्यं, बुद्धिशक्तिः, मनःसन्तोषः इत्यादीनि सूचितानि ।

पापे षष्ठे तद्राशिसूचिताङ्गे व्रणं तस्करशत्रुपीडनं नाभिप्रदेशे रोगः, कार्यविघ्नः, ग्रहसूचितत्रिदोषजनितरोगाः, इत्यादीनि वाच्यानि । सौम्ये एवं स्थिते शत्रुक्षयः रोगाभावः, रोगशमनं इत्यादीनि वक्तव्यानि ।

सप्तमे पापे कलत्रमृतिः, कलत्ररोगः, कलत्रवियोगः, भर्तृमरणं, तद्वियोगः यात्राविघ्नः, मूत्रकृच्छ्ररोगाः, इत्यादीनि वाच्यानि । सप्तमे शुभे विवाहलाभः नष्टद्रव्यप्राप्तिः, प्रोषितवध्वागमः इत्यादीनि वाच्यानि । यदि शुभो बलयुतश्चेत् भार्यागृहनिर्माणं भर्तृगृहनिर्माणमित्यादि ।

रन्ध्रे पापयुते दासजनरोगः कार्यविघ्नः, गुह्यरोगः, राजशत्रुकृतधनादिनाशः, अरोचकादिरोगाः, मृत्युभयं रोगवर्धनमपकीर्तिः इत्यादीनि फलानि । शुभः रन्ध्रे चेत् अरोगता, दीर्घायुः, वृक्षादीनां समृद्धिः, इत्यादीनि वाच्यानि ।

नवमे पापे गुरुजनकपौत्ररोगाः भाग्यनाशः, धर्मनाशः, ईश्वरानुग्रहाभावः, सुकृतक्षयः तपोनाशः दयाहीनता इत्यादीनि फलानि । शुभे नवमे गुरुप्रसादः, पितृप्रीतिः, मनःसंतोषः, ईश्वरानुग्रहः, भाग्यवृद्धिः, दयावृद्धिः, पौत्रसुखमित्यादीनि वक्तव्यानि ।

दशमे पापे कर्मविहतिः, दुष्कीर्तिः, आज्ञाक्षतिः, दासानामवलम्बनाशः, जानुरोगः, विदेशगमनं, इत्यादीनि कथितव्यानि । शुभे कर्मणि स्थिते पद्धतिमण्डपारामादीनां निर्माणं, कर्मप्रसिद्धिः, आज्ञालम्बनयोः सिद्धिः, सत्कीर्तिलाभः इत्यादीनि वक्तव्यानि ।

पापे लाभे पुत्रज्येष्ठयोः रोगोपद्रवः, जङ्घावामश्रवणरोगः, तत्तद्ग्रहसूचितद्रव्यलाभाश्च । शुभश्चेदभीष्टसिद्धिः तत्तद्ग्रहसूचितद्र–व्यलाभः इत्यादीनि सूचितानि ।

पापे व्यये दुर्व्ययः, स्थानभ्रंशः, पादवामनेत्ररोगः इत्यादीनि फलानि । शुभश्चेत् दानशीलत्वं पापशमनं रोगशमनमित्यादीनि ।

ग्रहाणां भावफलानि ग्रन्थेषु द्रष्टव्यानि । अत्र संगृह्य उच्यन्ते ।

आदित्यः अनिष्टस्थितश्चेत् राजकोपः, शिवकोपः, पितृकोपः, ¶द्रोगः, उदररोगः, नेत्ररोगः, अस्थिस्रावः, पित्तजनितरोगाः, अग्निभयं चतुष्पाद्भयं, ताम्रनाशः, आत्मदुःखं इत्यादीनि वक्तव्यानि ।

चन्द्रः अनिष्टस्थितश्चेत् राज्ञीकोपः, मातृकोपः, मातृरोगः, कफवातरक्तजनितरोगाः, वीर्यवद्धिः स्वजनैश्च वैरं, दुर्गाकोपः, कृषिनाशः, कीर्तिभङ्गः इत्यादीनि फलानि ।

भौमः अनिष्टस्थितश्चेत्, सोदरैः वैरं, भूमिनाशः स्वर्णनाशः, अग्निभयं, स्कन्दकोपः, रक्तकोपज्वरनयनरोगाः, पात्रभङ्गः, शस्त्रादिभिर्व्रणमित्यादीनि वक्तव्यानि ।

यदि बुधः अनिष्टस्थानस्थितः तदा विष्णुकोपः, युवराजकोपः, दुर्वचः, तस्करपीडाः इत्यादीनि फलानि । 'तस्करार्तिः' इति केषाञ्चित्पाठः । तमनुसृत्य फलमुक्तम् । यदि 'त्वगार्तिः' इति पाठः, तदा त्वग्रोगः, कररोगश्च वक्तव्यौ ।

यदि गुरुरनिष्टस्थितः श्रवणरोगः पुत्ररोगः, ब्राह्मणकोपः, देवकोपः, धर्मरहितैर्वैरमित्यादीनि फलानि ।

शुक्रेऽनिष्टगते कलत्रादीनां व्याधिः वस्त्रनाशः, धननाशः स्नेहतो दुःखं चतुष्पान्नाशः रजतवस्तुनाशः, इत्यादीनि वक्तव्यानि ।

यदि मन्दः अनिष्टस्थितः अनिलकफरोगः ज्ञानहीनत्वं चौर्यं, कोपः, आपदः, तन्द्री, श्रमः, स्त्रीभृत्यपुत्रादीनां भर्त्सनं, व्यङ्गता, ईर्ष्या इत्यादीनि फलानि ।

राहोः मन्दवत् फलानि । स्वाश्रितराशिनाथवशाच्च फलानि वक्तव्यानि । केतोर्भौमसदृशफलानि स्वाश्रितराशीशफलानि । राहुकेत्वोः पृथक् पृथगुक्तफलानि चात्र योज्यानि ।

आदित्यः इष्टस्थानस्थितश्चेत् सत्वगुणवर्धनं, सन्तोषसन्तापराहित्यं शिवप्रसादः, पितृप्रीतिः, राजबहुमतिः, ताम्रलाभः, कम्बलाध्वाटनतृणकनकौषधादादिभिः धनलाभः इत्यादीनि फलानि ।

चन्द्रे इष्टभावस्थिते राज्ञीप्रसादः दुर्गाप्रसादः मातृसन्तोषः, मन्त्रजपतिलगुलवस्त्रेज्यादिभिः धनलाभः गोनौरत्नादिभिः वाणिज्यं कृषिधनवृद्धिश्च फलानि । इष्टस्थानस्थितः भौमः भूलाभं स्वर्णलाभं आयुधलाभं सेनानायकप्रीतिं स्कन्दप्रसादं शत्रुनिग्रहं भ्रातृभूपतिभ्यः धनलाभं च कुरुते । बुधः इष्टस्थानस्थः अश्वस्वर्णभूबन्धुलाभं ब्राह्मणगुरुदौत्यकरकौशलविद्वत्प्रशंसाबुद्धिचय धर्मकर्मसिद्धिलिपि-गणितादिफलानि तनोति । गुरुः इष्टस्थितः बुद्धिगुणवर्धनं यज्ञवेदमन्त्रादिभिः धनलाभं स्वर्णाश्वगजानां लाभं बन्धुसमागमं विप्रदेवप्रसादं च कुरुते । शुक्रः इष्टभावस्थितः रजतविशिष्टवस्त्ररत्नलाभं निधिलाभं संगीतादिकलासु नैपुण्यं गोमहिषादिलाभं मृष्टान्नलब्धिं च तनुते । मन्दः इष्टस्थानस्थितः दुःखनाशवृद्धस्त्रीदासायसद्रव्यग्रामाधिपत्यलाभं वरकमहिष्यादिलाभं च करोति । राहकेत्वोः शनिवद्राहुः कुजवत्केतुरिति वचनात् स्वाश्रितराशिनाथवशाच्च फलानि चिन्त्यानि ।

## 7.14.12 गुलिकस्थितिफलानि

लग्नस्थो गुलिकः रोगं व्रणयुतत्वं च जनयति । धनस्थितो गुलिकः निन्द्यादिभाषिणं मलिनवेषधारिणं च कुरुते । तृतीये शौर्ययुतं सोदरद्विषं च तनुते । सुखस्थो गुलिको शत्रुभयं कुर्वन् सुखं नाशयति । पञ्चमस्थो गुर्वादिनिन्दकमपुत्रं च तनुते । षष्ठस्थो स्वजनद्विषं करोति । कलत्रस्थः विषेक्षणं वंशविदूषणं च कुरुते । स कलत्रहन्ता कामपीडितश्च भवति । अष्टमे गुलिके, धीमान् व्याधियुतः अल्पायुश्च भवति । स विषाग्निशस्त्रैर्मृत्युं प्राप्नोति । नवमे गुलिके धर्मतपोमन्त्रादिभिर्वियुक्तो भवति । दशमे स्थितिः परकार्यसक्तं निर्मलकीर्तिं च जनयति । लाभस्थितो गुलिको पौरुषयुतं धनवाहनार्थैश्वर्ययुतं बहुभृत्ययुक्तं च करोति । व्ययस्थः दुःस्वप्नवन्तं कुनखिनं विकलं च तनोति ।

## 7.14.13 फलाप्तिः

फलाप्तिः कल्प्यते येन तस्य कालोऽयनादिकः ।
तद्भुक्तांशकसंख्याघ्नस्तत्सिद्धौ समुदीर्यताम् ॥ 14.81

इति नियमः । एवं येन ग्रहेण फलाप्तिः कथ्यते तस्य वारमासकालादीन् प्रयुज्य फलानि कथितव्यानि । रवेः अयनं, चन्द्रस्य क्षणं भौमस्य वारः, बुधस्य ऋतुः, गुरोर्मासः, शुक्रस्य मासार्धं मन्दस्य वत्सरश्च । एतेषां नवांशमुपयुज्य फलानि ज्ञायन्ते । यदि रविः फलदाता कालविभागः अयने इति सिध्यति । यदि प्रथमनवांशे स्थितः एकमयनं, द्वितीये चेत् द्वे अयने इत्यादीनि फलानि वक्तुं शक्यते ।

शत्रुजयादिकार्यसिद्धिकालं ज्ञातुं लग्ननवांशाधिपोचिकालमानं वर्तमान नवांशसंख्याभिः हत्वा कालः ज्ञेयः । एवं लग्नं मेषे तृतीये

नवांशे चेत् तदधिपस्य बुधस्य कालमानं ऋतुं त्रिभिर्हत्वा, ऋतुत्रयमिति ज्ञायते । एवं बहुधा कालनिर्णयः कृतः

7.14.14 कायिकवाचिकमानसिककर्माणि

> दृढादृढक्रियाप्तत्वाच्छुशुभाशुभफलं द्विधा ।
> मनोवाक्कर्मजं तच्च त्रिविधं तद्विदोच्यते ॥ 14.101

इति नियमः ।

यदि धनपञ्चमकर्मसु पापाः स्थिताः, तर्हि, वाचिकमानसिककायिककर्माणि सन्ति इति ज्ञायते । यदि दशमे शुभाः धनपञ्चमयोः पापाः, तदा प्रवृत्तिसमये वाचिकं पापं कृतमिति ज्ञायते । पञ्चमे पापाः अन्यत्र शुभाश्चेत् कर्म सश्रद्धं न कृतमिति वक्तव्यम् । यदि धनभावे पापाः, पञ्चमसप्तमयोः शुभाः, तदा वाग्दोषः सूचितः ।

7.14.15 बन्धनयोगाः

> "व्ययसुतधनधर्मगैरसौम्यै
> र्भवनसमाननिबन्धनं विकल्प्यम् ।
> भुजगनिगलपाशभृद्दृगाणै
> र्बलवदसौम्यनिरीक्षितैश्च तद्वत् ॥"

इति वराहमिहिरवचनात्, द्वादशपञ्चमद्वितीयनवमगैः पापैः भवनसदृशनिबन्धनं वक्तव्यम् । यदि लग्नद्रेक्काणः सर्पनिगलपाशभृतां एकतमश्चेत् लग्नसूचितमार्गेण बन्धनं वक्तव्यम् । यदि मेषो वृषो वा लग्नं, पाशेन बन्धनम् । कर्कटश्चेत् गुहायां बन्धनमिति अवगम्यते । व्ययसुतादिराशिषु पापश्चेत् बन्धनकारणमप्युच्यते । यदि पापः व्यये चेत् वेश्यास्त्री, ऋणं वा कारणम् । अर्थे चेत् राजदूषणेन बन्धनम् ।

पञ्चमे चेत् पुत्रः कारणम् । नवमे चेत् जनकः कारणम् । यदि एकाधिकभावेषु पापाः स्थिताः बलवद्ग्रहः उपयुज्यते ।

मोचनकालनिर्णयाय नियमोऽस्ति । शनिः यदि चरराशिस्थितः, तदा क्षिप्रमेव मोचनम् । स्थिरे दीर्घकालेन, उभयराशौ मध्यकालेन च मोचनम् ।

7.14.16 धूमादीनां विविधभावस्थितिवशात् फलम्

धूमव्यतीपातपरिवेषेन्द्रचापकेतूनां विविधभावस्थितिवशात् फलान्यत्र कथितानि ।

लग्नस्थो धूमः कूपपतनं करोति । धनस्थश्चेत्, वचःस्खालित्यं भवति । तृतीये चेत् सोदरः पङ्गुर्भवति । चतुर्थे चेत् मातुलो देवालयरक्षको भवति । पञ्चमे चेत् कोपशीलं जनयति । षष्ठे व्याघ्रदष्टमुखो भवति । सप्तमे चेत् जातिभ्रष्टः स्थानभ्रष्टो वा भूत्वा गृहं त्यजति । अष्टमे शस्त्रेण व्रणं भवति । नवमे चेत् स्वल्पतपाः भवति । दशमे चेत् अशनिघातेन मृतिः भवति । लाभे स्वगृहात् अन्यत् गृहं च लभते । व्ययस्थितो धूमः स्वगृहत्यजं जनयति । एवं द्वादशभावेषु धूमस्थितिवशात् फलान्युक्तानि ।

लग्नस्थो व्यतीपातः श्वित्ररोगं जनयति । धनस्थः समर्थं करोति । सहजस्थः संगीतज्ञं करोति । चतुर्थस्थः गजलाभं कुरुते । पञ्चमस्थः पुत्रदुःखं, षष्ठस्थः गृहच्छिद्रं सप्तमस्थः दरिद्रतां अष्टमस्थः सर्वकलाज्ञानं, नवमस्थः भाग्यहीनत्वं दशमस्थः अग्निभयं लाभस्थः भूपसत्कारं व्ययस्थः जातिस्थानभ्रष्टतां च तनोति ।

लग्नादिद्वादशभावेषु परिवेषः सर्पदंशेन मृत्युं, निधियुतत्वं, भ्रान्तिं, अन्यगृहवासं, बन्धनयुतत्वं, अन्तस्थचौर्यं काणत्वं, आयुधकृतव्रणयुतत्वं, गुरुवृध्दभक्तिहीनत्वं दीर्घरोगयुतत्वं च क्रमेण जनयति । इन्द्रचापः लग्नादिभावेषु वातव्याधिवशीकृततनुत्वं, बाधिर्यं,

द्विजवधादिकर्तृत्वं, गणरक्ष्यहन्तृत्वं, वाग्भयमन्त्रवादज्ञत्वे, शत्रुभयं, अङ्गवैकल्यंभार्यानुभूतिहीनत्वे, भूतपिशाचप्रेरितत्वसञ्चारशीलत्वे, बन्धुपुत्रहेतुकमृत्युयुतत्वं, शीघ्रभुक्त्वं पराक्रमयुतत्वमृगयासक्तत्वे, राजकोपप्रेरितप्रोषणयुतत्वं च जनयति । लग्नादिभावेषु केतुः पुरोविकेशत्वं, वाग्दौर्बल्यं, सानुनासिकवचस्त्वं, सौरभ्ययुतत्वं, स्त्रीपुरुषभेदात् यमलयुतत्वशूलरोगयुतत्वे अन्धत्वश्वासविच्छेदज-नितमृतियुतत्वे, चौर्यहेतुकमृतियुतत्वं, विषहेतुकमरणयुतत्वं, पराक्रमयुतत्वं, दारुपतनकृतमृतियुतत्वं, निधिभाक्त्वं शयनसुखहीनत्वं च करोति ।

धूमादिगणनं चात्रोच्यते । रविस्फुटेन ४ग१३° योजयित्वा धूमः प्राप्यते । तं द्वादशरशेः संशोध्य व्यतीपातः, स षड्राशियुतः परिवेषः, तं द्वादशराशेः संशोध्य इन्द्रचापः, स ०–१७° युतः केतुः, केतुः एकराशियुतः रविः इति धूमादिगणनम् ।

| |
|---|
| भावफलानुभवं विशदयत । |

**एकाङ्कप्रश्नाः**

1. सन्तानभावः कः?
2. देहभावः कः?
3. सहोदरभावः कः?
4. शत्रुभावः कः?
5. कलत्रभावः कः?
6. सुखभावः कः?

7. निधनभावः कः?
8. धर्मभावः कः?
9. सर्वाभीष्टभावः कः?
10. व्ययभावः कः?
11. कर्मभावः कः?
12. वित्तभावः कः?
13. भावो द्विविधः । कथम्?
14. भावस्य लग्नलग्नाधिपसंबन्धेन कः सूचितः?
15. गुलिकस्थितिः कस्मिन् भावे शुभप्रदः?
16. उपग्रहाः के?
17. धूमः कथं ज्ञायते?
18. आदित्यः कस्मिन् ऋतौ फलप्रदः?
19. त्रिषडायलाभेषु के शुभदाः?
20. छत्रलग्नस्य षष्ठाष्टमव्ययस्थिताः पापाः किं सूचयन्ति?

**उत्तराणि**

1. लग्नम् ।
2. पञ्चमः ।
3. तृतीयः ।
4. षष्ठः ।
5. सप्तमः ।
6. चतुर्थः ।
7. अष्टमः ।
8. नवमः ।
9. एकादशः ।
10. द्वादशः ।
11. दशमः ।
12. द्वितीयः ।
13. बाह्यः आभ्यन्तरश्च ।

14. भावफलानुभवः ।
15. लाभे ।
16. धूमव्यतीपातपरिवेषेन्द्रचापकेतवः ।
17. सूर्यस्फुटेन ४रा १३° योजयित्वा ।
18. ग्रीष्मर्तौ ।
19. पापाः ।
20. देवकोपम् ।

**पञ्चाङ्काः प्रश्नाः**

1. बाह्यान्तरभावौ विशदयत ।
2. लग्नादिभावसूचितावयवाः के?
3. दुःस्थानेशाः के? ते किं कुर्वन्ति?
4. वाचिककायिकमानसिककर्माणि कथं निर्णीयन्ते?
5. कार्यसिद्धिकालं विशदयत ।
6. सप्तमे पापे शुभे च कानि फलानि?

**दशाङ्काः प्रश्नाः**

1. भावपुष्टिः सामान्यतः कथं ज्ञायते?
2. गुलिकस्य विविधस्थानवशात् फलं कथयत ।
3. बन्धनयोगान् विशदयत ।
4. धूमस्थितिवशात् फलानि कथयत ।
5. राजप्रश्ने भावानां विशेषाः के?

**विंशत्यङ्कौ प्रश्नौ**

1. लग्नादिद्वादशभावेषु पापशुभस्थितिफलानि कथयत ।
2. ग्रहाणामनिष्टस्थानस्थित्या फलानि कथयत ।

# अष्टमो विभागः

## पञ्चदशोऽध्यायः (श्लोकाः १ – १०१)

### 8.15.(1).0 अवतरणिका

अस्मिन्नध्याये दैवानुकूलादि निरूप्यते । देवकोपः, धर्मदैवतपीडा, सर्पबाधा, पितृकोपः, गुरुशापः, ब्राह्मणकोपः, प्रेतबाधा, दृष्टिबाधा, वाग्दोषः, विषोत्थदोषः, आभिचारः इत्येतेषां कारणानि निरूपितानि । प्रतिविधयश्च कथिताः । आदौ आदित्यादिग्रहसूचितदेवता उक्ताः । देवकोपकारणनिर्णयः प्रतिपादितः । प्रतिविधयश्चोक्ताः । ततः धर्मदेवताबाधा निरूपिता । अनन्तरं सर्पदोषो निरूपितः । पितृशापः, प्रेतबाधा, दृष्टिबाधा मनुष्यपीडां कुर्वतां सप्तविंशतिग्रहाणां निरूपणं इत्यादीनि कथितानि ।

### 8.15.(1).1 उद्देश्यानि

- दैवानुकूलादिनिरूपणम्
- देवकोपाः, निवारणरीतयश्च

### 8.15.(1).2 देवकोपः

अर्कःशम्भुरुदा¶तोऽखिलगृहेष्वर्को यदि द्वन्द्वभे
द्रेक्काणे प्रथमे गुहोऽत्र कथितो विघ्नेश्वरो मध्यमे ।
दुर्गा शीतकरो बली स विबलः काली स एवाबल
श्चामुण्डीप्रमुखास्तमोगुणजुषो भौमालयस्थो यदि ॥ 15.4

कुमारो भैरवादिर्वा स्वाश्रितर्क्षवशात् कुजः ।
चामुण्डीभद्रकाल्याद्याः स चेद्युग्मसमाश्रितः ॥ 15.5

श्रीरामाद्यवतारविष्णुमितरक्षेत्रेषु चन्द्रात्मजो
व्यन्त्यत्र्यंशगतः स्थिरे नु भवने यद्येष गोपालकः ।

त्र्यंशेऽन्त्येत्र स विष्णुरेव हि पुनर्जीवो महाविष्णुर
प्युक्तोऽयं ह्यखिलेश्वरोऽत्र तु भिदा ज्ञेयो ग्रहर्क्षान्वयात् ॥ 15.6

अन्नपूर्णेश्वरी लक्ष्मीर्यक्षी वा भृगुनन्दनः ।
मन्दः शास्त्रादिकं दैवं राहुः सर्पगणः स्मृतः ॥ 15.7

इति देवताकोपनिरूपणे विविधग्रहसूचितदेवता उक्ताः । एतत्स्पष्टीक्रियते । अर्कः शिवं सूचयति इति सामान्यो नियमः । किन्तु उभयराशौ प्रथमद्रेक्काणे स्थितः स्कन्दं मध्यद्रेक्काणस्थितः विनायकं च सूचयति । यत्रकुत्रापि स्थितः अर्केण शिवसंबन्धिन्यो देवताश्चिन्त्याः । कुजः सात्विकराशौ स्थितः (सिंहे, धनुषि वा) कुमारं सूचयति । ओजराशिष्वितरेषु राजसतामसदेवताः भैरवघण्टाकर्णादयश्चिन्त्याः । युग्मराशिषु काली, चामुण्डा, रक्तेश्वरी इत्यादिदेवताश्चिन्त्याः । तत्रापि सात्विकराश्योः कर्कटमीनयोः स्थितः सात्विकदेवतां, राजसराश्योः वृषकन्ययोः राजसदेवतां, तामसराश्योः मृगकीटयोः तामसदेवतां च सूचयति ।

बुधः चराराशिषु श्रीरामाद्यवतारान् सूचयति । उभयराशिष्वप्येवमेव । स्थिरराशिषु प्रथमद्वितीयद्रेक्काणयोः स्थितेन बुधेन श्रीकृष्णो ग्राह्यः । तृतीयद्रेक्काणे विष्णुश्चिन्त्यः ।

सर्वेश्वराणां धिषणेऽस्ति नित्यं
सान्निध्यमस्माद्धिषणेऽनुकूले ।
प्रायोऽनूकूलाः सकलाश्च देवा
स्तत्प्रातिकूल्ये सति नानुकूलाः । 15.3

इति वचनात् गुरुः साहचर्यात् विविधदेवान् सूचयति । रवियोगेन रविदृष्ट्या रविवर्गस्थित्या च शिवः सूचितः । शुक्रः स्वक्षेत्रे अन्नपूर्णेश्वरीं इतरशुभक्षेत्रेषु लक्ष्मीं, पापक्षेत्रेषु यक्षीं च सूचयति । मन्देन शास्त्रादिकदेवाः किरातमूर्तिश्च चिन्त्याः । राहोः सर्पदैवत्यम् ।

देवकोपकारणानि एवं विशदीक्रियन्ते । देवकोपकारकग्रहस्य व्ययभवने यदि पापः स्यात् देवविम्बे वैकल्यं वाच्यम् । तदेव कोपकारणं इति अवगन्तव्यम् । यदि देवकोपकारकग्रहस्य गुलिकराहुसंबन्धश्चेत् बिम्बस्य डुण्डुभस्पर्शो वक्तव्यः । स एव देवकोपकारणम् । मन्दयोगश्चेत् क्षेत्रस्य, बिम्बस्य, उभयोर्वा जीर्णता शौचाभावश्च वाच्यौ । यदि भौमसंबन्धोऽस्ति क्षेत्ररक्षकाणां ऐकमत्याभावः तन्निमितं क्षेत्ररक्षाभावश्च ज्ञायेते ।

देवकोपकारको यदि लग्नस्थितः पापग्रहयुतश्च भवति, बिम्बस्य दोषो वाच्यः । स एव कोपकारणम् । दोषस्तु द्विविधः, बिम्बस्य वैकल्यं अशुचिः इति । कुजसहितश्चेत् बिम्बस्य वैकल्यं वक्तव्यम् । यदि वैकल्यं लघु चेत्, अन्यबिम्बं नावश्यकम् । यदि मनुष्यशरीरसादृश्येन मृतिप्रदवैकल्यं भवति तदा बिम्बं पुनः निर्मीयताम् ।

देवकोपकारणमनुसृत्य प्रतिक्रिया कर्तव्या । एताः अत्र विशदीकृताः ।

यदि देवकोपकारकग्रहो सप्तमे स्थितः तदा कोपशमनाय नृत्तं करणीयम् । यदि सः सूर्यक्षेत्रे कुजक्षेत्रे वा स्थितः, तदा दीपसमर्पणं कुर्यात् । चन्द्रक्षेत्रे शुक्रक्षेत्रे वा स्थितश्चेत् पायसं, पयः घृतं इत्यादीनि समर्प्यानि । बुधक्षेत्रे चेत्, चन्दनधारणं कार्यम् । जीवक्षेत्रे चेत् मालासमर्पणं, पुष्पाञ्जलिः इत्यादीनि कर्तव्यानि । मन्दक्षेत्रे चेत् पट्टवस्त्राभरणदीनि समर्प्यानि ।

यदि देवकोपकारकग्रहः रन्ध्रगतः, अथवा दशमगतः तदा उदयास्तमनादिपूजा बलिकर्म इत्यादीनि कार्याणि । व्ययस्थानस्थितश्चेत् गीतं वाद्यं इत्यादिभिः शमनमिष्यते ।

यदि लग्ने बाधकेशः स्थितः तदा प्रतिबिम्बसमर्पणं कार्यम् । प्रतिबिम्बस्तु मृत्पाषाणदारुताम्रस्वर्णरजतादिभिः निर्मेयः । यदि कोपकारकग्रहो द्वितीयस्थितः मन्त्रजपादिभिः शमनम् । तृतीयस्थितश्चेत् पूजा कर्तव्या, चतुर्थे चेत् देवालयनिर्माणं कार्यम् । पञ्चमे चेत् देवभक्तसन्तर्पणं कुर्यात् । षष्ठे चेत् प्रतिकारबलिः कर्तव्यः । सप्तमे नृत्तं, अष्टमे विजयबलिः (श्रीभूतबलिः, उत्सवबलिः इत्यादयः) । नवमे देवोपासनं, दशमे दन्तिस्कन्धबलिः, एकादशे जलतर्पणं, इति प्रतिक्रियानियमः । द्वादशे चेत् बाधा नास्ति, अत एव प्रतिक्रिया नोक्ता ।

यदि कोपकारकग्रहः अर्कः सिंहस्थितो वा चेत् पृच्छकसुखाय देवाराधनं कार्यम् । स चन्द्रः कर्कटस्थितो वा चेत् शङ्खाभिषेकधारादयः, अकिञ्चनेभ्यो यवागूदानं इत्यादीनि विहितानि । कुजः कुजक्षेत्रस्थितश्चेत् वा दीपसमर्पणं कार्यम् । बुधः बुधक्षेत्रस्थितो वा चेत् नृत्तं कार्यम् । गुरुः तत्क्षेत्रस्थितो वा चेत्, ब्राह्मणभोजनं रजतस्वर्णप्रतिबिम्बसमर्पणं आभरणसमर्पणं इत्यादीनि कार्याणि । शुक्रः शुक्रक्षेत्रस्थितः वा चेत् अन्नदानं करणीयम् । मन्दः तद्गृहस्थितो वा चेत् भूदानम् नीचेभ्यो अन्नदानं च कर्तव्ये ।

नवमाधिपो बाधकस्थानस्थितश्चेत्, उपासनदेवता उपेक्षिता, इति वक्तव्यम् । दोषशान्त्यै पूर्ववत् उपासनं कार्यमिति च वक्तव्यम् । लग्नस्य, तत्स्थितग्रहस्य धातुमूलजीवस्वभावं ज्ञात्वा धातुद्रव्यैः, मूलद्रव्यैः जीवद्रव्यैः उचिताः प्रतिक्रियाः कार्याः ।

बाधकाधीश्वरः सन्तो यदि सूर्यादिखेचराः ।
देवतानां निजोक्तानां पीडां ब्रूयुरनिष्टगाः ॥ 15-8

इति वचनात् देवनिर्णयः कृतः ।

8.15. (1).3 धर्मदेवताकोपः

चतुर्थनाथस्य तु दैवतं[2] य
स्तस्यानुरूपं खलु धर्मदैवम् ।
यत्प्रीतये यत् क्रियते स्वपूर्वैः
पूजादिकं तत्तु विधेयमत्र ॥ 15.29

इति वचनम् ।

धर्मदेवताकोपसूचकानि लक्षणान्येतानिः– बाधकस्थानेशः चतुर्थे तिष्ठति । चतुर्थेशः बाधकस्थाने तिष्ठति । बाधकस्थानेशः सुखेशस्य राशौ तिष्ठति । तुरीयेशः बाधकेशराशौ तिष्ठति । चतुर्थाधिपः धर्मदेवतां सूचयति । सामान्यलक्षणेन देवता ज्ञातव्या ।

8.15.(1).4 सर्पकोपः

जीवःसन् बाधकेशो व्ययमृतिरिपुगो यद्यहेः केन्द्रसंस्थः
सर्पाणामुत्तमानां यदि स सुरगुरुर्मान्दिकेन्द्रेऽधमानाम् ।
पीडा वाच्याथ बाधाभवनमुपगते चोरगे सर्पबाधा
तेषां हीनोत्तमत्वं शशिदिनकरयोर्योगवीक्षादिभिः स्यात् ॥ 15.31

इति वचनमत्रानुसन्धेयम् ।

गुरुः बाधकेशः सन् षष्ठे अष्टमे व्यये वा स्थितः, तदाश्रितराशिः राहुकेन्द्रे स्थितश्च चेत् उत्तमसर्पाणां बाधा वक्तव्या । यदि बाधकेशो गुरुः गुलिककेन्द्रे लग्नात् षष्ठाष्टमव्ययेषु स्थितश्चेत् तदा अधमसर्पाणां बाधा वाच्या । बाधकस्थानस्थितो राहुरपि सर्पबाधां

---

[2] धर्मदैवमिति शब्दः प्रश्नमार्गे प्रयुज्यते । मलयालभाषायां (द्रमिलभाषायां च) दैवमिति शब्दः देवपर्यायः । प्रश्नमार्गकारेणा धर्मदैवतमिति शब्दमपहाय भाषाशब्दः प्रयुक्तः अत्र । कदाचित् महाकवयोऽपि भाषाशब्दान् प्रयुञ्जते । नैषधे यथा “वितेनुरिङ्गालमिवायशः परे” (१–९) । इङ्गालशब्दः कान्यकुब्जभाषायां दृश्यते । तस्य दग्धकाष्ठमित्यर्थः ।

सूचयति । यदि सर्पबाधाकारो राहुः रवियोगदृष्टिकेन्द्रस्थित्यादियुतः, तदा उत्तमसर्पाणां बाधा वक्तव्या । एवं राहुः चन्द्रेण बद्धश्चेत् नीचसर्पाणां दोषः । द्वावपि योगौ चेत्, द्विप्रकारसर्पाणां बाधा ।

यदि राहुः बाधकस्थाने षष्ठाष्टमयोः वा स्थितः सर्पबलिः कर्तव्यः ।

यदि राहुः चरराशिस्थितः, तदा अण्डानां नाशेन सर्पकोपः इति वक्तव्यम् । यदि उभयराशौ चेत् किशोरफणिनां नाशः । स्थिरे चेत्, वृक्षाणां नाशः कथितव्यः ।

राहुः सगुलिकः अथवा राहोः पञ्चमसप्तमनवमेषु स्थितः सर्पबाधा वक्तव्या । यदि राहुः भौमकेन्द्रस्थितः वृक्षच्छेदभूखननवल्मीकच्छेदादि कारणमिति ज्ञायते । शनिगुलिककेन्द्रस्थित्या उच्छिष्टादिकृतमालिन्यं अनुमीयते ।

8.15.(1).5 पितृशापः

यदि षष्ठेशो नवमे स्थितः, नवमेशः षष्ठे च स्थितः, तदा गुरोः पितुः, पूर्वजानां वा अप्रीतिः सूचिता । षष्ठस्थितः सूर्यः जनककोपं सूचयति । यदि रविः षष्ठेशेन युतः तदापि जनककोपो वाच्यः । यदि षष्ठाधिपो सुखे स्थितः, चतुर्थाधिपः षष्ठे स्थितः चन्द्रः षष्ठेशयुतश्च भवति, तर्हि मातृकोपो वाच्यः ।

8.15.(1).6 प्रेतबाधानिरूपणम्

यदि गुलिकः बाधकस्थाने अथवा अनिष्टस्थाने स्थितः, तदा प्रेतबाधा वाच्या । यदि गुलिकः भौमक्षेत्रस्थितः भौमनवांशस्थितः भौमयोगदृष्टियुतो वा तदा प्रेतः आयुधाग्निमसूरिकारोगादिभिः मृतः इति सूच्यते । एवं मन्दसंबन्धात् स्वजनविरहिततया दुःखितः । गुलिकस्य राहुयोगदृष्ट्या सर्पदंशः सूचितः । गुलिकस्य पापसंबन्धः जलराशिस्थितिश्च चेत् नदीपतनं सूचितम् । प्रेतबाधाकरो गुलिकः

यदि पापयुतः तदा दुर्मृतिः सूचिता । ओजराशिस्थितो गुलिकः पुरुषप्रेतं युग्मराशिस्थः स्त्रीप्रेतं च सूचयति । ओजयुग्मनवांशैरपि एवं चिन्त्यम् । यदि राशिनवांशौ व्यत्यस्थौ चेत्, बलमनुसृत्य फलं कथ्यते ।

यदि गुलिकः सहजस्थितः कुजयुक्तदृष्टश्च तदा सहोदरप्रेतः इति ज्ञायते । एवमेव मातृपुत्रपितृगुरुप्रेताः सन्ति इति चतुर्थपञ्चमनवमस्थितेन कारकग्रहयुतदृष्टेन गुलिकेन निर्णेतुं शक्यते ।

मान्द्यधिष्ठितराशिः तदीशः तदष्ठितनवांशश्च प्रेतजातिं सूचयन्ति । जातिज्ञानार्थं "विप्रादितः शुक्रगुरू कुजार्कौ शशी बुधश्चेद्यसितोऽन्त्यजानाम्" इति वचनमनुसन्धेयम् । एवं गुरुः शुक्रश्च ब्राह्मणजातिं सूचयतः । गुरुरुत्तमब्राह्मणं, शुक्रः मध्यमब्राह्ममणाधमब्राह्मणौ च सूचयतः । रविकुजौ क्षत्रियौ । रविः सार्वभौमः, कुजः सामन्तः । बुधचन्द्रौ वैश्यौ । शनिः शूद्रसंकरजातीश्च सूचयति । मान्द्यधिष्ठितराशीश इति पाठे एवं चिन्त्यम् । राशिवशात् चेत्, कर्कटः तत्त्रिकोणे ब्राह्मणं, मेषः तत्त्रिकोणे क्षत्रियं, वृषः तत्त्रिकोणे वैश्यं, मिथुनं तत्त्रिकोणे च शूद्रं सूचयन्ति इति नियमः ।

बाधा प्रेतोद्भवा स्याद्गतवति गुलिके बाधकेऽनिष्टभे वा
तत्रारर्क्षांशसंस्थो यदि कुजसहितो मान्दिरारेक्षितो वा ।
प्रेतः स्यादग्निशस्त्रप्रभृतिकृतमृतिर्मन्दसंबन्ध एवं
मान्देश्चेत्प्रेत एष स्वविररहितया दुःखितः सन् परेतः ॥ 15.43

इति वचनमत्रानुसंन्धेयम्

8.15.(1).7 दृष्टिबाधा

अथ दृष्टिभवा बाधाः
कथ्यन्ते तत्र ये नराः ।
नार्योऽथवा ग्रहैर्बाध्याः
शास्त्रोक्तान् कीर्तयामि तत् ॥ 15.51

इत्यारभ्य प्रश्नमार्गकारः विविधदोषान् आह ।

लुब्धं क्रूरं भयपरवशं तृषितं, अत्यन्तं शठस्वभावयुतं पूर्ववैरात् प्रवर्तमानं नष्टद्रव्यं सहचारिभिः वियुक्तं कार्येषु पराजितं शौचहीनं प्रारब्धवशात् आसन्नरोगं, हासान्धं, मनोहरवपुषं, निधिं प्राप्तोऽपि तां विविधमार्गैर्नाशयन्तं, मनोधैर्यहीनं, भूषितशरीरं, रात्रौ एकाकी सन् सञ्चरन्तं, च पुरुषं शैवभूतगणाः ग्रसन्ति ।

तैलाभ्यक्तां प्रसूतां अभिनवसुरतां मद्यपानानुरक्तां वस्त्रहीनां गर्भिणीं कामपीडितां कामक्रीडादिभिर्विवशां विहारैर्मुह्यमानां रथ्याशृङ्गाकटकस्थां रजस्वलां पुंश्चलीं रोदनशीलां एकान्तां सुन्दरीं च नारीं विषमा गुह्यकाः संस्पृशन्ति ।

यः ग्रहान् तेषां स्वामिनः वा अवमन्यते, कर्तव्यपूजादीन् न च करोति, तैः पूर्ववैरयुतः, तेषां कर्मविघ्नं कुर्वाणः, तस्य भाग्यविपर्ययात् ग्रहबाधा तदर्थं ईश्वरकल्पना च भवतः ।

अमराः, असुराः, नागाः, यक्षाः, गन्धर्वाः, राक्षसाः, हेध्राः, कश्मलाः, निस्तेजसः, भस्मकाः, पितरः, कृशाः, विनायकाः, प्रलापकाः, पिशाचाः, अन्त्यजाः, योनिजाः भूताः इति अष्टादश महाग्रहाः । अपस्मारः, ब्राह्मणः, ब्रह्मराक्षसः, क्षत्रियः, वैश्यः, शूद्रः, नीचः, चण्डालः, व्यन्तरः इति नव लघुग्रहाः । आहत्य सप्तविंशतिग्रहाः भवन्ति ।

देवग्रहपीडितः स्नातः तेजस्वी, सन्तुष्टः सन् देवालये रतो भवति । अल्पभाषी अल्पविण्मूत्रः, स्वल्पभुक्तिः, अकोपनः, गन्धमाल्यप्रियः, धीरः सौम्यदृष्टिश्च भवति ।

असुरग्रहपीडितः देवनिन्दकः असुरस्तवकः ब्राह्मणद्विट् कुटिलदृक् दुष्टमनाः भयरहितः गर्वहासी सविस्मयः अमितभुक् कम्पयुतः च भवति । मुद्रां बध्नन् सन् भवति ।

नागपीडितः पानीयगुलदुग्धादिपिपासुः सृक्विलिट्, प्रसर्पितरक्ताक्षः क्रोधालुः अचलवासी सकम्पः दन्तदंशनशीलः पुष्पेच्छुश्च भवति ।

गन्धर्वपीडितः अल्पभाषी गन्धमाल्यादिप्रियः, संगीतनर्तनरतः, पुलिनादिवासी, अतीन्द्रियज्ञानयुतः, मुखवाद्यकृत्, क्षीरपायी हसन् क्रीडन् ¶ष्टोऽस्ति ।

राक्षसपीडितः प्रधावन् आत्ममांसानि खादन् मद्यं रक्तं च पिबन् निर्जनग्रामे वसन्नस्ति । स ताम्रदेहः निर्लज्जो निष्ठुरकठिनकर्मकृत् शौचद्विट् क्षिप्रकोपी निशासञ्चारशीलश्च भवति ।

हेध्रग्रहपीडितः स्मेरास्योऽधोमुखः छन्नमुष्टिकः जानुन्यस्तशिराः कूरदृष्टिश्च भवति ।

कश्मलपीडितः विट्पङ्कलेपी शौचहीनः भस्मशायी स्त्रीद्रोही कलहप्रियः परार्थ¶त् क्रुद्धः अल्पवाक् कदाचिद् रुदन् कदाचिद् हसन् च अस्ति ।

निस्तेजोपीडितः तेजोहीनः विह्वलः परिहासितवैद्यशास्त्रः निर्निमेषः पश्यन्नस्ति ।

भस्मकपीडितः असंगतार्थवाक् सर्वद्विट् शीताङ्गः तिर्यगीक्षणः कृष्णाङ्गः भोजने अतृप्तः शौचयुतश्च भवति ।

पितृग्रहपीडितः अनवसरे दर्भेषु पिण्डान् निर्वपन् उदकक्रियां करोति। तिलमांसगुलादीनि काङ्क्षन् शान्तो भवति।

कृशग्रहपीडितः एकाकी कृशकायः धावनशीलः दारुणध्वनिः च अस्ति। पृष्टोऽपि नोत्तरं ददाति। भोजने तृप्तिं न याति।

विनायकग्रहपीडितः पादरजो मार्जन् कारणं विना शूत्कारं मुञ्चन् छर्दयन् दन्तान् कटकटायन्नस्ति। प्रलापपीडितः शुष्काङ्गः निजगात्रावयवभञ्जकः नर्तनशीलः, स्वस्थः हसन्नस्ति। बहुभुक् बहुभाषी च भवति।

पिशाचपीडितः खररूक्षस्वरः अर्थशून्यभाषणं कुर्वाणः छिन्नभिन्नमलिनवस्त्रं बिभ्राणः, दुर्गन्धः अशुचिः लोलश्च भवति।

अन्त्यजपीडितः लोलरक्ताक्षः लुब्धः विट्पङ्कलेपकः बहुभुक् कम्पयुतो दीनवाक् च भवति।

योनिजपीडितः बहुभुक् अन्यचिन्ताज्ञः मांसभुक् चलेक्षणः निर्मर्यादः मेषगन्धः स्थिराङ्गश्च भवति।

भूतग्रहपीडितः जनान् प्रहरन् वृक्षान् आरोहन् उच्चापशब्दं वदन् सर्वानुकारी भूत्वा विकृतश्च भवति।

8.15.(1).8 हन्तुकामादिपीडा

केचित् हन्तुकामाः सन्ति। केचित् भोक्तुकामः, केचित् रन्तुकामाश्च। एतेषु त्रिषु हन्तुकामः बलिकर्मणापि न पीडितनरं त्यजति।

बाधन्ते हन्तुकामाः कतिचन कतिचिद्देवता भोक्तुकामाः
पुन्नारीरन्तुकामाः पुनरपि कतिचित्तासु या हन्तुकामाः।
घ्नन्त्यैवैता गृहीत्वा बलिमपि विसृजन्त्यत्र ते भोक्तुकामा

रन्तुं या बाधमाना अपि च बलिशतैर्नैव ताः सन्त्यजन्ति ॥ 15.67

इति वचनम् अत्र योज्यम् ।

| मनुष्यपीडकाः सप्तविंशतिग्रहाः के? |
|---|

**एकाङ्कप्रश्नाः**

1. कस्मिन् सर्वेश्वराणां सान्निध्यमस्ति?
2. मिथुनराशौ प्रथमद्रेक्काणस्थो रविः कं सूचयति?
3. सात्त्विकराशिस्थः कुजः कं सूचयति?
4. कन्यास्थो बुधः कान् सूचयति?
5. लक्ष्मीं कः सूचयति?
6. ग्रहस्य व्ययस्थः पापः किं सूचयति?
7. कोपयुतो ग्रहः सप्तमे चेत् किं कर्तव्यम्?
8. कोपयुतो ग्रहः कुजक्षेत्रगश्चेत् किं कर्तव्यम्?
9. कः धर्मदेवतां सूचयति?
10. चरलग्नस्थो राहुः किं सूचयति?
11. गुलिकयुतो मान्दिः किं सूचयति?
12. रविः बाधकस्थाने स्थितः, तत्कुजक्षेत्रं च । एवं चेत्किं फलम्?
13. प्रेतबाधालक्षणमेकं कथयत ।
14. प्रेतस्य जातिः कथं ज्ञायते?
15. पीडकाः ग्रहाः कति सन्ति?
16. सप्तविंशतिपीडकग्रहाणां एकस्य नाम कथयत ।
17. हन्तुकामः कः

18. विनायकः कः ?
19. असुरः कः?
20. गन्धर्वः कः?

**उत्तराणि**

1. बृहस्पतौ ।
2. स्कन्दम् ।
3. स्कन्दम् ।
4. श्रीरामाद्यवतारान् ।
5. शुक्रः ।
6. देवताविग्रहे वैकल्यम् ।
7. नृत्तम् ।
8. दीपसमर्पणम् ।
9. चतुर्थाधीशः ।
10. अण्डनाशम् ।
11. सर्पबाधाम् ।
12. पितृशापः ।
13. गुलिकः बाधकेऽनिष्टभे वा स्थितः ।
14. मान्द्यधिष्ठितराश्यंशात् ।
15. सप्तविंशतिः ।
16. अमरः । (अन्येष्वेकतमो वा)
17. पुरुषान् नारीश्च पीडयतां ग्रहानामेकः ।
18. पुरुषान् नारीश्च पीडयतां एकः ।
19. पुरुषान् नारीश्च पीडयतामेकः ।
20. पुरुषान् नारीश्च पीडयतामेकः ।

**पञ्चाङ्गाः प्रश्नाः**

1. बुधसूचितदेवताः काः इति विशदयत
2. धर्मदेवताकोपः कथं ज्ञायते?

3. पितृशापः कथं ज्ञायते?
4. प्रेतस्य जातिः कथं ज्ञायते?
5. मनुष्यपीडकाः सप्तविंशतिग्रहाः के?
6. रविसूचितदेवताः काः?

**दशाङ्काः प्रश्नाः**

1. विविधग्रहसूचिताः देवताः काः काः?
2. सर्पदोषं विशदयत ।
3. कीदृशौ स्त्रीपुरुषौ भूतगणाः ग्रसन्ति?
4. प्रेतबाधा कथं ज्ञायते?
5. देवकोपकारणानि विशदयत ।

**विंशत्यङ्कौ प्रश्नौ**

1. देवकोपशमनाय किं करणीयम्? विशदयत ।
2. महाग्रहाः के? तैः पीडितानां लक्षणानि कानि?

# नवमो विभागः

## पञ्चदशोऽध्यायः (श्लोकाः १०२–२३१)

### 9.15. (2).0 अवतरणिका

अत्र बाधकग्रहसूर्यादिसम्बन्धेन जातानि फलानि कथितानि । सारसंग्रहोक्तपक्षान्तरं चोक्तम् । चरादिराशीनाम् बाधकस्थानानि कथितानि । एवं चरस्य एकादशः, स्थिरस्य नवमः, उभयस्थ सप्तमः । दृष्टिबाधा कथिता । तत्र विविधराशिसूचितस्थलानि विशदीकृतानि । जिह्वादोषाः बालपीडा, विषभोजनं, शत्रुबाधा, आभिचारलक्षणानि च उक्तानि । विविधग्रन्थोक्ताः निरूपणरीतयश्च कथिताः । यन्त्रक्षुद्रादिस्थापनं प्रतिक्रिया इत्यादीनि निरूपितानि ।

### 9.15.(2).1 उद्देश्यानि

- बाधानिरूपणम्
- आभिचारलक्षणानि

### 9.15.(2).2 आदित्यादीनां बाधकस्थानस्थितिवशात् फलानि

सन्तानदीपिकायामेवं कथितम् । बाधकेशस्य रविसंबन्धेन रुद्रगणाः उग्रभूतगणाः, नागाः इत्यादीनां पीडा वक्तव्या । चन्द्रसंबन्धश्चेत् किन्नरयक्षादीनां पीडा वाच्या । कुजस्य उग्रग्रहाः । ते तु राक्षसग्रहाः भूताः, अग्निभैरवः कालभैरव इत्यादयः । बुधस्य अट्टालकग्रहविशेषाः किन्नराः । गुरोः शुभदाः त्रिमूर्तय इत्यादयः । त्रिमूर्तयः ग्रहेभ्यो अतीताः । एवं दैवानुकूल्यस्य अभाव एव वक्तव्यम् । शुक्रस्य यक्ष्यः, मातरः, नागाः इत्यादयः । मन्दस्य अशुभग्रहाः, पिशाचाः भस्मककश्मलादयश्च । राहोः पिशाचग्रहसर्पादयः । केतोः प्रेतग्रहाः । देवासुरग्रहादयः सप्तविंशतिरुक्ताः । अत्र सर्वे ग्रहा न

उक्ताः । प्रश्नसूचितलक्षणैः युक्तियुक्तानि फलानि वक्तव्यानि । सारसंग्रहे एवं द्रष्टव्यम् ।

रविर्बाधकस्थानस्थितश्चेत् शैवभूतादिपीडनं वक्तव्यम् । चन्द्रश्चेत् दुर्गाकृतपीडा वक्तव्या । भौमः स्कन्दकृतं व्याधिं सूचयति । बुधः गन्धर्वयक्षादिविमानस्थानवासिनां पीडां सूचयति । गुरुः ब्राह्मणशापं देवकोपं च सूचयति । शुक्रेण यक्षीकृतरोगाः, ब्रह्मरक्षःपीडाः च चिन्त्याः । मन्दः शैवभूतनाथान् सूचयति । राहुः सर्पबाधां केतुः चण्डालबाधां गुलिकः प्रेतबाधां च सूचयन्ति । रोगप्रश्ने, रोगं निर्णीय कारणं पूर्वोक्तप्रकारेण ज्ञायते । दृष्टिबाधादेवकोपादिनिरूपणेऽपि एतत्सर्वं योज्यम् ।

### 9.15.(2).3 बाधकस्थानानि

आरूढराशौ चर आयराशौ
  स्थिरे तु बाधा नवमे विचिन्त्या ।
तथोभये कामगृहे त्रयाणां
  केन्द्रेषु चैषामिति केचिदाहुः ॥ 15.110

कुम्भश्चराणामलिचापसिंह
  स्त्रीणामली गोवृषभस्य नक्रः ।
कुम्भस्य कर्की मिथुनस्य धन्वी
  मीनस्य चापं खलु बाधकः स्यात् ॥ 15.111

इति बाधकस्थानानां लक्षणानि उक्तानि ।

चरराशेः एकादशः, स्थिरस्य नवमः, उभयस्य सप्तम इति साधारणो नियमः । एवं मेषलग्नस्य कुम्भः बाधकराशिः । वृषस्य मकरः । मिथुनस्य धनुः । पक्षान्तरमप्यस्ति । अस्मिन् पक्षे, मेषकर्कटतुलामकराणां कुम्भः । सिंहकन्यावृश्चिकधनुषां वृश्चिकः । वृषस्य मकरः । कुम्भस्य कर्कटः । मिथुनस्य धनुः । मीनस्य धनुः ।

आद्यपक्षे केचित् सूचितबाधकराशीनां केन्द्राणामपि बाधकत्वं इच्छन्ति ।

### 9.15.(2).4 दृष्टिबाधा

यदि बाधकेशः लग्नं लग्नाधिपं वा पश्यति, तदा दृष्टिबाधा वाच्या । अत्र न केवलं सप्तमदृष्टिः किन्तु अन्या अपि योज्या इति संप्रदायः । सप्तमाधिपः बाधकस्थितश्चेत् अथवा बाधकेशेन युतश्चेत् तेन दृष्टश्चेद् वा दृष्टिबाधा वक्तव्या । अत्र सप्तमदृष्टिरेव योज्या इति संप्रदायः ।

चरलग्ने पापः सप्तमस्थो भौमश्च देवताकृतदृष्टिं तत्प्रेरितरोगं च सूचयतः । चन्द्रात् सप्तमस्थः पापः पिशाचबाधां सूचयति । दृष्टिदोषे सति बाधको भोक्तृकामादिषु कः इति निश्चीयते । बाधकेशे लग्नाधिपमित्रे सति स रन्तुकामः । शत्रौ सति हन्तुकामः । समे सति भोक्तृकामः, तात्कालिकबन्धुत्वादिसंस्कारोऽपि करणीयः इति केषाञ्चिन्मतम् । पक्षान्तराण्यपि वर्तन्ते ।

### 9.15.(2).5 मेषादीनां वासभूमयः

मेषस्य धात्वाकररत्नभूमिः
  कुल्याप्रदेशो भुजगालयश्च ।
पूर्वप्रदेशो वृषभस्य पश्चात्
  कृषीवलक्षेत्रसुरम्यभूमिः ॥ 15.122

उद्यानदेवालयनृत्तभूमि
  र्यमस्य रम्यं प्रवदन्ति तज्ज्ञाः ॥
देवाङ्गनावासतटाकरम्यं
  जलान्तिकं कर्कटकस्य राशेः ॥ 15.123

स्थानं मृगेन्द्रस्य तु तुङ्गदेशो
  गोक्षेत्रदेवद्विजवासभूमिः ।
देवालयाश्वद्विपमन्दिराब्धि
  क्षेत्रेषु वासो वनितागृहस्य ॥ 15.124

जूकस्य वीथ्यापणकाननेषु
  कीटस्य वल्मीकतटाकयोश्च ।
आरामसेनागृहयुद्धभूमि
  सालेषु वासो नवमस्य राशेः ॥ 15.125

नदीमुखारण्यनिषादवास
  एणस्य राशेर्घटभस्य तद्वत् ।
श्वभ्राम्बुपूर्णामरमन्दिरेषु
  झषस्य वासः कथितो मुनीन्द्रैः ॥ 15.126

इति वचनात् वासभूमयो ज्ञातव्याः ।

एतद्विशदीक्रियते ।

मेषस्य स्वर्णरजातादिधातुभूयिष्ठभूमिः कुल्याप्रदेशः सर्पभूमिश्च वासदेशाः । मेषो बाधकराशिश्चेत् एतत्सदृशभूम्याः उत्पन्ना दृष्टिबाधा इति ज्ञायते । वृषस्य, मेषस्य प्रदेशाः कृषीवलक्षेत्रं, रम्यभूमिः इत्यादयः । वृषे बाधकस्थाने सति दृष्टिबाधा एतत्सदृशात् प्रदेशादुत्पन्ना ।

मिथुनस्य उद्यानं देवालयं, नृत्यशालां रम्यभुमिं च तज्ज्ञा वदन्ति । कर्कटस्य देवाङ्गनावासतटाकरम्यं जलसमीपस्थं प्रदेशं वदन्ति ।

सिंहस्य तुङ्गदेशं देवालयं गोद्विजादीनां वासभूमिं च वदन्ति । कन्यायाः देवालयं अश्वद्विपमन्दिरं, जलधिं वनितागृहं च वदन्ति ।

तुलाधरस्य वापीं, आपणं, काननं च आहुः । वृश्चिकस्य वल्मीकं तटाकं च । धनुषः उद्यानं, सेनागृहं समरभूमिं सालांश्च आहुः । मृगस्य नदीमुखं अरण्यं निषादवासभूमिं च ब्रुवन्ति । कुम्भस्य मृगवत् । अमरमन्दिरं जलपूर्णस्थलं च मीनस्य ।

9.15.(2).6 मेषादीनां वनादिविभागाः

मेषस्य वनम् । वृषस्य क्षेत्रम् । मिथुनस्य राजधानी । कर्कटस्य कुल्या । सिंहस्य गिरिः । कन्यायाः ग्रामः । तुलाधरस्य आपणः । वृश्चिकस्य कूपः । धनुषः वनम् । मकरस्य सागरः । कुम्भस्य तटाकः । मीनस्य सरित् । एवं मेषादिद्वादशराशीनां वनादिविभागः क्रियते ।

वनं क्षेत्रं पुरं कुल्या शैलग्रामापणाः क्रमात् ।
कूपकान्तारजलधितटाकसरितस्त्वजात् ॥ 15.127

इति वचनम् ।

9.15.(2).7 जिह्वादोषः

यदि धनाधिपस्य बाधकेशयोगो भवति, तदा जिह्वादोषो वाच्यः ।

9.15.(2).8 बालपीडा

यदि बुधो मन्दो वा बाधकस्थाने स्थितः अथवा मिथुनमकरयारेकतरः बाधकराशिर्भवति तदा पृच्छकस्य बालग्रहपीडा वाच्या ।

9.15.(2).9 रोगप्रकारः

रोगाः द्विविधाः । बाधासंबन्धं विना वातपित्तकफवैषम्येन जाताः । पृच्छकस्य रोगः कीदृश इति ज्ञातुं लक्षणमत्र उच्यते । उदयादारूढस्य बलाधिक्यं चेत् पृच्छकस्य रोगाः बाधोद्भवाः । उदयलग्नस्य

बलाधिक्यं चेत् त्रिदोषवैषम्याद् रोगः उत्पन्नः इति ज्ञातव्यम् । षष्ठेशाष्टमेशयोः षष्ठेशस्य बलाधिक्यं चेत् रोगाः बाधोद्भवा भवन्ति । अष्टमेशस्य बलाधिक्यं चेत् त्रिदोषवैषम्यमेव रोगकारणम् । एतत् सम्यगवलोकय रोगस्वभावः निश्चीयते । षष्ठेशाष्टमेशौ रोगकारकौ । षष्ठभावस्य शत्रुकारकत्वमप्यस्ति । अत एव अष्टमेशस्य बलाधिक्ये रोगस्त्रिदोषजनितः, षष्ठेशस्य बलाधिक्ये बाधाजनित इत्युच्यते ।

9.15.(2).10 विषभोजनम्

गुलिको राहुर्वा चतुर्थपञ्चमसप्तमाष्टमभावेषु एकस्मिन् स्थितश्चेत् विषभुक्तिः वक्तव्या । यदि षष्ठेशोऽपि एवं स्थितश्चेत् विषं शत्रुदत्तमिति ज्ञेयम् । केचित् षष्ठेशः राहुगुलिकयुतो भवितव्यः इति ब्रुवन्ति । यदि शत्रुदत्तविषलक्षणं नास्ति रोगो देवप्रेरित इति मन्तव्यम् ।

विषं कथं दत्तमिति ज्ञातुं लक्षणं कथ्यते । आरूढराशिः सिंहश्चेत् कटुकरसयुतनागवल्ल्यादिभिः विषं दत्तमिति ज्ञातुं शक्यते । मेषवृश्चिकौ चेत् घृतेन, मिथुनकन्ये चेत् मधुना, वृषतुले चेत् तक्रेण, दध्ना वा, धनुर्मीनौ चेत् पयसा, फलेन वा, मकरकुम्भौ चेत् अपूपादिभिः कर्कटश्चेत् लवणपदार्थैः विषं दत्तमित्यवगन्तव्यम् ।

9.15.(2).11 शत्रुबाधालक्षणम्

सप्तप्रकाराणि शत्रुबाधालक्षणान्युक्तानिः– (१) बाधकेशः षष्ठे तिष्ठति (२) बाधकेशः षष्ठं पश्यति (३) षष्ठाधिपः बाधकस्थाने स्थितः (४) षष्ठेशः बाधकस्थानं पश्यति (५) बाधकेशः षष्ठेशक्षेत्रे स्थितः, षष्ठेशः बाधकेशक्षेत्रे च स्थितः (६) बाधकेशषष्ठाधिपौ संयुक्तौ (७) बाधकेशः षष्ठेशश्च परस्परं पश्यतः । एतेषु लक्षणेषु एकस्मिन्नपि सति आभिचारो वक्तव्यःलक्षणाधिक्येन आभिचारः प्रबलः इति वक्तव्यम् ।

यदि शुभग्रहः बाधकेशो भवति, महाभिचारो वक्तव्यः । पापैश्च क्षुद्रं वक्तव्यम् । मन्त्रशास्त्रमुपयुज्य कृतानां मारणोच्चाटनादीनां कर्मणां आभिचार इति नाम । कीलादीनां निखननं क्षुद्रस्थापनमित्युच्यते ।

महाभिचारो वक्तव्यः शुभश्चेद्बाधकाधिपः ।
पापश्चेत् क्षुद्र एष स्यादाभिचार इति द्विधा ॥ 15.138

इति वचनं स्मरणीयम् ।

9.15.(2).12 शत्रोः वर्णः प्रेरकाश्च

षष्ठराशेः अथवा षष्ठेशस्य वर्णः शत्रोर्वर्ण इत्यवगन्तव्यम् । बाधकेशस्य बाधकस्थानस्य वा वर्णः प्रेरकस्य इति ज्ञातव्यम् । षष्ठराशेः बाधकेशस्य योगो दृष्टिर्वा चेत् शत्रोर्वर्णः षष्ठेशस्यैव इति निश्चयितुं शक्यते । यदि षष्ठेशः बाधकस्थानेन योगेन दृष्ट्या वा संबद्धः, तदा षष्ठेशस्य वर्ण एव वक्तव्यः । षष्ठेश- बाधेशयोः क्षेत्रपरिवर्तनेन चाप्येवमेव । बाधकस्थानस्य शत्रुस्थानेशस्य योगो दृष्टिर्वा चेद् आभिचारकृतः वर्णः बाधकस्थानेशस्य इति वक्तव्यम् । बाधकेशस्य षष्ठभावेन योगो वा दृष्टिः, तयोः क्षेत्रपरिवर्तनं च बाधकेशस्य वर्णः कर्मकृतः वर्णः इति ज्ञातव्यम् । राशीनां वर्णाः एवमुक्ताः । कर्कटः सत्रिकोणः ब्राह्मणं सूचयति । मेषः सत्रिकोणः क्षत्रियं, वृषः सत्रिकोणः वैश्यं मिथुनं सत्रिकणं शूद्रं च सूचयन्ति । ग्रहाणां वर्णाः विशदीक्रियन्ते । शुक्रगुरू विप्रौ । भौमार्कौ क्षत्रियौ । चन्द्रो वैश्यः । बुधः शूद्रः । मन्द अन्त्यवर्णः इति सामान्यनियमः । अत्र अस्मिन् विभागः क्रियते । गुरुरुत्तमब्राह्मणः । शुक्रोऽधमब्राह्मणः । रविः सार्वभौमः । कुजो माण्डलिकः । वर्णनिर्णयसमये ग्रहाणां साहचर्यमपि अवलोकनीयम् । गुरुः स्वयमुत्तमब्राह्मणं सूचयति । तथापि मन्दयुतश्चेत् अधमब्राह्मणः एव अत्र चिन्तनीयः ।

### 9.15.(2).13 आभिचारकारणम्

यदि षष्ठेशः कुजक्षेत्रे स्यात्, भूमिः कारणमिति वक्तव्यम् । भूसंबन्धिवैरं कारणमित्यर्थः । यदि षष्ठेशो बुधक्षेत्रे स्थितः स्वर्णं कारणम् । गुरुश्चेत् पणः फलं वा कारणम् । धान्यद्रव्याणि विवक्षितानि । रूप्यकाणि, स्वर्णमुद्राः इत्यादीनि ग्राह्यानि । शुक्रश्चेत् रजतवस्त्रधान्यचतुष्पादः कारणमिति वक्तव्यम् । आभिचारः तन्निमित्तशत्रुतया कृत इति ज्ञेयम् । षष्ठेशः मन्दक्षेत्रे चेत् चण्डालदासायुधप्रेरितः आभिचारः इति वक्तव्यम् । चन्द्रक्षेत्रे चेत् पात्रं जलं वा कारणम् । रविक्षेत्रस्थितश्चेत् ताम्रमूलफलानि आभिचाराय कारणं बभूव इति वक्तव्यम् ।

### 9.15.(2).14 धात्वादिकारणम्

लग्नराशिः, लग्नस्थग्रहाः, षष्ठेशः, बाधकेशः, षष्ठाधिपाश्रितराशिः, बाधकेशाश्रितराशिः एतेषां धातुमूलजीवस्वभाव–नुसृत्य कारणमपि तदनुसारि इति वक्तव्यम् ।

### 9.15.(2).15 शत्रुस्वभावः

शत्रुः स्वजनबन्धुत्वगुणयुतो वा न वा इत्यादीनां प्रश्नानामुत्तरं दातुं मार्गः दीयते । चरराशिर्लग्नं चेत् स्वजनाः शत्रवः । स्थिरराशिश्चेद् बान्धवाः शत्रवः । अत्र बन्धुशब्देन सपिण्डसगोत्रादिगुणयुताः इति ज्ञातव्यम् । उभयराशिश्चेत् अन्ये शत्रवः इति ज्ञातव्यम् । एवं लग्नेन चिन्तयित्वा अन्यमार्गाश्च दर्शिताः । चतुर्थाधिपः षष्ठे चेत् मातुलभागिनेयादयो ग्राह्याः । पञ्चमेशः षष्ठे चेत् मन्त्रिपुत्रादयः । सप्तमेशः षष्ठे चेत् भार्या । नवमेशः षष्ठे चेद् गुरुजनकाद्यः । तेषां शापो वा वक्तव्यः ।

शत्रोर्दिक् षष्ठाधिपस्य अथवा षष्ठराशेर्दिक् । शत्रुप्रेरणया आभिचारं कुर्वाणस्य दिक् बाधकेशस्य अथवा बाधकराशेर्दिक् । वर्णनिरूपणनियमः अत्र योज्यः ।

9.15.(2).16 आभिचारलक्षणम्

आभिचारलक्षणान्येतानि । चरराशिर्लग्नं, षष्ठाधिपदृष्टं च, भौमः लाभस्थितः । स्थिरलग्नं षष्ठाधिपदृष्टियुतं, कुजः नवमस्थः । उभयराशिर्लग्नं, षष्ठाधिपदृष्टियुतं, कुजः सप्तमस्थितः । एतेषु योगेषु एकस्मिन् सति आभिचारो वक्तव्यः । कुजः लग्नाधिपयुक्तः अथवा केन्द्रस्थितः लग्नं च षष्ठांशयुतं चेत् आभिचारो वक्तव्यः । षष्ठाधिपे लग्ने कर्मणि सप्तमे वा स्थिते, लग्ने भौमयुते दृष्टे वा आभिचारो वक्तव्यः । केतौ सुखे कर्मणि लग्ने वा स्थिते लग्ने कुजयुते कुजदृष्टे वा आभिचारो वक्तव्यः ।

9.15.(2).17 क्षुद्राभिचारः

यदि केतुः गुलिककेन्द्रे लग्नसुखदशमेषु स्थितः तदा क्षुद्राभिचारः सूचितः ।

यदि गुलिकः उदयलग्नात्, आरूढराशेः, चन्द्राद्वा केन्द्रस्थितः, गुलिकश्च मन्दयोगदृष्टियुतः तदा शत्रुभिः क्षुद्रस्थापनं कृतमिति ज्ञातव्यम् ।

यदि मान्दिः चतुर्थे चतुर्थांशे वा, तदा क्षुद्रं गृहे स्थापितम् । यदि जलराशौ चेत्, जले स्थापितम् । यत्रकुत्रापि गुलिकः स्थितः जलराशौ जलराश्यंशे वा चेत्, क्षुद्रं जले स्थापितमिति ज्ञेयम् ।

गुलिको वर्गोत्तमांशे चेत् क्षुद्रं दिग्द्वये स्थापितम् । स्थले जले च इति वा व्याख्यातव्यम् । राहुः मन्देन मान्दिना वा युक्तः चेत् सर्पसन्निधौ क्षुद्रस्थापनमिति ज्ञातव्यम् ।

यदि रविः गुलिकस्य मन्दस्य वा केन्द्रे स्थितः, तदा क्षुद्रं वृक्षोपरि स्थापितम् । एवं कुजश्चेत् केदारे क्षुद्रस्थापनम् । गुरुश्चेत् गृहे एव । शुक्रश्चेत् शय्यागृहे । गृहे इति निर्देशात् कोशगृहे पूजास्थले वा इति केचिदाहुः ।

यदि मन्दो गुलिकस्य केन्द्रेषु स्थितः तदा मलमूत्रादिविसर्जनस्थले क्षुद्रं स्थापितम् ।

अतः क्षुद्रं कस्मिन् पात्रे निक्षिप्तमिति ज्ञातुं लक्षणानि कथ्यन्ते । गुलिकः मेषसिंहचापेषु राशावंशके वा स्थितश्चेत् व्याघ्रमार्जाराशिरःकपाले निहितम् । वृषकन्यामकरेषु राशावंशके वा स्थितः क्षुद्रं घटस्थितम् । मिथुनतुलाकुम्भेशु राशावंशके वा स्थितः वंशनिर्मितवस्तुषु निहितम् । कर्कटत्रिकोणेषु राशावंशके वा स्थितः नारिकेलादीनां कपाले निहितम् । मान्दौ संहारनक्षत्रे सति क्षुद्रं पुत्रिकारूपेण निर्मितम् । यदि गुलिको वृश्चिकस्थितः यन्त्रं स्थापितमित्यवगन्तव्यम् । यदि चतुष्पान्नवांशे स्थितः तर्हि अस्थिस्थापितम् । मान्दियुक्तनवांशौः एतेषां संख्या ज्ञातव्या । गुलिकराशिनवांशदिशि क्षुद्रं स्थापितम् । यदि बाधकेशः ऊर्ध्वमुखराशौ स्थितः, क्षुद्रं वृक्षोपरि स्थापितम् । अधोमुखराशौ चेत् निखातं भवति, तिर्यङ्मुखे चेत् पाषाणद्रुममध्ये निहितम् ।

अत्र नवांशराशेरपि विवक्षा इति व्याख्यातम् । 'शुभोऽशुभर्क्षे रुचिरं कुभूतले' इति वराहहोरावचनमनुसृत्य वृक्षादीनां उत्तमनीचता वाच्या । बाधकेशः स्वनवांशे यावति स्थितः तत्संख्याकाः द्रुमाः सन्ति । बाधकेशसूचितवृक्षे तत्समीपे वा क्षुद्रं स्थापितम् । बाधकेशः जलराशौ ऊर्ध्वमुखराशौ चेत् जले क्षिप्तं, जलराशौ तिर्यङ्मुखे चेत् खातं क्षुद्रं इति ज्ञेयम् ।

बाधकेशः यदि रविः रवियुक्तो वा क्षुद्रं देवसन्निधौ स्थापितम् । चन्द्रः चन्द्रयुतो वा चेत् सोषरभूमौ जलमयप्रेदेशे वा भवति । भौमः

भौमयुतो वा श्मशाने अग्निप्रदेशे वा । बुधो बुधयुतो वा चेत् क्रीडाभवने । गुरौ गुरुयुते वा देशान्ते कोशगृहे वा । मन्दे मन्दयुते वा उच्छिष्टस्थले । राहुकेतुगुलिकयुते सर्पक्षेत्रे । क्षुद्रस्थापनदिक् षष्ठेशस्य बाधकेशस्य बाधकेशाश्रितराशेः तन्नवांशराशेः वा दिक् इत्यवगन्तव्यम् ।

9.15.(2).18 दिवाकरादिसूचितमूर्तिविशेषाः

मेषवृश्चिकयोः स्थितः सूर्यः शिवं सूचयति । वृश्चिकस्थेन स्वयंभुवं शिवं चिन्तयेत् । यदि मेषे परमोच्चे स्थितः सूर्यः, भार्गवरामादिभिः प्रतिष्ठितः सूर्यो ज्ञेयः । दशमभागात्परं मनुष्यप्रतिष्ठितमूर्तिरिति अवगन्तव्यम् । वृषस्थितः सूर्यो यक्षीं सूचयति । तुलाधरे स्थितः कालीं सूचयति । कन्यास्थितेन रविणा अवतारविष्णुः मिथुनस्थेन रविणा विष्णुश्च चिन्त्यौ । रविः कर्कटस्थः धर्मदेवताः नागांश्च सूचयति । सिंहस्थितः नित्यपूजितं देवं सूचयति । धनुःस्थितेन रविणा गन्धर्वयक्ष्यादयः चिन्त्याः । मन्दक्षेत्रस्थितः शास्तारं किरातमूर्तिं च सूचयति ।

मेषस्थितश्चन्द्रः क्षेत्रप्रतिष्ठितचामुण्डीं वृश्चिकस्थितः नीचपूजितचामुण्डीं च सूचयति । शुक्रक्षेत्रस्थितेन चन्द्रेण यक्षीं धर्मदेवं च चिन्तयेत् । मिथुने कन्यायां वा स्थितश्चन्द्रः, पुरुषविषयप्रश्ने विमानसुन्दरं स्त्रीविषयप्रश्ने विमानसुन्दरीं च सूचयति । स्वर्क्षस्थश्चन्द्रः बलयुतेश्चेत् धर्मदेवं सूचयति । बलहीनश्चेत् नागं सूचयति । सिंहस्थः अन्यपूजितां भगवतीं सूचयति । धनुषि स्थितेन चन्द्रेण आकाशगन्धर्वो ग्राह्यः । मीने स्थितेन आकाशगन्धर्वस्त्री ग्राह्या । मृगे कुम्भे वा स्थितः प्रेतं शूलपिशाचं च सूचयति ।

यदि कुजो मेषस्थितः भूतराक्षसः, ब्रह्मराक्षसः इत्यादीन् चिन्तयेत् । वृश्चिकस्थः बालप्रभक्षिण्यादिदेवताः सूचयति । वृषस्थितः भैरवयक्षीं तुलास्थितः भैरवयक्षं च सूचयति । मिथुनकन्यास्थितेन

कुजेन विष्णुश्चिन्त्यः । मिथुनस्थितेन रन्तुकामो गन्धर्वश्चिन्त्थः । कन्यास्थितेन यक्षी चिन्त्या । कर्कटस्थेन भगवती कृष्णचामुण्डी च चिन्त्ये । सिंहस्थेन अघोरादिरुद्रमूर्तयः वाच्याः । धनुर्मीनस्थितः कुक्षिशास्त्रारं वीरभद्रं च सूचयति । मृगकुम्भस्थितेन निजोत्सवविध्वंसनरुष्टदेवताः शत्रुकृताभिचारदेवताश्च चिन्त्याः ।

मेषवृश्चिकस्थितो बुधः ज्वरदेवतां सूचयति । वृषतुलास्थितेन गन्धर्वः सूचितः । मिथुनकन्ययोः स्थितेन गन्धर्वकिन्नरौ चिन्त्यौ । कर्कटस्थः जलपिशाचं सूचयति । सिंहस्थितेन नागकन्या वाच्या । धनुर्मीनस्थितेन रुष्टद्विजप्रेरितचामुण्डी वाच्या । मृगकुम्भयोः स्थितेन युद्धभूमिस्थकवची शूलपिशाचश्च सूच्येते ।

मेषे वृश्चिके वा स्थितो गुरुः शिवकोपजनितशैवभूतगणान्, ब्राह्मणाभिचारप्रेरितदुर्देवतां च सूचयति । वृषतुलास्थितो गुरुः अपस्मारयक्षीं सूचयति । मिथुनकन्यास्थितो गुरुः ब्राह्मणाभिचारदेवप्रेरितनमुंसकदेवतां सूचयति । कर्कटस्थो गुरुः, अग्निहोत्रिगृहस्थदेवतां गन्धर्वमुख्यं च सूचयति । सिंहस्थो गुरुः पुरुषविषयकप्रश्ने राजभृत्याभिचारप्रेरितदेवतां, स्त्रीविषये नार्याः भर्तारमुद्दिश्य कृतेन आभिचारेण जातां देवतां च सूचयति । मृगे कुम्भे वा स्थितो गुरुः भस्मपिशाचं जलपिशाचं अधमगन्धर्वं च सूचयति । धुनुषि मीने वा स्थितः गुरुः बाधाकारकोऽपि न बाधां कुरुते ।

मेषवृषस्थः शुक्रः गुरुवत् फलं ददाति । तथापि मेषे स्थितः यक्षं राक्षसं च सूचयति । बृषतुलास्थितः यक्षं यक्षीं च सूचयति । मिथुनकन्यास्थितः शुक्रः विद्याभ्यासविषयकाभिचारदेवतां सूचयति । कर्कटस्थः यक्षीं सूचयति । सिंहस्थः देवालययक्षीबाधां सूचयति । धनुषि स्थितः ब्राह्मणशापं, मीनस्थितः दुर्गाभगवतीं च सूचयति ।

मेषस्थो मन्दः अपस्मारदेवतां सूचयति । असाध्या चैषा बाधा । वृश्चिकस्थः पूर्वजन्मकृतपीडाप्रेरितशैवभूतं सूचयति । वृषस्थः अपस्मारयक्षं अपस्मारयक्षीं ब्राह्मणशापं च सूचयति । तुलास्थः मखविघातकुद्धशास्त्रादिभूतगणान् सूचयति । मिथुनकन्यास्थः वनदेवतां सु¶त्प्रेषितप्रेतांश्च सूचयति । कर्कटस्थः नीचप्रेषितं सुरावासगं सूचयति । सिंहस्थः क्षेत्रस्थशास्त्रारं खेटपिशाचं च सूचयति । धनुषि मीने वा स्थितः गन्धर्वभेदं सूचयति । मृगकुम्भस्थितः प्रेतं पिशाचं च सूचयति ।

9.15.(2).19 शान्तिकर्म

लग्नाधिपषष्ठाधिपस्फुटयोगः योगस्फुटसंज्ञः । तस्मिन् रवियोगदृष्टियुते आभिचारनिवारणाय अघोरबलिः कर्तव्यः । तत् चन्द्रयुतदृष्टश्चेत्, कपालहोमः कार्यः । बुधयोगदृष्टियुते चक्रहोमः । गुरुयोगदृष्टियुते प्रतिकारबलिः । भौमयुते भौमदृष्टे वा भूतमारणबलिः, खड्गरावणबलिः कृत्तिकाबलिर्वा । शुक्रयोगदृष्टियुते प्रतिकारबलिः भूतमारणबलिः च ।

आरूढलग्नात् बाधा विचिन्त्या । रोगशमनं उदयलग्नेन विचिन्त्यते । पापयोगदृष्टियुतमारूढलग्नं रोगवर्धनं आसीत् इति सूचयति । एवं उदयलग्नं चेत् रोगवर्धनं भविषयति इति सूचितम् ।

यदि शुभग्रहः नवमे स्थितः, नवमेशः इष्टस्थाने स्थितः, लग्नेशस्य रवेर्गुरोर्वा योगो दृष्टिर्वा भवति तदा ईश्वरसेवया जपैश्च रोगशमनं भवति ।

विविधप्रकारा पूजादयः शास्त्रेषु द्रष्टव्याः ।

मृत्युञ्जयगणपति
होमादीनां कर्तृचिन्तने धिषणः ।
अनुकूलो जलवृद्धि
दशगुणश्चास्तु लग्नमूर्ध्वमुखम् ॥

इति वचनमनुसन्धेयम् ।

मृत्युञ्जयहोमः, गणपतिहोमः इत्यादिकर्मणां कर्तृचिन्तने प्रश्नवशात् गुरुः लग्नभाग्याभीष्टस्थितः, लग्नराशिः जलवृद्धिराशिः ऊर्ध्वमुखराशिः वा दशमभावस्य पुष्टिश्च चेत् कर्मसाद्गुण्यं भवतीति वाच्यम् । अन्यथा चेत् फलमन्यथा इत्यवगन्तव्यम् ।

| |
|---|
| दिवाकरादिसूचितमूर्तिविशेषाः के? |

**एकाङ्कप्रश्नाः**

1. बाधकेशस्य रविसंबन्धात् के सूचिताः?
2. बाधकेशस्य बुधसंबन्धात् के सूचिताः?
3. मेषलग्नस्य बाधाराशिः कः?
4. कन्यालग्नस्य बाधाराशिः कः?
5. मिथुनस्य वासभूमिः का?
6. तुलाधरस्य वासदेशः कः?
7. कुम्भस्य वासदेशः कः?
8. महाभिचारः कथं सूच्यते?
9. कौ ग्रहौ ब्राह्मणौ?
10. कौ ग्रहौ क्षत्रियौं?
11. ग्रहेषु विप्रोत्तमः कः?
12. ग्रहेषु सार्वभौमः कः?
13. यदि गुलिकः वर्गोत्तमांशं प्राप्तः, क्षुद्रं कीदृशम्?
14. बाधकेशः ऊर्ध्वमुखराशौ स्थितश्चेत् किं फलम्?
15. वाधकेशो तिर्यङ्मुखराशौ चेत् किं फलम्?

16. क्षुद्रचिन्तायां बाधकेशः रविश्चेत् किं फलम्?
17. क्षुद्रचिन्तायां कुजः बाधकेशश्चेत् किं फलम्?
18. योगस्फुटस्य (लग्नाधिपषष्ठाधिपस्फुटयोगस्य) रविदृष्टिश्चेत् का प्रतिक्रिया?
19. योगस्फुटस्य बुधदृष्टिश्चेत् का प्रतिक्रिया?
20. योगस्फुटस्य शुक्रयोगश्चेत् का प्रतिक्रिया?

**उत्तराणि**

1. रुद्रगणाः, उग्रभूतगणाः, नागाश्च ।
2. अट्टालगाः किन्नराः ।
3. कुम्भः ।
4. मीनः ।
5. उद्यानदेवालयनृत्तभूमिः रम्यप्रदेशश्च ।
6. वीथ्यापणकाननानि ।
7. नदीमुखारण्यनिषादवासाः ।
8. यदि शुभः बाधकेशश्चेत् ।
9. गुरुशुक्रौ ।
10. रविभौमौ ।
11. गुरुः ।
12. रविः ।
13. दिग्द्वये स्थापितम् ।
14. क्षुद्रं वृक्षोपरि स्थितम् ।
15. पाषाणद्रुममध्यविन्यस्तं क्षुद्रम् ।
16. देवसन्निधौ क्षुद्रं स्थापितम् ।
17. श्मशाने अग्निसन्निधौ वा क्षुद्रस्थापनम् ।
18. अघोरबलिः ।
19. चक्रहोमः ।
20. प्रतिकारबलिः भूतमारणबलिर्वा ।

**पञ्चाङ्काः प्रश्नाः**

1. विविधराशीनां बाधकस्थानानि कानि? सोदाहरणं कथयत ।
2. मेषवृषराश्योः स्वभावौ कीदृशौ?
3. मेषादीनां वनादिविभागः कथं क्रियते?
4. ग्रहवर्णान् विशदयत ।
5. मृत्युञ्जयादिकर्मणां कथं पुष्टिर्ज्ञायते?
6. शत्रुस्वभावः कथं ज्ञायते?

**दशाङ्काः प्रश्नाः**

1. सूर्यादीनां बाधकस्थानस्थितिवशात् फलानि कथयत ।
2. विषभोजनं कथं ज्ञायते?
3. बाधकग्रहसूर्यादिसंबन्धस्य फलानि कानि?
4. रोगप्रकारद्वितयं किम्? तत् कथं ज्ञायते?
5. आभिचारकारणं कथं ज्ञायते?

**विंशत्यङ्कौ प्रश्नौ**

1. "मेषाद्याश्रयभेदाः मूर्तिविशेषा दिवाकरादीनाम् ।
   कथ्यन्ते संक्षेपादिह खल्बन्यत्र विस्तरेणोक्ता ॥" इत्युक्तम् ।
   रविचन्द्रभौमबुधानां एतानि कथयत ।
2. क्षुद्रस्थापनं विशदयत ।

# दशमो विभागः

## षोडशाध्यायः

षोडशाध्यायः

### 10.16.0 अवतरणिका

अस्मिन्नध्याये लक्षणानि कथ्यन्ते । आदौ आरूढवशात् किञ्चिल्लक्षणमुच्यते । ततः ग्रहस्थितिवशात् लक्षणं कथितम् । सूर्यादीनां वस्त्राणि, तदनुसृत्य लक्षणानि चोक्तानि । यात्राविवाहसमयलक्षणानि शकुनदिनगतनाडीपञ्चभूतदूतवाक्यानि उपयुज्य लक्षणान्युक्तानि । ताम्बूलसंख्यामुपयुज्य ताम्बूललग्ननिर्णय उक्तः, ताम्बूलवशात् भावफलकथनं च । गजलाभप्रश्ने फलकथनमार्गः उक्तः । गुलिकस्थितिं इतरग्रहस्थितीश्च उपयुज्य लक्षणान्युक्तानि । शेषक्रियां कर्तुं साध्यं वा न वा इति प्रश्नस्य फलकथनं निरूपितम् । गृहदोषः, प्रभुत्वं, कालचक्रवशात् फलानि, योगिनीवशात् फलानि, योगिन्याः स्वरूपं, मृत्युयोगिन्योः, स्फुटानयनं नरकपातः, स्वर्गवासः, धनागममार्गः इत्यादीनि निरूपितानि ।

### 10.16.1 उद्देश्यानि

- लक्षणानि
- ताम्बूललग्नम्
- गजलाभः
- गुलिकफलानि
- शेषक्रिया
- कालचक्रं, योगिनी च

10.16.2 पृच्छकस्य दूरस्थित्यादिलक्षणम्

लग्ने चरे चरमुखांशकतः क्रमेण
दूरे नृणां चरणसंस्थितितद्द्वयानि ।

अभ्यर्ण एव तदिदं त्रितयं स्थितर्क्षे
तद्वद्वदेदुभयतात्मनि मध्यदेशे ॥ 16.3

इति वचनमनुसन्धेयम् ।

यदि लग्नं चरराशिः चरांशकयुतं च भवेत्, तदा पृच्छकः दूरदेशस्थित इति वक्तव्यम् । यदि चरलग्नस्य उभयांशो भवति दूरस्थः सञ्चरति, सञ्चाररहितश्च भवति इति वक्तव्यम् । यदि स्थिरांशकयुतः स्थिरराशिर्लग्नं भवति, निकटस्थश्च इति वाच्यम् । स्थिरलग्नस्य चरांशकश्चेत् समीपस्थः, सञ्चरति च इति वक्तव्यम् । यदि स्थिरलग्नस्य उभयांशः तदा समीपस्थः, सञ्चरति सञ्चारहीनश्च इति वक्तव्यम् । यदि उभयलग्नस्य चरांशः, तदा पृच्छकः मध्यदेशे स्थितः, सञ्चरति च इति वक्तव्यम् । उभयलग्नस्य स्थिरांशश्चेत् मध्यदेशे स्थिर इति वाच्यम् । उभयलग्नस्य उभयांशश्चेत्, मध्यदेशे स्थिरः, चरति च इति वक्तव्यम् । आरूढाधीशेन तदंशेन च एवं वक्तव्यम् ।

10.16.3 पृच्छकस्य, द्रव्यलाभः

यदि आरूढराशौ तत्सप्तमे वा उच्चस्थो ग्रहः अस्ति, पृच्छकस्य ग्रहसूचितद्रव्यलाभः सिध्यति । "सौर्यां स्वं नखदन्त" इत्यादिवराहमिहिरवचनैः द्रव्यस्वभावो ज्ञातव्यः ।

आरूढभतदीशाभ्यां लक्षणं यदुदीरितम् ।
आरूढविषये पूर्वं तत्तदत्रापि योजयेत् ॥ 16.7

इति वचनं अत्र स्मरणीयम् ।

### 10.16.4 ग्रहस्थितिलक्षणानि

यदि शुभग्रहाः सुखान्त्यार्धादिषड्भावस्थिताः पृच्छकस्य तत्कालादुपरि संपत्प्राप्तिः वक्तव्या । पापाश्चेद् आपद् भविष्यति । यदि शुभग्रहाः कर्मान्त्यार्धादिषड्भावेषु स्थिताः तदा पृच्छकस्य गतकाले संपदासीत् । यदि पापाः एवं स्थिताः तदा गतकाले आपदासीत् । यदि लग्नं तुलादिषड्राशिषु एकतमः एते योज्याः । अथवा अन्यमार्गः उच्यते । यदि लग्नं मेषादिषट्केष्वेकतमं भवति, चतुर्थोत्तरार्धादारभ्य दशमपूर्वार्धपर्यन्तं शुभाश्च स्थिताः तदा भूतकाले संपदिति वक्तव्यम् । पापाश्चेदापद् । दशमोत्तरार्धादारभ्य चतुर्थपूर्वार्धपर्यन्तं स्थितेषु शुभेषु शुभं भविष्यति । पापाश्चेत् अशुभफलं भविष्यति ।

### 10.16.5 सामदानादिभेदाः

साम्नो जीवः सभृगुतनयो दण्डनाथः कुजार्कौ
दानस्येन्दुः शिखियमबुधा सासुरा भेदनाथाः ।
वीर्योपेतैरुपचयगतैर्लग्नगैः केन्द्रगैर्वा
तत्तत्सिद्धं व्रजति तदहःस्वंशके वापि तेषाम् ॥ 16.12

इति वचनम् ।

गुरुशुक्रौ सामोपायं सूचयतः । चन्द्रः दानोपायं सूचयति । बुधमन्दराहुकेतवः भेदोपायं सूचयन्ति । रविभौमौ दण्डोपायं सूचयतः । यस्योपायस्य अधिपः बलयुतः सन् केन्द्रे उपचये वा स्थितः स उपायः कार्यसिद्धिं करोति इति अवगम्यते । उपायसूचकग्रहस्य वारे कालहोरायां वा प्रयुक्तः उपायः फलं ददाति । राहुकेत्वोः शनिवद्राहुः कुजवत्केतुः इति नियमात् उचितवारौ कालहोरे च ज्ञेयौ । यदि गुरुः केन्द्रे उपचये वा स्थितः सामोपायः गुरुवारे गुरोः कालहोरायां वा प्रयुक्तः प्रयोजनकरो भवति ।

10.16.6 गृहे धनस्थितिः

यदि शुभग्रहाः सर्वे लग्नात् केन्द्रस्थाः अथवा सर्वे शुभाः चतुर्थैकादशयोः स्थिताः तदा निर्दिष्टगृहे धनमस्तीति वक्तव्यम् । तेषां शुभग्रहाणां दिशि द्वारमस्तीति अवगन्तव्यम् । धनस्य अल्पत्वं बहुत्वं च ज्ञातुं नियमोऽस्ति । 'प्राच्यादिगृहे क्रियादयः' इत्यादिवचनमनुसृत्य ग्रहसूचितदिशि धनमस्तीति वाच्यम् । 'ताम्रं स्यात्' इत्यादिवचनमनुसृत्य द्रव्यं च ज्ञायते । ग्रहः यदि नीचे शत्रुक्षेत्रे वा स्थितः तदा धनमल्पमेव । विशेषन्यायेन स्वक्षेत्रादिस्थिताः बृहद्धनं सूचयन्ति ।

यदि कण्टकवर्तिनः शुभा स्यु
र्यदि वैकादशवेश्मगा विलग्नात् ।
धनवद्गृहमादिशेत्तदानीं
द्वारं च स्वदिशि वदेद्विधिज्ञः ॥ 16.14

इति वचनं प्रमाणम् ।

10.16.7 पृच्छकवस्त्रादीनि

भानुः कौसुम्भवासाः सितवसनधरो ग्लौरसृग्ररक्तवासाः
पालाशाच्छादनो ज्ञो वसनमथ गुरोःपीतमच्छस्य चित्रम् ।
कोणःकृष्णम्बरःस्यादथ कथयतु तैर्लक्षणं केन्द्रसंस्थै
रायस्थैर्वा स्ववासोधरयुवतिनृणामागमं प्रश्नकाले ॥ 16.17

मार्तण्डो व्रणवान् व्रणी धरणिजो वाचस्पतिः काचदृ
ङ्मन्दो वामपदे व्रणाङ्कसहितःपार्श्वे तिलाङ्को भृगुः ।
चन्द्रो माषतिलादिलाञ्छनयुतः सौम्यः सिरासन्ततो
योज्यं प्राक्तनलक्ष्मणोर्वरकलत्रादेश्च लक्ष्मण्यदः ॥ 16.18

इति लक्षणानि वक्तव्यानि ।

एवं रविः कौसुम्भवासाः । चन्द्रः सितवस्त्रधारी । कुजः रक्तवस्त्रयुतः । बुधः पलाशसदृशवस्त्रः । गुरोः पीताम्बरम् । शुक्रस्य चित्रवस्त्रम् । मन्दस्य कृष्णवस्त्रम् । केन्द्रस्थितैः दशमस्थितैर्वा सूर्यादिग्रहैः प्रश्नसमयग्रहसूचितवस्त्रधरः पुरुषो स्त्री वा आगमिष्यतीति वक्तव्यम् । ग्रहस्य स्त्रीपुरुषभेदात् पुरुषः स्त्री वा इति ज्ञातव्यम् ।

रविः कुजश्च व्रणवन्तौ । चन्द्रः माषतिललाञ्छनयुतः । बुधः सिरासन्ततः । गुरुः काचदृक् । रक्तवर्णनेत्रयुत इत्यर्थः । पार्श्वे तिलाङ्कः शुक्रः । मन्दस्य वामपादे व्रणाङ्कः । एतानि लक्षणानि प्रश्नसमये आगतानां लक्षणकथने योज्यानि ।

### 10.16.8 शकुनविषयकं लक्षणम्

अत्र पृच्छानिरूपणसमयोचितानि लक्षणानि वक्तव्यानि ।

### 10.16.9 दिनगतनाडिकावशाल्लक्षणम्

प्रश्ने दिनगतविघटी
  र्विन्यस्य विभज्य शेखरैः शेषात् ।
विज्ञेया विहगाना
  मुदयो वक्तव्यममुनेदम् ॥ 16.26

इति वचनात् ग्रहाणामुदया ज्ञेयाः ।

प्रतिदिनं सूर्याद्यष्टग्रहाः उदयं प्राप्नुवन्ति । दिनं अष्टभागैः विभजेत् । प्रथमो भागः वाराधिपस्य । द्वितीयः ग्रहक्रमेण इतरेषाम् । बुधवारश्चेत् आदौ बुधस्य । ततः गुरोः । ततः शुक्रस्य । एवं सर्वत्र गणनीयम् । राहोः शनेरनन्तरमुदयः । दिनगतनाडीः ज्ञात्वा प्रश्नसमयः कस्य ग्रहस्य काले इति ज्ञातुं शक्यते । बुधगुरुशुक्रकालेषु सकलकर्माणि सिध्यन्ति । चन्द्रस्य कालश्चेत् शनैः कार्यसिद्धिर्भवष्यति । इतरेषां काला न कार्यसिद्धिकराः । ग्रहकालस्तु अहर्मानं अष्टभागैः

विभज्य ज्ञातव्यः । पृच्छा रात्रौ चेत् एतन्न युज्यते । रात्रेः प्रथमकालाधिपः “वारेशात् पञ्चमात्” गणनीयः, कालस्तु रात्रिमानं अष्टभागैः विभज्य ज्ञेयः इति केषाञ्चिन्मतम् ।

10.16.10 पञ्जभूतवशाल्लक्षणम्

आत्मश्वासोद्भवो दूतवाक्यप्रथमवर्णतः
दिनयात घटी भूतो भूतानामुदयस्त्रिधा ॥ 16.28

उभयोः पुटयोस्तु दण्डसंस्था
पृथिवी तोयमधः कृशानुरूर्ध्वम् ।
पवनस्तिर्यङ् नसोऽथ मध्ये
गगनं भूतगतिस्तनूद्भवेयम् ॥ 16.29

भूमेरकारं पयसस्त्विकारं
वह्नेरुकारं मुनयो वदन्ति ।
एकारमोकरमपि क्रमेण
वायोश्च वर्णं नभसश्च वर्णम् ॥ 16.30

यामः स्याद्दिवसाष्टभाग इह ते चोजे महीपूर्वहकः
युग्मे स्याद्गगनादितश्च दिवसे रात्रौ च भूतक्रमः ।
भूमेः पादयुता घटी च पयसो नाड्यङ्घ्रिहीनो शुचेः
नाड्यर्धः पवनस्य रवस्य घटिका पादद्वयोर्यामयोः ॥ 16.31

एवं पञ्चभूतोदयः त्रिभिर्मार्गैः विचिन्त्यः । ते श्वासगतिः, दूतवाक्यं, गतनाडीनिर्णयश्च । उभयोर्नासापुटयोर्मध्ये यदि दण्डवत् श्वासगतिरस्ति पृथिवीभूतमिति ज्ञेयम् । दण्डाकारं विना यदि श्वासः अधश्चरति तदा जलभूतं भवति । यदि श्वासः ऊर्ध्वं चरति अग्निभूतमिति ज्ञातव्यम् । श्वासस्य तिर्यग्गतिः वायुभूतं सूचयति । यदि श्वासः नासाद्वारयोर्मध्ये चरति, तदा आकाशभूतं सूच्यते । अन्यमार्गैरपि भूतोदयं ज्ञातुं शक्यते ।

अग्निभूतोदयश्चेत् अन्योन्यशत्रुता मरणं च सूच्येते । वायुभूतोदयश्चेत् गमनागमनादिचलस्वभावयुतानि कार्याणि सिध्यन्ति । आकाशभूतोदयश्चेत् नवरोगाः उत्पन्ना भवन्ति । संपदां कार्याणां च नाशो भवति । स्थिरस्वभावयुतकार्याणि सिध्यन्ति । पृथिवीभूतोदयश्चेत् रोगस्य न शमनं भवति । रोगी न म्रियते च । जलभूतोदयश्चेदभीष्टसिद्धिर्वाच्या ।

यदि दूतवाक्यस्य आद्याक्षरं अकारश्चेत् तदा पृथिभूतोदयोऽस्ति । इकारः जलभूतोदयं, उकारः अग्निभूतोदयं एकारः वायुभूतोदयं, ओकारः आकाशभूतोदयं च सूचयन्ति । सवर्णाः च गृहीताः । 'कृष्ण' इति शब्दे ऋकारः भूतोदयं सूचयति । अत्र अग्निश्चिन्त्यः । क्लृप्तः इति लृकारणेनाराब्धः शब्दश्चेत्, जलभूतोदयः कल्प्य इति संप्रदायः । फलानि पूर्ववत् ।

तृतीयप्रकारः एवं विशदीक्रियते । दिवसस्य षोडश यामाः सन्ति । यामदैर्ध्यं त्रिपादयुताः तिस्रो घटिकाः । प्रथमपञ्चमाद्योजयामे आदौ पृथिवीभूतं अन्ते आकाशभूतं च । तृतीयचतुर्थादिषु युग्मयामेषु आदौ आकाशः अन्ते पृथिवी च । सर्वत्रापि पृथिव्याः एका नाडिका, जलस्य एका नाडिका अग्नेः पादोना एका नाडिका वायोरर्धा आकाशस्य नाडिकापादः इति तेषां दैर्ध्याणि । फलानि पूर्ववत् ।

### 10.16.11 लक्षणान्तराणि (द्रव्यलाभनाशौ)

अत्र लक्षणान्तराणि च कथितानि । यदि लग्नाधिपः पापयुतः तदा आपद् भवति । नरराशिस्थो लग्नेशः नरेण कृतमापदं सूचयति । एवं चतुष्पाद्राशिना चतुष्पाद्भीतिः । सरीसृपराशिः सर्पभीतिं सूचयति । कर्कटवृश्चिकौ सरीसृपराशी । पापयुतो लग्नेशः जलराशिस्थितः जलभीतिं सूचयति । शनिः संहारनक्षत्रस्थितः भौमयुतेक्षितः अग्निभयं सूचयति । एवं केतुयुतोऽपि अग्निभयं कुरुते । यदि केतुयोगो न विचार्यते राहुदृष्टिः एव अत्र उक्तं इति कल्प्यताम् ।

लग्नाधिपस्य संहारनक्षत्रस्थितिः पापग्रहयोगदृष्टिश्च पृच्छकस्य कुष्ठरोगं कुरुतः । लग्नाधिपस्य संहारनक्षत्रस्थितस्य राहुयोगदृष्टिः सर्पदंशं सूचयति ।

रविः लग्ने धने शुक्रश्च स्थितौ धनलाभं कुरुतः । यदि शुक्रः लग्नस्थः, रविर्व्यये च भवेतां, तदा स्वर्णनाशो भवति । यदि लग्ने मन्दः, धने बुधश्च, तदा अयोलाभो वक्तव्यः । यदि मन्दः व्यये बुधः लग्ने च स्थितौ अर्थनाशो भवति । लग्ने शुक्रः भौमः धने चेत्, ताम्रलाभः सूचितः । भौमः लग्ने शुक्रः व्यये च चेद् धनलाभो भवति । भौमः व्यये मन्दः लग्ने च चेद् धननाशो वक्तव्यः ।

नीचे शत्रुक्षेत्रे वा स्थितो रविः लग्ने चेत् चतुष्पान्नाशो भवति । तादृशो रविः नीचस्थशत्रुक्षेत्रस्थमौढ्ययुतबुधेन युतश्चेत् कीटादापदः सूचिताः । अत्र क्रमुकादीनां धान्यदीनां च कृमिकीटनाशोऽपि विवक्षितः । एतादृशो बुधः लग्नस्थश्चेत् पुत्रबन्धूनां आपदः सूचिताः ।

उच्चस्थो गुरुः शुक्रो वा यदि चन्द्रेण सह लग्नस्थितः तदा सर्वजनप्रीतिः वाच्या । पक्षेण पृच्छकस्य पशुलाभोऽपि सूचितः ।

स्वोच्चस्थितो देवगुरुर्भृगुर्वा
  चन्द्रेण युक्तो यदि लग्नसंस्थः ।
प्रीतिर्भवेदेव जनात्समस्तात्
  पक्षेण लाभेन चतुष्पदानाम् ॥ 16.41

इति वचनमत्र अनुसन्धेयम् ।

10.16.12 दूतवाक्यफलानि

दूतवाक्यप्रथमाक्षरसूचितसंख्यां पञ्चभिर्हत्वा अष्टमि¶Rत्वा यच्छिष्टं तत् एकं चेत् इन्द्रः, द्वे चेत् अग्निः इत्यादिदिक्पालकाः सूचिताः । एकं चेत् रोगः, द्वे चेदसाध्यरोगः, त्रीणि चेत्

कृच्छ्रसाध्यरोगः । इन्द्रश्चेत् देवपूजादिभिः रोगशान्तिः । अग्निश्चेन्मृत्युञ्जयहोमः कर्तव्यः । यमश्चेत् पितृप्रीतिः कार्या । वरुणश्चेत् देवाय, विशेषतः शिवाय तैलघृताभिषिको विहितः । वायुश्चेत् मालाचन्दनागरुगुग्गुलूत्थधूपादिभिः भूषणार्पणैश्च रोगशान्तिः । कुबेरश्चेत् जन्मदिने देवद्विजार्चनं कर्तव्यम् । गीतनृत्तभारतपारायणवेदाध्ययनैश्च प्रीतिर्भवति ।

10.16.13 ताम्बूलफलम्

ताम्बूलसंख्यां द्विगुणां शरघ्नां
  सैकां हरेत्सप्तभिरत्र शिष्टैः ।
सूर्यादिकानामुदयोऽत्र कल्प्यो
  ग्रहोदयो यत्र स लग्नराशिः ॥ 16.50

दुःखाय भानुरुदितः सुखकृच्छशाङ्कः
  प्रष्टुः कुजः कलहकृद्धनदौ ज्ञजीवौ ।
शुक्रोऽखिलाभिमतकृन्मरणाय मन्दो
  लग्नादिभावविहगैश्च वदेत्फलानि ॥ 16.51

इति ताम्बूललग्ननिर्णयः फलानि च ।

ताम्बूलसंख्यां दशभिर्हत्वा, एकं योजयित्वा सप्तभि¶Rत्वा यच्छिष्टं तद् एकं चेत् रविः द्वे चेच्चन्द्रः त्रीणि चेद् कुजः इत्यादयः संख्यासूचितग्रहाः । ताम्बूल संख्या ४ भवतु । ४ × १० + १ = ४१, सप्तभि¶Rत्वा शिष्टं ६, शुक्रः सूचितः शुक्राश्रितराशिः ताम्बूललग्नम् । तदनुसृत्य फलानि कथितव्यानि । सूर्यश्चेत् दुःखं, चन्द्रश्चेत् शुभं कुजश्चेत् कलहः, बुधः गुरुः वा चेत् धनं, शुक्रश्चेत् सर्वाभीष्टसिद्धिः मन्दश्चेत् मरणमिति फलानि वक्तव्यानि । यदि पृच्छा पूर्वाह्णे स्यात्, ताम्बूललब्धक्रमेण हस्ते निधाय आद्येन लग्नं, द्वितीयेन धनभाव इत्यादीनि चिन्त्यानि । अपराह्णे चेत् प्रश्नः, विपरीतक्रमेण

गणितव्यानि । अधः स्थितं लग्नं सूचयति । तदुपरि स्थितं द्वितीयभावं इत्यादिक्रमेण लग्नादिभावाश्चिन्त्याः । रात्रिविधिः ग्रन्थेषु नोक्ता । तथापि पूर्वार्धे विपरीतक्रमेण, उत्तरार्धे लब्धक्रमेण गणनं कर्तव्यमित्युपदेशः । पत्रस्वभावनुसृत्य फलानि वक्तव्यानि । यदि भावसूचकपत्रं छिन्नभिन्नं भवति अनिष्टफलं वक्तव्यम् । दीर्घह्रस्वायतकृशादिस्वभावैः युक्तियुक्तानि फलानि वक्तव्यानि ।

10.16.14 गजलाभप्रश्नः

लग्नाद्द्यूनतपःसुतेषु धिषणः पाथोनराश्यंशगे
प्रश्ने कुञ्जरलाभकृन्नरपतेस्तत्रायनाथो यदि ।
नायं संश्चतुरङ्घ्रिभस्य नियतं केन्द्रत्रिकोणाश्रितः
शीघ्रं तत्खलु केन्द्रगौ यदि तदा कर्मेशभाग्याधिपौ ॥ 16.53

इति वचनम्नुसृत्य गजलाभश्चिन्त्यः । एवं गुरुः कन्यायां कन्यानवांशे वा स्थितः लग्नात् सप्तमनवमपञ्चमभावेषु चेत् पृच्छकस्य प्रभोः गजलाभो भविष्यति । यदि लाभाधिपः चतुष्पाद्राश्यधिपो भूत्वा केन्द्रत्रिकोणेषु स्थितश्चेत् गजलाभः स्थिरीक्रियते । भाग्यकर्माधिपौ केन्द्रस्थितौ चेत् गजलाभः शीघ्रमेव भविष्यतीति वक्तव्यम् ।

10.16.15 गुलिकेतरग्रहयोगफलानि

गुलिकस्फुटं इतरग्रहाणां स्फुटैःसह सम्यक् गणितव्यम् । ततः परं फलानि वक्तव्यानि ।

यदि गुलिकः रविदृष्टो रवियुतो वा तदा पृच्छकस्य गृहे कश्चित् रोगी भवति । राजकोपोऽस्ति । राजसंबन्धी कश्चित् पृच्छकगृहमागत इति वक्तव्यम् ।

यदि चन्द्रः गुलिकयुतो गुलिकदृष्टो वा तदा पृच्छकगृहे स्त्रीणां कलहोऽस्ति । अथवा स्त्रीहेतोः पुरुषयोः कलहो वा भवति । दूरात्कलहवार्ता श्रूयते वा ।

गुलिकः कुजयुतो कुजदृष्टो वा चेत् समीपे व्याघ्रशुनकाधिपयोः मिथः कलहो वाच्यः । समीपे कश्चित् शव आनीत इति वा वक्तव्यम् । मांसमानीतमिति वा ।

बुधयुतः बुधदृष्टो वा गुलिकश्चेत् पृच्छकगृहपरिसरे नूतनलोहजघटादीनां उपगमः वक्तव्यः । स्त्रीपुरुषयोः कलहो वा वाच्यः ।

जीवो यदि गुलिकयुतः दृष्टो वा तदा वृक्षपतनं वक्तव्यम् । गुरुः चरराशिस्थश्चेत् समूलं भग्नो भवति वृक्षः । स्थिरराशिस्थितश्चेत् मध्ये भङ्गो भवति । उभये चेत् राशिवशात् फलं कथितव्यम् । यदि जीवः मीने धनुषि वा स्थितः तत्तद्राशिवशात् ऐशान्यां वायव्यां च क्रमात् पतनम् । पीडितमानसः ब्राह्मण आगतो वा । अथवा फलं प्राप्यते । पूर्वजहेतोरापदः भवन्ति । पूर्वजानां शेषक्रिया वा वाच्या ।

शुक्रः मान्दिना युतः अथवा मान्दिं पश्यति चेत् पात्रक्षतिः वस्त्रच्छेदो वा वाच्यः । विप्रागमो वा भवति । दधि पयः इत्यादीनां आगमः । मार्जारस्य आखुकुक्कुटग्रहणं च वाच्यम् ।

यदि गुलिकः मन्दयुतो मन्ददृष्टो वा, तदा पृच्छकगृहसमीपे चण्डालमृतिर्वाच्या । चण्डालकलहो वा भवति । आयसपात्राणामागमश्च वाच्य : । यदि गुलिकस्य राहुयोगो भवति तदा शुनकव्याघ्रकलहः वक्तव्यः । पृच्छकसंबन्धिनः सर्पदोषाः, सर्पद्वयागमनं, क्षीरागमनमित्यादीनि वक्तव्यानि । केतुफलं राहुसदृशमित्यवगन्तव्यम् ।

10.16.16 शेषक्रियाप्रश्नः

रविः नवमाधिपश्च स्वक्षेत्रस्वनवांशयुतौ भवतः, रविनवमाधिपौ द्वादशे तिष्ठतः, द्वादशं पश्यतो वा, लग्नात् केन्द्रभावेषु राशौ नवांशे वा रविनवमेशौ तिष्ठतः, इत्येते शेषक्रियालब्धियोगाः । एते योगा न चेत् शेषक्रियायाः असंभवः । यदि नवमे पापयोगो पापदृष्टिर्वा तदा शेषक्रियायाः विघ्नो वक्तव्यः । यदि शुभस्य दृष्टिर्योगो वा भवति सम्यक् परिशोध्य फलानि वक्तव्यानि ।

10.16.17 पितृपुत्रबन्धः

एषः पितृपुत्रयोः जातके परीक्ष्य वक्तव्यः । यदि पुत्रस्य लग्नराशिः पितुर्जन्मराशेः अष्टमो भवति अथवा पितुर्जन्मराशेः अष्टमराशीशः सुतस्य जन्मलग्ने स्थितः सुतः शेषक्रियां करोति । यदि पितुः जन्मराशितः अष्टमराशीशस्य त्रिषु नक्षत्रेष्वेकस्मिन् जातः सुतः पुत्रपौत्रादियुतो भवति । शेषक्रियां कुरुते च । पितृजन्मराशितः दशमराशिः सुतजन्मलग्नं चेत् सुतः गुणैः पितृतुल्यो भवति । एतस्मिन् योगे लग्नाधिपो लग्नस्थितश्चेत् 'पितुःशतगुणः पुत्रः' इति वचनमनुसृत्य पितृतोऽधिको भवति । पितृजन्मराशितः दशमेशः सुतजन्मलग्नस्थितश्चेत् एवमेव फलम् ।

यदि पितृजन्मराशितः नवमलाभद्वितीयराशिषु जातः सुतः सदा पितरं अनुवर्तते । यदि सुतजन्मराशेः एकादशे जन्माधिपाश्रितराशेः पञ्चमे नवमे वा पितुर्जननं, तदा पित्रार्जितं सकलवित्तं स लभते ।

लग्नात् नवमेशः एकादशे स्थितः अथवा चन्द्रान्नवमेशस्तस्माल्लाभस्थितश्चेत् पितरि जीवति शुश्रूषया मृते शेषक्रियया च पितृप्रीतिं स प्राप्नोति । यदि लग्नाधिपः रविणा भाग्येशेन वा युतः, अथवा लग्नाधिपो नवमे स्थितः, तदा पुत्रः पितृवत् सदाचारयुतो विद्यावान् च भवति ।

10.16.18 वासभूमिप्रश्नः

> कालेऽस्मिन् वासभूमेर्मे ग्रहदोषोऽस्ति वा न वा ।
> इति प्रश्ने कृते वक्तुं लक्षणं किमपीर्यते ॥ 16.69

इति वासभूमिप्रश्ने, पृच्छकस्य वासभुमिः शुभकरी वा न वा इति प्रश्नः चिन्त्यते ।

वासभूमेर्नामानुसृत्य लग्नं निश्चीयते । वासभूमिनाम्नः आद्याक्षरमनुसृत्यैव एतत् क्रियते । मलयाल भाषायां एकारस्य ओकरस्य च ह्रवौ च भवतः । अ, आ, इ, ई, उ, ऊ, ए (ह्रस्व), ए, ऐ, ओ (ह्रस्व), ओं, औ इति द्वादश स्वराक्षाणि सन्ति भाषायाम् । एतानि द्वादशराशिषु विन्यस्यन्ते । ततः क, ङ, च, ञ, ट, ण, त, न, प, म, य, र इत्यक्षराणि मेषादिद्वादशराशिषु कल्प्यन्ताम् । शिष्टानि व्यञ्जनाक्षराणि ल, व, ७, ळ, र(റ), न इति षट् । एतानि मेषादिषड्राशिषु तुलादिषड्राशिषु च विन्यस्यन्ते ।

| | | | |
|---|---|---|---|
| औ<br>र<br>न | अ<br>क<br>ल | आ<br>ङ<br>व | इ<br>च<br>७ |
| ओ<br>य<br>र (റ) | | | ई<br>ञ<br>ळ |
| ओ(ह्र)<br>म<br>ळ | | | उ<br>ट<br>र (റ) |
| ऐ<br>प<br>७ | ए<br>न<br>व | ए(ह्र)<br>त<br>ल | ऊ<br>ण<br>न |

नाम ‘अग्नि’ इति चेत् मेष राशिः लोल इति चेत् मेषः तुलाधरश्च । द्वे लग्ने च फलकथने उपयुज्येते । तथापि मेषादिषड्के स्थितस्यैव प्राधान्यम् । भाषायां रेफद्वयं वर्तते ।

एतत्सर्व मलयालभाषामुद्दिश्य कथितम् । द्रमिलभाषायामपि योज्यम्,

“द्रामिला द्वादशाच स्यु
वर्गाद्यन्ता यरान्विताः ।
क्रमाद्योज्या च शेषाः स्यु
र्मेषाद्येषु च षद्स्वपि ॥”

एवं, भूमिलग्नं चिन्त्यम् । ‘इलत्तूर’ इति नाम्नः इ इत्याद्याक्षरम् । लग्नं मिथुनं भवति । गुरुः त्रिकोणे भवति । लग्नराशिः चरश्चेद् नवमे गुरुर्भवति । स्थिरश्चेत् तत्रैव गुरुः । उभयराशिश्चेद् पञ्चमे गुरुः इति नियमः । ततः चन्द्रस्य स्थितिः निर्णेया । तदर्थं अवकहडादिकविधिरुच्यते । कृतिकाभ्य आरभ्य आश्लेषापर्यन्तं प्रथमो वर्गः । मघायाः आरभ्य विशाखापर्यन्तं द्वितीयो वर्गः । अनुराधायाः आरभ्य (अभिजिद्युतः) श्रवणपर्यन्तं तृतीयो वर्गः । यदि भूमिनाम्नः आद्याक्षरं ‘अ–व–क–ह–ड’ इत्येतेष्वेकतमं तदा प्रथमो वर्गः । ‘म–ट–प–र–त’ इति वर्गे अन्तर्गतं चेद् द्वितीयो वर्गः । ‘न–य–व–श–ज’ इति वर्गे अन्तर्गतं चेद् तृतीयो वर्गः । ‘ग–द–स–च–ल’ इति वर्गे अन्तर्गतं चेद् चतुर्थो वर्गः । प्रत्यक्षरं पञ्चविधाः नक्षत्रपादाः सन्ति । अक्षराणां अ–इ–उ–ए–ओ भेदात् । एवं पञ्चविंशतिविधाः । तथापि नक्षत्रपादाः, ७ × ४ = अष्टाविंशतिः । एवं सर्वेषामपि पादानां अनुयोज्यानि अक्षराणि न सन्ति । एतदुदाह्रियते । अ–इ–उ–ऐ एतेषुं एकस्मिन्, भूमिनाम्नः आद्याक्षरे सति कृत्तिका नक्षत्रस्य प्रथमद्वितीयतृतीयचतुर्थ पादाः । ओ–व–वि–वु इति चत्वारः रोहिणी नक्षत्रस्य प्रथमादिपादान् सूचयन्ति । वे–वो–

क–कि इति चत्वारः मृगशिरोनक्षत्रस्य चत्वारः पादाः । आर्द्रायाः कु इत्येकमक्षरम् । पुनर्वसोः के, को, हा, हि, इति । पुष्यस्य हु, हे, हो, ड इति । आश्लेषायाः डी, डु, डे, डौ इति । एवं प्रथमो वर्गः । प्रतिवर्गं सप्त नक्षत्राणि । षण्णां चत्वारः पादाः । एकस्य (चतुर्थस्य) एकं नक्षत्रम् । आहत्य ६ × ४ + १ = २५ । एवं अन्येऽपि वर्गाः चिन्त्याः ।

"अवकहडान् मटपरतान्
नयवशजानथ पठन्ति गदसचलान् ।
पञ्चस्वरसंभेदा
दैकैकं पञ्चधा भवेद्वर्णम् ।
एकैकं नक्षत्रं
चतुश्चतुर्भिश्च चतुर्थमेकेन ।
वर्गैश्चतुर्भिरेतै
रनलादिमसप्तकानि चत्वारि ॥
जन्मर्क्षपस्यार्धफलं
सौरर्क्षे ब्राह्मणस्य विज्ञेयम् ।
नृपवैश्ययोः समानं
शूद्रादीनां ततोऽप्यधिकम् ॥

एवं भूमेर्लग्नराशिः चन्द्राधिष्ठितराशिश्च ज्ञातौ । एतयोः अष्टमे चारवशात् यदा पापः सञ्चरति तदा तत्स्थलवासिनां, चतुष्पदां मृत्युः संभवति । पृच्छासमये यदि एवं संभवति तर्हि तत्समये एवं फलानुभवः । एतदारूढलग्नाच्च चिन्त्यम् । चन्द्रलग्नराश्योः पञ्चमे नवमे वा यदा गुरुः सञ्चरति तत्रत्यजनानां गर्भो भवति । जीवाश्रितराशिः चतुष्पाच्चेत् चतुष्पदामेव गर्भः । एवं युक्तियुक्तानि फलानि वक्तव्यानि ।

यदि पृच्छककालारूढलग्नराशेः तत्समयचन्द्राधिष्ठितराशेर्वा षष्ठे तृतीये वा गुरुः स्थितः, तदा कलहः सूचितः । यदि गुरुः

अष्टमस्थितः तदा राजोपद्रवः सूचितः । यदि स द्वादशस्थितः तदा वासभूमौ वधः सूचितः ।

10.16.19 आधिपत्यलाभः

यदि कश्चित् आधिपत्यलाभः सिध्यति वा न वा इति पृच्छति तदा किं वक्तव्यमित्युच्यते । एतत्पृच्छकस्य जन्मकालग्रहस्फुटानि निर्मीयन्ताम् । ग्रहाश्रित नक्षत्राणि विशेषतः ज्ञातव्यानि । रविचन्द्रभौमलग्नाधिपकर्माधिपानां पञ्चानां आश्रित नक्षत्राणां प्रथमपादाधिपाः ज्ञातव्याः । अश्विनी चेत् कुजः, भरणी चेद्रविः इति तेषां क्रमः । एते बलवन्तो भूत्वा ग्रहांशानां एकादशभावेषु स्थिताश्चेत् अधिपत्यं प्राप्यते । यदि ते जन्मलग्नत्रिकोणस्थिताः भवन्ति तदापि आधिपत्यं लभ्यते । यदि ते षष्ठाष्टमव्ययेषु स्थिताः आधिपत्यं लभ्यते इत्यवगन्तव्यम् । इतरभावेषु स्थिताश्चेत् कालविलम्बेन आधिपत्यं प्राप्यते । सूर्यादिनवग्रहेषु त्रयो वा अधिकाः यदि इन्द्रपदनैऋतपदनक्षत्रेषु स्थिताः अथवा अनुराधाद्यष्टनक्षत्रेषु स्थिताः तदा आधिपत्यं लभ्यते ।

विविधपदनक्षत्राणि ज्ञातुं मार्गः अत्र प्रदर्श्यते ।




कालचक्रम्

त्रीणि चतुरश्राणि सदृशानि सदृशं स्थितानि कुर्यात् । ऐशान्यकोणादारभ्य नैऋतकोणपर्यन्तं दण्डाकाररेखा कार्या । आग्नेयकोणादारभ्य वायव्यपर्यतं दण्डरेखां कुर्यात् । बहिस्थचतुरश्रवामभुजमध्यबिन्दोरारभ्य बहिस्थचतुरश्रदक्षिणभुज–मध्यपर्यन्तं रेखा कार्या । एवं बहिःस्थचतुरश्रोर्ध्वभुजमध्यबिन्दोरारभ्य बहिःस्थ चतुरश्राधोभुजमध्यबिन्दुपर्यन्तं रेखा कार्या । एवं कृतें चतुरश्राणां दण्डरेखानां संपादाः पञ्चविंशतिः सन्ति । संपादाः नक्षत्राणि सूचयन्ति । बहिःस्थचतुरश्रोर्ध्वमुखमध्यबिन्दोरारभ्य अन्तः केन्द्रपर्यन्तं संपादान् गणयेत् । एवं चत्वारि नक्षत्राणि सूचितानि ।

ततः दक्षिणस्थदण्डद्वारा बहिर्गच्छन् आग्नेयकोणपर्यन्तं गणयेत् । अन्ते संपादः सप्तमनक्षत्रं सूचयति । ततः दक्षिणभुजस्य मध्यबिन्दुः अष्टमं नक्षत्रं सूचयति । ततः तदारब्धदण्डद्वारा अन्तः प्रविशन् मध्यबिन्दुपर्यन्तं गणयेत् । एवं एकादशनक्षत्राणि । ततः मध्यनैऋतकोणसंस्पर्शिदण्डद्वारा बहिर्गच्छन् चतुर्दशपर्यन्तं गणयेत् । ततः अधोभुजमध्यबिन्दुः पञ्चदशं सूचयति । अन्तः तदारब्धदण्डद्वारा मध्यं गच्छन् अष्टादशपर्यन्तं गणयेत् । ततः वायव्यकोणस्पर्शिदण्डद्वारा बहिर्गच्छन् स्एकविंशतिपर्यन्तं गणयेत् । ततः वामभुजमध्यबिन्दुः द्वाविंशं सूचयति ततः तदारब्धदण्डद्वारा अन्तः प्रविशन् मध्यबिन्दुपर्यन्तं गणयेत् । एवं आष्टाविंशति नक्षत्राणि अभिजिद्युक्तानि ।

एतस्मिन् चक्रे पूर्वपश्चिमदण्डरेखायाः पूर्वभागे आदित्याश्रितनक्षत्रं कल्पचित्वा, अधः चतुरश्रमध्यपर्यन्तं गणयेत् । ततः दक्षिणतः बहिर्गच्छेत् । एवं संचरन् प्रश्नकालचन्द्राश्रितनक्षत्रपर्यन्तं गणयेत् । प्रश्नकालनक्षत्रं प्राणस्थितिं सूचयति । तं चिह्नेन सूचयेत् । पृच्छकस्य जन्मनक्षत्रं पूर्वदण्डरेखाग्रे संकल्प्य प्रश्नकालनक्षत्रपर्यन्तं गणयेत् । तत्स्थं देहं संकल्प्य चिह्नेन सूचयेत् । ऐशान्यकोणे कृत्तिकाः संकल्प्य ऐशान्यनैऋतारेखायां मध्यपर्यन्तं संचरन् वामस्थरेखायाः बहिर्गच्छेत् । एवं प्रतिलोमक्रमेण गणयित्वा प्रश्नकाले नक्षत्रे मृत्युस्थितिः कल्प्यताम् । तदर्थं चिह्नेन सूचयेत् । एते चिह्निता प्राणमृत्युदेहाः चतुर्षु दण्डेषु एकस्मिन् स्थिते सति पृच्छकस्य मृत्युर्वाच्या । मृत्युदेहौ एकस्मिन् सति रोगवर्धनम् । प्राणमृत्यू एकस्मिन् दण्डे सति उत्साहहीनत्वं मोहालस्यं च वक्तव्ये । पूर्वदण्डरेखायाः आरभ्य कृत्तिकानक्षत्रात् गणयन् अधः संचरन् दक्षिणदण्डेन बहिर्गच्छेत् । एवं गुलिकनक्षत्रपर्यन्तं गणयेत् । एवं स्थिते, गुलिकादित्यपृच्छक-जन्मनक्षत्राणि चिह्नितानि पूर्वपश्चिमरेखामपहाय अन्ये एकस्मिन् दण्डे स्थितानि चेत् मृत्युर्वाच्या ।

कालचक्रे पूर्वदण्डाग्रतः कृत्तिकाभ्यः आरभ्य अधः मध्ये गत्वा दक्षिण दण्डेण बहिर्गच्छेत् । एवं कुर्वन् यदि आदित्यनक्षत्रं, पृच्छकनक्षत्रं योगिनी च एकस्मिन्नेव स्थाने दृश्यन्ते तदा पृच्छकस्य मृतिर्वाच्या । यदि एकस्मिन् दण्डे स्थिताः पृच्छकबन्धुमृत्युर्वक्तव्यः । योगिनीसंचारः अथ विशदिक्रियते ।

योगिन्युदयः रव्यादिवारेषु पूर्वोत्तराग्नेयनैऋRतदक्षिणवारुण–वायवदिक्षु भवति । एवमुदिता योगिनी दिवा (त्रिंशत्यटिका काले) अष्टासु दिक्षु सञ्चरन्ती संध्यायां उदितदिशं प्रप्नोति । तस्या गमनस्वभाव अत्र विशदीकृतः । उदयसमयस्थदिक् सूचितदण्डेन अन्तः प्रविश्य मध्यं प्राप्य ततः वामभागस्थदण्डद्वयं त्यक्त्वा अपरेण दण्डेन बहिर्गच्छति । प्रथमयामे एवं गतिः । अत्र यामशब्देन यामार्धं अथवा पादोनचतुर्घष्टिका एव विवक्षिता । ततः द्वितीययामे येन दण्डेन बर्हगता, तेनैव अन्तः गत्वा पूर्ववत् सञ्चरति । रात्रावपि एवमेव योगिनीगतिः । दण्डस्य विविध स्थानप्राप्तिसमयाः त्रैराशिकेन ज्ञातव्याः ।

पृच्छासमयदिनगतनाडिकाविनाडिकाः ज्ञात्वा विनाडिकीकृत्य मुखरेण (२२५’) हरेत् । सूर्योदयादारभ्य गताः यामाः अत्र लब्धाः । शिष्ट यामषडंशभूतमगसुगी (३७ १/२) संख्यया ¶त्वा गतदण्डस्थानसंख्या प्राप्या । मृत्युः प्रतिदिनं वायुकोणे उद्गत्य योगिनीवत् संचरति । मृत्युः योगिनी वा यदि दिक्षु उदितः, तदा मेषादिचरराश्यन्ते स्थितः । विदिक्षु चेत् मिथुनादिराशिमध्ये च ।

अथ योगिनीमृत्युस्फुटानयनं कथितम् । तदर्थं इष्टसमयगतनाडिकाः चोळेन (९६) हत्वा दिनमानेन ¶त्वा यल्लब्धं तत् राशिं सूचयति । शिष्टं त्रिंशता हत्वा दिनमानेन ¶त्वा तिथिर्लभ्यते । शिष्टं षष्ट्या हत्वा दिनमानेन ¶त्वा भागाः लभ्यन्ते । मण्डलशोधनं कृत्वा लब्धसंख्यां च लिखेत् । तत् शून्यं चेत्, योगिन्याश्रितराशेः (मेषश्चेत् २, मिथुनं चेत् २ राशि ३० भागः इति) तत् शोधयेत् ।

मण्डलशोधने लब्धं एकं चेत् द्वितिययामदिशमनुसृत्य क्रिया कर्तव्या । एवं यथावश्यं कुर्वन् योगिनीस्फुटं ज्ञातुं शक्यते । एवंमेव मृत्युस्फुटं च ज्ञेयम् ।

यदि मृत्योः अन्तः प्रवेशसमये पृच्छा भवति, मृत्युः फलम् । बहिर्गमन समये चेत्, मरणं न संभवति, इति सामान्य नियमः । विस्तरतः प्रश्नमार्गादि ग्रन्थेषु उपलभ्यन्ते ।

| पृच्छकवस्त्रं कथं निर्णीयते ? |
|---|

**एकाङ्कप्रश्नाः**

1. लग्नं चरराशिः चरनवांशयुतं चेत्, किं वक्तव्यम्?
2. लग्नं चरराशिः उभयनवांशयुतं च चेत्, किं वक्तव्यम्?
3. जन्मलग्नाधिनाथस्य दिक् प्राची चेत् किं फलम्?
4. आरूढलग्नं कर्कटः, सप्तमे कुजः । एवं चेत् किं फलम्?
5. यदि शुभाः सुखान्त्यार्धादिषड्भावस्थिताः, तदा किं वक्तव्यम्?
6. सामोपायस्य कारकौ कौ?
7. लाभे तुलाधरे गुरुः स्थितः कि फलम्?
8. बुधस्य वस्त्रं कीदृशम्?
9. प्रश्नसमये पृथिव्या उदयश्चेत् किं फलम्?
10. प्रश्नकाले जलभूतोदयश्चेत् किं फलम्?
11. लग्ने शुक्रः, द्वितीये भौमश्च । किं फलम्?
12. गुरुः शुक्रो वा चन्द्रेण सह लग्नमाश्रितः । किं फलम्?
13. ताम्बूलसूचितग्रहः गुरुश्चेत् किं फलम्?
14. ताम्बूलपत्रं छिन्नं चेत् किं फलम्?
15. कुत्र स्थितो गुरुर्गजलाभं सूचयति?

16. आदित्यस्य गुलिकयोगः पृच्छकगृहे किं सूचयति?
17. गुरुगुलिकयोगः किं सूचयति?
18. पितुः जन्मराशेः अष्टमे सुतस्य लग्नराशिः । किं फलम्?
19. रविवारे योगिनी कुत्र उदेति?
20. यदि पितुः जन्मराशेः द्वितीयनवमैकादशराशिषु सुतो जातः, किं फलम्?

**उत्तराणि**

1. पृच्छको दूरदेशस्थितः ।
2. पृच्छकः दूरदेशे सञ्चरति, संचारहीनश्च ।
3. प्राच्यां दिशि शत्रुजयादयो सिध्यन्ति ।
4. कुजसूचितद्रव्याणि पृच्छकस्यास्ति ।
5. पृच्छकेन संपद् लप्स्यते ।
6. गुरुशुक्रौ ।
7. पलाशवर्णम् ।
8. गुरुसूचितद्रव्याणि प्रतीच्यां सन्ति ।
9. पृच्छको न म्रियते ।
10. अभीष्टसिद्धिः
11. ताम्रद्रव्यलाभः ।
12. सर्वजनप्रीतिः ।
13. धनलाभः ।
14. तत्सूचितभावनाशः ।
15. कन्याराशौ, कन्यानवांशे, लग्ने, पञ्चमे, सप्तमे, नवमे वा स्थितः ।
16. एकस्य रोगम् ।
17. वृक्षपतनम् ।
18. पुत्रः शेषक्रियां करोति ।
19. प्राच्याम् ।
20. पितरं अनुवर्तते ।

**पञ्चाङ्काः प्रश्नाः**

1. कस्यां दिशि पृच्छकस्य विजयो सिध्यति?
2. वस्त्रलक्षणं कथमुच्यते?
3. गजलाभप्रश्नः कथं चिन्त्यते?
4. शेषक्रियाकर्मप्रश्नः कथं चिन्त्यते?
5. सूर्यादिग्रहवशात् देहलक्षणानि कथयत ।
6. दूतवाक्यसूचितभूतं कथं ज्ञायते?

**दशाङ्काः प्रश्नाः**

1. पृच्छकस्य दूरस्थित्यादिलक्षणं कथयत ।
2. सामदानभेददण्डान् के के ग्रहाः सूचयन्ति?
3. सूर्योदयात् गतनाडीभिः कथं फलं कथ्यते?
4. श्वासगतिभूतोदयात् कथं फलानि कथ्यन्ते?
5. ताम्बूललग्नं कथं ज्ञायते ? फलानि कथयत ।

**विंशत्यङ्कौ प्रश्नौ**

1. पितृपुत्रबन्धः जातकवशात् कथं ज्ञायते?
2. गुलिकस्य इतरग्रहयोगदृष्टिवशात् फलानि कथं कथ्यन्ते ?